॥ अर्हम् ॥

श्री सिद्ध-
हेमचन्द्र शब्दानुशासनम्

"सिद्धहेमसरस्वती" वृत्तिविभूषितम्

(पञ्चाध्यायात्मकः प्रथमः खण्डः)

श्रीवीरनिर्वाणसंवत्	श्रीविक्रमार्कसंवत्
२४८३	२०१३

— प्रकाशिका —

श्रीजैनसाहित्यवर्धकसभा

॥ वृत्तिकार ॥

शासनसम्राट्-तपागच्छाधिपति-भट्टारकाचार्यप्रवर-श्रीविजयनेमिसूरि-श्वरमहाराज-पट्टालङ्कारशास्त्रविशारद-कविरत्न-पीयूषपाणि-पूज्यपादाचार्यवर्यश्रीविजयामृतसूरीश्वरमहाराजविनयेरत्नविनयनिधानवयोवृद्ध-पन्यासप्रवरश्रीपुण्यविजयजिद्गणिवर्य-शिष्य पं धुरन्धरविजयगणी

૩ આચાર્યશ્રી સરસ્વતી લબ્ધપ્રસાદ હતા

૪ આચાર્યશ્રી નૈષ્ઠિક બ્રહ્મચારી હતા

૫ વ્યાકરણની રચના માટે ઉપયુક્ત બાહ્ય સાધન–સામગ્રી યથોચિત સર્વ સુલભ હતી

૬ વ્યાકરણ કરવા માટે તેઓશ્રી સાકાઙ્ક્ષ હતા

૭ રાજાને પણ વ્યાકરણ કરાવવા માટે તીવ્ર તમન્ના હતી

૮ વ્યાકરણ જગતના ચોકમા મૂકવાનુ છે એટલે સ્પર્ધા ધરાવનારા પ્રતિસ્પર્ધિઓ જો ખામી હશે તો તે ખામીને ખૂબ મોટી કરી મૂકશે એટલે ખામી ન આવે તેની પૂરી કાળજી હતી

આમ અનેક સાધન સામગ્રીની અનુકૂળતાને કારણે શ્રી સિદ્ધ હેમચન્દ્રશબ્દાનુશાસન અન્ય વ્યાકરણ ગ્રન્થો કરતા વિશિષ્ટ બન્યુ

૩ આચાર્યશ્રી સરસ્વતી લબ્ધપ્રસાદ હતા

૪ આચાર્યશ્રી નૈષ્ઠિક બ્રહ્મચારી હતા

૫ વ્યાકરણની રચના માટે ઉપયુક્ત બાહ્ય સાધન–સામગ્રી યથોચિત સર્વ સુલભ હતી

૬ વ્યાકરણ કરવા માટે તેઓશ્રી સાકાઙ્ક્ષ હતા

૭ રાજાને પણ વ્યાકરણ કરાવવા માટે તીવ્ર તમન્ના હતી

૮ વ્યાકરણ જગતના ચોકમા મૂકવાનુ છે એટલે સ્પર્ધા ધરાવનારા પ્રતિસ્પર્ધિઓ જો ખામી હશે તો તે ખામીને ખૂબ મોટી કરી મૂકશે એટલે ખામી ન આવે તેની પૂરી કાળજી હતી

આમ અનેક સાધન સામગ્રીની અનુકૂળતાને કારણે શ્રી સિદ્ધ હૈમચન્દ્રશબ્દાનુશાસન અન્ય વ્યાકરણ ગ્રન્થો કરતા વિશિષ્ટ બન્યુ

આઠમો વર્ષ ઉપરાંત વર્ષોથી આ વ્યાકરણ એક ધારૂ પઠન–પાઠનમાં પ્રચલિત છે આ વ્યાકરણ ઉપર અનેક વિશિષ્ટ ટીકાઓ થઇ છે વિવરણો પણ ઘણાં થયા છે વ્યાકરણને અનુસરતા અનેક ગ્રન્થો રચાયા છે આ સર્વમા આ પ્રસ્તુત ગ્રન્થ કોઇ જુદી ભાત પાડે છે, એ આ ગ્રન્થ વાચવાથી વાચકને સમજાયા વગર નહિ રહે

પ્રસ્તુત ગ્રન્થ 'શ્રી સિદ્ધ હેમચન્દ્ર શબ્દાનુશાસન'ની ટીકા છે. આ ટીકા શ્લોકબદ્ધ છે આ ટીકાનુ અભિધાન 'શ્રી સિદ્ધહેમ–સરસ્વતી' રાખેલુ છે

શ્રી સિદ્ધહેમચન્દ્ર શબ્દાનુશાસન ઉપર અનેક નાની મોટી ટીકાઓ હોવા છતા આ રચનાની સાર્થકતામા જે કેટલાક હેતુઓ હેતુભૂત બન્યા છે તે આ પ્રમાણે છે

(૧) આ ટીકા શ્લોકબદ્ધ છે

સામાન્ય રીતે વ્યાકરણ એ શબ્દશાસ્ત્ર છે એટલે તેમા કેવળ સમજણથી ન ચાલે વ્યાકરણને તો ગોખવુ પડે ગોખવાની ક્રિયા-પ્રક્રિયામા ગદ્ય કરતા પદ્ય વિશેષ અનુકૂળ રહે છે આ ટીકા શ્લોક બદ્ધ-પદ્ય છે એટલે ગોખવી-યાદ રાખવી સરલ છે વ્યાકરણ ગ્રન્થો વિશેષે કરીને ગદ્યમા છે પદ્યમા પણ છૂટક છૂટક પ્રયત્નો થયા છે પણ સપૂર્ણ અષ્ટાધ્યાયી શ્લોકબદ્ધ થયાનો આ પ્રથમ પ્રસગ છે આ શ્લોકબદ્ધ રચનામાં હૈમલઘુપ્રક્રિયામા ગૂથાએલ સજ્ઞા પ્રકરણની શ્લોકબદ્ધ રચના બીજભૂત બની છે

(૨) આ ટીકા કાવ્યમયી છે-સરસ છે

વ્યાકરણનો વિષય શુષ્ક છે એટલે અન્ત પ્રવેશ ન થયો હોય ત્યાસુધી એનુ અધ્યયન ભારભૂત લાગતુ હોય છે વ્યાકરણને વ્યાધિ કરણ શબ્દથી સબોધવામા તેની શુષ્કતા પ્રધાનપણે નિમિત્તરૂપ બને છે આ ટીકામા એ શુષ્કતા દૂર કરવાનો શક્ય પ્રયત્ન કર્યો છે આ ટીકા શ્લોકબદ્ધ હોવા સાથે કાવ્યમય ઉદાહરણોથી સભર છે ઉદા હરણોમા તે તે સૂત્રોના ઉપયુક્ત પ્રયોગોના ઉપયોગપૂર્વક ધર્મશાસ્ત્ર, નીતિશાસ્ત્ર, શૃગારાદિ નવરસો, ઉપમાદિ અલકારો વૈદ્યક, જ્યોતિષ, આદિ ભિન્ન ભિન્ન અનેક હકીકતો હૃદયગમ રીતે સાકળી લીધી છે ને તે ઉદાહરણોમા કેટલાક તો એવા છે કે જેનો અર્થાન્તરન્યાસ રૂપે કહેવત રૂપે સુન્દર ઉપયોગ થઈ શકે છે અને તે કઠમાં રમી જાય છે આમ આ ટીકા કાવ્યમયી સરસ છે

(૩) આ ટીકા વ્યુત્પત્તિસાધિકા છે

વ્યાકરણશાસ્ત્રનુ જે અધ્યયન કરીને ગમે તેના વિદ્વાન થયા થયા હના વ્યવહારમાં તેનુ મૂલ્યાકન વિપરીત રીતે થાય છે કાર

વૈયાકરણિઓ ' પંડિત મૂર્ખ ' ગણાય છે સરલ શ્લોકોનુ પણ અર્થો-દ્ઘાટન કરવામા તેઓની મતિ મૂઝાઈ જાય છે એટલે વ્યાકરણના અધ્યયન બાદ તેને વ્યવહારક્ષમ બનાવવા માટે પંચકાવ્યાદિનુ અધ્યયન અનિવાર્ય છે આ ટીકામા વ્યાકરણના અધ્યયનની સાથે કાવ્યાદિનુ અધ્યયન અંશત થઇ જાય છે અધ્યાપક કુશલ હોય તો આ ટીકાનું અધ્યયન કરનારને એવો વ્યુત્પન્ન કરી દે કે તે સ્વય પંચકાવ્યને બેસારી-લગાવી શકે

(૪) આ ટીકા મધ્યમલઘુ છે

શ્રી સિદ્ધહેમચન્દ્ર શબ્દાનુશાસન ઉપર અન્યાન્ય ઘણી ટીકાઓ છે, પણ તેમા ઘણીખરી પ્રમાણમાં મોટી છે, તો કોઇ કોઈ પ્રમાણમા ખૂબ નાની છે. આ ટીકા એક સૂત્રપર એક અનુષ્ટુપ્શ્લોક પ્રમાણ હોવાને કારણે પ્રમાણમાં મધ્યમ છે જો કે એક જ શ્લોકમા કોઈ કોઇ ગભીર સૂત્રોના અર્થો ગૂથી લેવામા ક્લિષ્ટતા આવી ગઇ છે ટિપ્પણમાં એ ક્લિષ્ટતા દૂર કરી છે અધ્યાપક પણ સારી રીતે સમજાવાને સરલતા લાવી શકે છે સ્થળ વિશેષમા રહેલી ગભીરતા એ પણ બુદ્ધિ વૈશદ્યમા પ્રયોજનીભૂત બનીને ગુણ રૂપે પરિણમી શકે છે

(૫) આ ટીકા પરિપૂર્ણ છે.

શ્રી સિદ્ધહેમચન્દ્રશબ્દાનુશાસનપરની સ્વોપજ્ઞ વૃત્તિઓ બાદ કરતા અન્ય વૃત્તિઓ પ્રાય પ્રક્રિયાનુસારિણી છે એટલે તેમા બહુધા ઉપયુક્ત સૂત્રો સગૃહિત કરવામાં આવ્યા છે આ ટીકા અષ્ટાધ્યાયી ક્રમે છે એથી અષ્ટાધ્યાયી ક્રમથી વ્યુત્પત્તિ કેળવવામાં સહજ શ્રમ રહે છે, પણ એક પ્રકરણને લગતા સૂત્રો એક સાથે ક્રમબદ્ધ આવી જતાં હોવાથી તે તે વિષયની સરલતા પણ રહે છે આ ટીકા સર્વ સૂત્રો ઉપર હોવાથી પરિપૂર્ણ છે

આ ગ્રન્થમા સાથે સાથે ગણપાઠ, ધાતુપાઠ, અકારાદિક્રમ આદિ ઉપયુક્ત વિષયો આપવાનો વિચાર હતો પણ આ ગ્રન્થનુ અધ્યયન કરનાર કરાવનારને વ્યાકરણના તે તે પુસ્તકો પાસે રાખવા આવશ્યક છે એટલે તે તે પુસ્તકોમા ઉપરોક્ત વિષયો અનેકશ છપાએલા છે માટે આ ગ્રન્થમા તેનુ પુન પ્રકાશન કરવુ એ કદ માત્ર વધારવા જેવુ જણાયાથી આપેલ નથી

આ ગ્રન્થમાં પ્રકાશ છે એ પ્રમાણે શરતચૂકથી અન્ધકાર પણ હશે ? એ અન્ધકાર તરફ પક્ષપાત જેઓ સજ્જનમાં પોતાની ગણત્રી કરાવવા નથી ઇચ્છતા તેઓ જુદી રીતે રાખે છે અર્થાત્ તેઓ અન્ધકારને એમ એમ રાખીને અન્યોનુ તે તરફ લક્ષ્ય દોરે છે જ્યારે જેઓ સજ્જન છે તેઓને પણ અન્ધકાર તરફ પક્ષપાત હોય જ છે પણ તેઓ તે અન્ધકારને અજવાળીને રૂડો કરી બતાવે છે

આ ગ્રન્થ યથાર્થ બોધ ઉત્પન્ન કરવામા જેટલો ઉપયોગી બને તેટલુ શ્રેય છે — એજ

તા ૧૦–૪–૫૭ સવત્ – ૨૦૧૩ ચૈત્ર શુક્લૈકાદશી બુધવાર	પ. ધુરન્ધર વિજયગણી શ્રી અમૃતસૂરીશ્વરજી જ્ઞાનશાળા દોલતનગર, બોરીવલી (પૂર્વ)

ॐ ह्रीँ अर्हं नमः

सकललब्धिसम्पन्नाय श्रीगौतमस्वामिने नमः ॥

शब्दब्रह्मणे स्वस्ति ॥

॥ कलिकालसर्वज्ञश्रीहेमचन्द्रसूरिभ्यो नमः ॥

शासनसम्राट्श्रीनेमिसूरीश्वरसद्गुरुभ्यो नमः ॥

सिद्धहेमचन्द्र-शब्दानुशासनम्

(पद्यबन्धवृत्तिबन्धुरम्)

। प्रथमाध्याये प्रथमः पादः ।

अर्हं पदं नमस्कृत्य, सिद्धशब्दानुशासनम् ॥
विव्रियते मुदाऽस्माभिः, पद्यबन्धेन बन्धुरम् ॥१॥

अर्हं ॥ १ ॥ १ ॥ १ ॥

प्रणिध्येयं सदा ध्येय–मर्हमित्येतदक्षरम् ॥
यतश्च जायते सिद्धिः, शब्दशास्त्रे प्रवीणता ॥१॥

सिद्धिः स्याद्वादात् ॥१॥१॥२॥

स्याद्वादादेव संसिद्धिः, सर्वत्र सज्जनैर्मता ॥
तस्मात् स्याद्वादसम्राजं, सेवध्वं तं दिवानिशम् ॥ २ ॥

नत्वाऽर्हं पद्यबन्धाया, विवृत्या रुचिरार्थकम् ॥
करोमि विशदं शब्द–शास्त्रस्यात्र टिप्पणम् ॥ १ ॥

सदा ध्येयम् अर्हमित्येतदक्षरं प्रणिध्येयमित्यन्वयः । मङ्गलसूत्रमिदम् ॥ १ ॥ स्याद्वाद–अनेकान्तवादस्ततः, संसिद्धिः शब्दानां निष्पत्तिर्ज्ञप्तिश्च ॥२॥

लोकात् ॥१।१।३॥

न्याया वर्णसमाम्नायाः, शब्दप्रमाणवेदिनाम् ॥
अन्तिकादिह विज्ञेया, ज्ञप्तिर्लोकाद्धि लौकिकी ॥ ३ ॥

औदन्ताः स्वराः ॥१।१।४॥

साधुशब्दोपदेशाय, मतं शब्दानुशासनम् ॥
स्वतो विराजमानत्वात्, स्वराणामादिदेशनम् ॥ ४ ॥

एकद्वित्रिमात्रा ह्रस्वदीर्घप्लुताः ॥१।१।५॥

एकमात्रो द्विमात्रश्च, त्रिमात्रोऽपि यथाक्रमम् ॥
ह्रस्वो दीर्घः प्लुतो ज्ञेयः, स्वरेष्वेतद्विधीयते ॥ ५ ॥

अनवर्णा नामी ॥१।१।६॥

नामिसंज्ञा भजन्ते ते, स्वरा अवर्णवर्जिताः ॥
सति प्रयोजने साध्वी, वचनादेर्विभिन्नता ॥ ६ ॥

लृदन्ताः समानाः ॥१।१।७॥

लृकारान्ताः समानाः स्यु-रकाराद्या दशापि ते ॥
लृकारे दीर्घतासिद्धिः, शास्त्रयुक्त्या विभाविता ॥ ७ ॥

ए ऐ ओ औ सन्ध्यक्षरम् ॥१॥१॥८॥

स्वराणां सन्धिभावेन, स्वरा एते स्थितिं गताः ॥
तेन सन्ध्यक्षरत्वेन, ख्याता अन्वर्थसंज्ञकाः ॥ ८ ॥

अं अः अनुस्वार–विसर्गौ ॥१॥१॥९॥

अक्षरोपरि बिन्दुर्यः, स्यादनुस्वारसंज्ञकः ॥
अक्षरस्य पुरो बिन्दु–युग्मं विसर्गसंज्ञकम् ॥ ९ ॥

कादिर्व्यञ्जनम् ॥१॥१॥१०॥

ककाराद्या हकारान्ता, वर्णा व्यञ्जनसंज्ञकाः ॥
व्यज्यते स्वरयोगेना–र्थोऽत्रेति व्यञ्जनं मतम् ॥ १० ।

अपञ्चमान्तस्थो धुट् ॥१॥१॥११॥

स्युर्वर्गपञ्चमान्तस्था–वर्जाः सर्वेऽपि कादयः ॥
चतुर्विंशतिसङ्ख्याका, धुट्संज्ञा हैमलक्षणे ॥ ११ ॥

पञ्चको वर्गः ॥१॥१॥१२॥

पञ्चसंख्यामितो वर्णो, वर्गो वर्णेषु कादिषु ॥

अन्वर्थमनुसृत्याय प्रसिद्धत्वाच्च गुरुसंज्ञाऽत्र समाहृता ॥ अवर्णेवर्णयो रकारागमो, अवर्णवर्णयोर्नोकारौकारयोरुत्पत्तिरिति ॥८॥ अ अ इत्युभयत्राकार सुखोच्चारणार्थम । अनुस्वारो नासिक्य, विसर्ग कण्ठ्य ॥९॥ क ख ग घ ङ, च छ ज झ ञ, ट ठ ड ढ ण, त थ द ध न, प फ ब भ म, य र ल व, श ष स ह इति कादय । व्यञ्जनेतिसंज्ञाऽन्वर्था प्रसिद्धा च ॥१०॥ क ख ग घ, च छ ज झ, ट ठ ड ढ, त थ द ध, प फ ब भ, श ष स ह, इति धुट ॥११॥ क ख ग घ ङ–कवर्ग, च छ ज झ ञ–चवर्ग, ट ठ ड ढ ण–टवर्ग, त थ द ध न–तवर्ग प फ ब भ म–पवर्ग,

स्युर्वर्गाः कचटतपाः, पञ्चपञ्चाक्षरान्विताः ॥ १२ ॥

आद्यद्वितीयशषसा अघोषाः ॥१॥१॥१३॥

अघोषसंज्ञका वर्णा, आद्यद्वितीयसंयुताः ॥
वर्गाणां शषसा एवं, भवन्ति ते त्रयोदश ॥ १३ ॥

अन्यो घोषवान् ॥१॥१॥१४॥

अघोषेभ्योऽवशिष्टास्ते, गकाराद्याश्च विंशतिः ॥
घोषवन्त इह ज्ञेया, घोषप्रयत्नसंभवाः ॥ १४ ॥

यरलवा अन्तस्थाः ॥१॥१॥१५॥

अन्तस्थासंज्ञका एते, चत्वारो मध्यवर्तिनः ॥
वर्गोष्मणां तथा संज्ञा–शब्दोऽयं भुम्नि च स्त्रियाम् ॥१५॥

अं अः ≍ क ≍ प शषसाः शिट् ॥१॥१॥१६॥

अनुस्वारविसर्गौ च, जिह्वामूल उपेऽत्र्वः ॥
शषसा इत्यमी सप्त, शिट्संज्ञया निवेचिताः ॥ १६ ॥

तुल्यस्थानास्यप्रयत्नः स्वः ॥१॥१॥१७॥

स्यात् स्थानास्यप्रयत्नाभ्यां, तुल्यो वर्णः स्वसंज्ञकः ॥

कण्ठादिस्थानकान्यष्टौ, प्रयत्नश्चान्तरो मतः ॥ १७ ॥

स्यौजसमौशस्टाभ्यांभिस्ङेभ्यांभ्यस्ङसिभ्यांभ्यस् ङसोसांङ्योस्सुपां त्रयी त्रयी प्रथमादिः ॥१।१।१८॥

स्यादीनां प्रत्ययानां स्यात्, त्रयी त्रयी यथाक्रमम् ॥
प्रथमा च द्वितीयादि–रेवं षष्ठी च सप्तमी ॥ १८ ॥

स्त्यादिर्विभक्तिः ॥१।१।१९॥

विभक्तिसंज्ञका ज्ञेयाः, स्यादयश्च तिवादयः ॥
सुबन्ताः स्यादयोऽन्येच, स्यामहिप्रमिताः समे ॥ १९ ॥

तदन्तं पदम् ॥१।१।२०॥

स्यादित्यादिविभक्त्यन्तं, पदं स्यात् तन्नमोऽस्तु ते ॥
वीतराग ? सदा पाया–दपायाद्वो भवोद्भवात् ॥ २० ॥

नाम सिदय्व्यञ्जने ॥१।१।२१॥

सित्प्रत्यये परे ज्ञेयं, नामापि पदसंज्ञकम् ॥
एवमेव यवर्ज्जे स्याद्, व्यञ्जनादौ च प्रत्यये ॥ २१ ॥

इति स्थानान्यष्टौ । अवर्ण–कवर्ग–हकार–विसर्गा कण्ठ्या । इवर्ण–चवर्ग–यकार–शकारास्तालव्या । ऋवर्ण–टवर्ग–रकार–षकारा मूर्द्धन्या । लृवर्ण–तवर्ग–लकार–सकारा दन्त्या । उवर्ण–पवर्गोपध्मानीया ओष्ठ्या ॥१७॥ प्रथमा–द्वितीया–तृतीया–चतुर्थी–पञ्चमी–षष्ठी–सप्तमीति प्रथमादि ॥१८॥ स्यादयो नामप्रयोज्या विभक्तय, तिबादयो धातुप्रयोज्या विभक्तय इति विवेक ॥१९॥ नमोऽस्तु ते त्वत्पुनातनम् । हे वीतराग ? ते–तुभ्य नम अस्तु, (त्व) भवोद्भवात्–संसारजनितात्, अपायात्–आपत्तित सदा पायात्–रक्षतात् इत्यर्थ ॥२०॥सिति–भवदीये, यवर्जे व्यञ्जनादौ–प्रत्यये, यकारवर्जनात् वाच्यतीत्यत्र गत्वाभाव ॥२१॥

नं क्ये ॥१॥१॥२२॥

नकारान्त पदं प्राहु–र्नाम क्ये प्रत्यये परे ॥
क्यन्–क्यङ्–क्यङ्षः क्यशब्देन, ग्राह्याःशब्दानुशासने ॥२२॥

न स्तं मत्वर्थे ॥१॥१॥२३॥

सकारान्तं तकारान्तं, नाम मत्वर्थप्रत्यये ॥
पदं न तेन वर्चस्वि–तडित्वत्प्रमुखं भवेत् ॥ २३ ॥

मनुर्नभोऽङ्गिरोवति ॥१॥१॥२४॥

मनुर्नभोऽङ्गिरो नैव, पदं वत्प्रत्यये परे ॥
मनुष्वच्च नभस्वच्च, स्यादङ्गिरस्वदित्यपि ॥ २४ ॥

वृत्त्यन्तोऽसषे ॥१॥१॥२५॥

समासाद्यवसानं हि, न भवेत् पदसञ्ज्ञकम् ॥
सस्य षत्वे विधातव्ये, भवेदच विनिश्चितम् ॥ २५ ॥

सविशेषणमाख्यातं वाक्यम् ॥१॥१॥२६॥

सविशेषणमाख्यातं, सम्भवेद्वाक्यसञ्ज्ञकम् ॥
उभयत्र प्रयोगे वा, धर्मो रक्षतु वः सदा ॥ २६ ॥

अधातुविभक्तिवाक्यमर्थवन्नाम ॥१॥१॥२७॥

धातुविभक्तिवाक्येभ्यो, भिन्नमर्थयुत च यत ॥

शब्दरूपं भवेन्नाम, वृक्षः प्लक्षः सुधीः प्रधि ॥२७॥

शिर्घुट् ॥१॥१॥२८॥

जश्शसादेशरूपः शि–र्घुट्संज्ञः स्यान्नपुंसके ॥
पद्मानि सन्ति तानि त्वं, विलोकस्व सुलोचन? ॥२८॥

पुंस्त्रियोः स्यमौजस् ॥१॥१॥२९॥

स्यमौजसो भवेयुर्घुट्–संज्ञकाः पुंसि च स्त्रियाम् ॥
राजानो ददते सौख्यं, सत्यसीमानमाश्रिताः ॥ २९ ॥

स्वरादयोऽव्ययम् ॥१॥१॥३०॥

स्वरन्तःप्रातरित्यादि, स्वरादयोऽव्ययाभिधाः ॥
भूर्भुवःस्वस्त्रयीशान–मार्हन्त्यं प्रणिदध्महे ॥ ३० ॥

चादयोऽसत्वे ॥१॥१॥३१॥

चादयोऽव्ययसंज्ञाः स्यु–र्द्रव्यार्थे चेन्न ते तथा ॥
ऋषभश्चाजितं वन्दे, नूनं वन्द्या जिनेश्वराः ॥ ३१ ॥

अधण्तस्वाद्याः शसः ॥१॥१॥३२॥

तस्वादयः शसन्ता ये, धणवर्ज्जा अत्र प्रत्ययाः ॥
तदन्तमव्ययं नाम, देवा अर्जुनतोऽभवन् ॥ ३२ ॥

वृक्षान्–साधु धर्म व्रत–इत्यादौ नाति प्रमदः ॥२७॥ हे सुलोचन? पद्मानि सन्ति, त्वं तानि विलोकस्वेत्यन्वयः ॥२८॥ सत्यसीमानमाश्रिता राजानः सौख्यं ददत इत्यन्वयः ॥२९॥ अव्ययाभिधा —अव्ययसंज्ञा, भूर्भुवःस्वरिति क्रमेण पातालमर्त्यस्वर्गत्रयीशानमर्हन्तम् ॥३०॥ द्रव्यार्थेऽव्ययसंज्ञा नेत्यर्थः ॥३१॥ धणर्जुनात् पवित्रयानि ॥३२॥

विभक्तिथमन्ततसाद्याभाः ॥१॥१॥३३॥

विभक्तिप्रतिरूपाश्च, तसादितः थमन्तकाः ॥
प्रत्यया ये तदन्ताभा, अव्ययानि कथ कुतः ॥ ३३ ॥

वत्तस्याम् ॥१॥१॥३४॥

वत्तस्याप्रत्ययान्तं स्या-दव्ययं मुनिवच्चरेत् ॥
उरस्तः क्षीरमापीय, पीन उच्चैस्तरा शिशुः ॥ ३४ ॥

क्त्वातुमम् ॥१॥१॥३५॥

अव्ययं संभवेत् क्त्वान्तं, तुमन्तामन्तके अपि ॥
कृत्वा कर्तुं हितं धर्मं, यावज्जीव सुख वसेत ॥ ३५ ॥

गतिः ॥१॥१॥३६॥

अव्यय गतिसज्ञ स्या-दद:कृत्यान्यदाचरेत ॥
'अतः कृकमि,' (२-३-५) सूत्रेण, स्य मत्वं भवेन्नहि ॥३६॥

अप्रयोगीत् ॥१॥१॥३७॥

वर्णस्तत्समुदायो वा, शास्त्रे स्यान्न प्रयोगके ॥
इत्संज्ञकः स विज्ञेय, एधते यजते जन ॥ ३७ ॥

अनन्त· पञ्चम्या· प्रत्यय· ॥१॥१॥३८॥

पञ्चम्यर्थाद्विहितोऽन्त-शब्दानिर्दिष्टरूपक· ॥

प्रत्ययः स्याद्यथा 'नाम्नः, प्रथमे' (२-२-३१) त्यादि-
प्रत्ययाः ॥ ३८ ॥

डत्यतु संख्यावत् ॥१॥१॥३९॥

अत्वन्तं चापि डत्यन्तं, सङ्ख्याकार्यं भजेत् सदा ॥
कतिकश्चैव यावत्कः, संख्यावद्रूपभाग्भवेत् ॥ ३९ ॥

वहुगणं भेदे ॥१॥१॥४०॥

शव्दौ वहुगणौ भेद-वृत्ती सङ्ख्यावदामतौ ॥
वहुको गणको भेदे, वैपुल्ये सङ्घके न चेत् ॥ ४० ॥

कसमासेऽध्यर्द्धः ॥१॥१॥४१॥

के प्रत्यये समासे चा-ध्यर्द्धः सङ्ख्यावदामतः॥
स्यादध्यर्द्धकमध्यर्द्ध-शूर्पं कर्पूरनिर्मलम् ॥ ४१ ॥

अर्धपूर्वपदः पूरणः ॥१॥१॥४२॥

पूरणप्रत्ययान्तोऽर्ध-पूर्वपदः कप्रत्यये ॥
स्यात् समासे च सङ्ख्यावत्, अर्धपञ्चमकं स्वकम् ॥४२॥

॥ प्रथमः पादः ॥

नर्ति, आगमादिनं ॥३८॥ सप्टम् ॥३९॥ वैपुल्यार्थ वहुशब्द, सङ्घार्थो गणद ॥४०॥ अध्यर्द्धशब्द के प्रत्यये समासे च सङ्ख्यावद् आमत ॥४१॥ स्वक स्व धनमितियावत् ॥४२॥

॥ प्रथम पाद ॥

॥ अथ द्वितीयः पादः ॥

समानानां तेन दीर्घः ॥१॥२॥१॥

समानाना समानेन, परेण सह दीर्घता ॥
जिनाधीश नमस्कृत्य, श्रीशोभा मधूदक ? ॥ १

ऋलृति ह्रस्वो वा ॥१॥२॥२॥

ऋति लृति परे ह्रस्वः, समानाना विभाषया ॥
बालऋश्यश्च बालर्श्यो, होतॢलकारकादयः ॥ २

लृत ऋलृ ऋलृभ्यांवा ॥१॥२॥३॥

लृत ऋता लृता सार्धं, ऋलृभ्याना विभाषया ॥
लृकारोऽपि ऋकारः, होतॢन होतृदेवगादयः ॥ ३

ऋतो वा तौ च ॥१॥२॥४॥

ऋलृभ्याम् तत ऋलृ वा, ऋलृभ्यानामथापि वा ॥
पितृपभ ऋकपभ, पितॢलृचाक पितृपभः ॥४॥

ॠस्तयोः ॥१॥२।५॥

लृकारस्य ऋकारस्य ऋलृभ्यां सह ॠर्भवेत् ॥
ॠषभो जयताद्विश्वे, होतॄकारकलाकरः ॥५॥

अवर्णस्येवर्णादिनैदोदरल् ॥१॥२॥६॥

अवर्णस्य स्युरेदोदर्, अल् इ-उ-ऋ-लृवर्णकैः ॥
प्रेक्षतेऽसौ नवोढा तं, वाल्पिं सल्लुदञ्चितम् ॥६॥

ऋणे प्रदशार्णवसनकम्बलवत्सरवत्सतरस्यार्॥१॥२॥७॥

आर् प्रादीनामवर्णस्य, ऋता सह ऋणे परे ॥
प्रार्णं दशार्णमित्यादि, वत्सतरार्णमादिशेत् ॥७॥

ऋते तृतीयासमासे ॥१॥२॥८॥

आर् तृतीयासमासे स्यादवर्णस्य ऋते परे ॥
शीतार्तः पटमादत्त दुःखेनर्तश्च सान्त्वनम् ॥८॥

ऋत्यारुपसर्गस्य ॥१॥२॥९॥

अवर्णस्योपसर्गस्य, धातोः ऋता सहाऽऽर्भवेत् ॥
प्रार्चति भगवन्तं यः क्वापि नैव स प्रार्च्छति ॥९॥

ॠषभ इत्यत्र लृ-ऋषभ इति सन्धिविश्लेषः, होतॄकार इत्यत्र होतृ-लृकार इति सन्धिविश्लेषः ॥ [illegible] ॥५॥ असौ नवोढा सल्लुदञ्चित न वाल्पिं प्रेक्षते। लता [illegible] न चासौ उदञ्चित सल्लुदञ्चितस्तम् ॥६॥ [illegible] ॥७॥ अन्यपि समासे चेत्तृतीया-समासो न [illegible], यथा [illegible], समासाभावेऽप्यार् न यथा दुःखेनर्तः ॥८॥ [illegible] प्रार्चति-[illegible] पूजयति स [illegible] प्रार्च्छति-प्रभुयतीत्यर्थे [illegible] ॥९॥

नाम्नि वा ॥१॥२॥१०॥

ऋदादौ नामधातौ स्या-दार् विकल्पेन पूर्ववत् ॥
प्रार्षभीयति वत्सोऽत्र, ककुभान् प्रर्षभीयति ॥१०॥

लृत्याल्वा ॥१॥२॥११॥

नामधातौ लृकारादौ, विकल्पेनाल् लृता सह ॥
उपाल्कारीयति ग्रामं, उपल्कारीयति स्वरः ॥११॥

ऐदौत् सन्ध्यक्षरैः ॥१॥२॥१२॥

सन्ध्यक्षरैरवर्णस्य, ऐ औ स्यातां यथाक्रमम् ॥
सेवास्ति निर्मलैश्चर्यो दिक्, सूर्यौजो यत्र प्रौन्नतम् ॥१२॥

ऊटा ॥१॥२॥१३॥

अवर्णस्य भवेत् सार्धम्, ऊटा परेण औ, सदा ॥
परित्याय पटं धौत, जिनमर्चेतु धौतवान् ॥ १३ ॥

प्रस्यैषैष्योढोढ्यूहे स्वरेण ॥१॥२॥१४॥

अवर्णस्य परेणैषा- दिषु ऐ औ नियामिनौ ॥
प्रैषः प्रैष्यः प्रभोस्तेऽत्र, स्व प्रौढप्रौढिवारकः ॥१४॥

स्वैरस्वैर्यक्षौहिण्याम् ॥१॥२॥१५॥

स्वैरादिषु ह्यवर्णस्य, ऐ औ स्यातां स्वरेण तत् ॥
स्वैरं स्वैरी प्रयातीय-मक्षौहिणी कुरुस्थलम् ॥ १५ ॥

अनियोगे लुगेवे ॥१॥२॥१६॥

अनियोगे त्ववर्णस्य, एवे परे लुगीरितः ॥
इहेवास्व नियोगो न, इहैवास्व नियन्त्रितः ॥ १६ ॥

वौष्ठौतौ समासे ॥१॥२॥१७॥

लुग् अवर्णस्य ओष्ठौत्वोः, समासे स्याद्विभाषया ॥
स्पर्धते सुष्ठु बिम्बोष्ठी, बिम्बौष्ठयौष्ठेन तुल्यया ॥१७॥

ओमाङि ॥१॥२॥१८॥

ओमाङादेशपरयो -रवर्णस्य तु लुग् भवेत् ॥
सोम् जंजपति जायऽसा-वद्यैवोढापि धार्मिकी ॥१८॥

इयं स्वैरी अक्षौहिणी स्वैरं कुरुस्थलं प्रयाति इत्यन्वयः । स्वैरी-स्वच्छन्दचारिणी, अदन्तस्वैरशब्दाद् गौरादित्वाद् ङी । एगो हत्थी एगो य रहगो तिन्नि चेव य तुरगा ॥ पचेव य पाइक्का, एसा पत्ती मुणेयव्वा ॥१॥ पत्ती सेणा सेणा-मुह च गुम्म च वाहिणी चेव ॥ पियणा चमू अणिगिणी, दसगुणिआ अक्खोहिणी होइ ॥२॥ इति वचनादेतस्यामक्षौहिण्यां गजानां रथानाम् काटिदशकमश्वानां त्रिंशत्कोटि पदातीनाञ्च पञ्चाशत्कोटिर्भवति ॥१५॥ इहेवास्व-अत्र तिष्ठान्यत्रवेति नियन्त्रण न, परम् इहैवास्वेत्यत्र नियन्त्रणमस्ति, अत्रैव तिष्ठ नान्यत्रेति ॥१६॥ ओष्ठेन तुल्यया बिम्बौष्ठया बिम्बोष्ठी सुष्ठु स्पर्धते इत्यन्वयः ॥ बिम्बौष्ठ्या-ओष्ठेन इत्यत्र समासाभावान्न भवत्यकारलोपः ॥१७॥ अद्य एव आ ऊढा ऽपि साऽसौ धार्मिकी जाया ओम् जंजपीति इत्यन्वयः । सा+ओम्=सोम् , एव+आ+ऊढा=एवोढा इति विश्लेषः

उपसर्गस्यानिणेधेदोति ॥१॥२॥१९॥

धातोरेदोत्युपसर्गा--वर्णस्य लुगिणेधि न ॥
प्रेलयन्ति यथाकाम, प्रोपत्युपैति प्रेधते ॥ १९ ॥

वा नाम्नि ॥१॥२॥२०॥

नामधातौ विकल्पेन लुगवर्णस्य पूर्ववत् ॥
उपेकीयति वेदान्त, मन्त्रोऽस्य प्रोपधीयति ॥ २० ॥

इवर्णादेरस्वे स्वरे यवरलम् ॥१॥२॥२१॥

स्युः-इ-उ-ऋ-लृवर्णाना, यथासङ्ख्यं स्वरे परे ॥
अस्वे यवरलास्तेन, त्रिति लिति समादिशेत् ॥ २१ ॥

ह्रस्वोऽपदे वा ॥१॥२॥२२॥

इवर्णादेः स्वरेऽस्वे वा ह्रस्वो भिन्नपदे भवेत ॥
नदि एषा च नद्येषा, नद्यौ नद्यर्थमागते ॥ २२ ॥

गोर्नाम्न्यवोऽक्षे ॥१॥२॥२८॥

पदान्तस्थस्य गोरेतः; परेऽक्षे नाम्न्यवो भवेत् ॥
साय स्थित्वा गवाक्षेऽसौ वाला गोऽक्षाणिप्रेक्षते ॥२८॥

स्वरे वाऽनक्षे ॥१॥२॥२९॥

गोरोतः स्यान् पदान्तस्या–नक्षे वाऽवः स्वरे परे ॥
गवेशोऽपि गवीशःस्या,–दृगोऽक्षस्थितिकभाग्यतः ॥२९॥

इन्द्रे ॥१॥२॥३०॥

पदान्तस्थस्य गोरोत, इन्द्रस्थेऽवः स्वरे परे ॥
गवेन्द्रे खलु गोपाले, गोविलासो गृहे गृहे ॥ ३० ॥

वात्यसन्धिः ॥१॥२॥३१॥

गोरोतः स्यात् पदान्तस्या–त्यसन्धिर्नु विभापया ॥
गोअग्र वा गवाग्रं वा, गोऽग्रं वेति गवेङ्गितम् ॥३१॥

प्लुतोऽनितौ ॥१॥२॥३२॥

स्वरे परे प्लुतः सन्धि भजेन्नेतौ तु सम्भजेत् ॥

असौ वाला सायसमये गवाक्षे–वातायने स्थित्वा गोऽक्षाणि–गवामिन्द्रियानि अवयवरूपाणि, गोशकटानि वा प्रेक्षते । गोऽक्षाणीत्यत्र नामाभावान्नावादेशः ॥२८॥ गोऽक्ष स्थितिकभाग्यत –गोशटकस्थितिकरणादृष्टाद् गवेश –भूपतिरपि गवीश –गोपाल स्यात् , यद्वा गोऽक्षेत्यस्य पृथ्वीचक्रसञ्चालनरूपस्थितिकरणसुकृनत , गवेश –गोपालकाऽपि गवीश –पृथ्वीपति स्यादिति । अक्षवर्जनाद् गोऽक्षेत्यत्रावाभाव· ॥२९॥ गेवेन्द्रे –भूपतौ, गोपाले–पृथ्वीपरिपालनकर्म कर्मठे सति खलु–निश्चयेन गोविलास.–स्वर्गसदृशविलास., गृहे गृहे प्रतिगृह भवतीति भाव. ॥३०॥ अतीतिकम् [२] गवेङ्गितम् ॥३१॥ हे देवदत्त ३ इह नु आस्से–

देवदत्त ३ इहान्वास्से, सुश्लोकेतिकथां कुरु ॥३२॥

इ ३ वा ॥१॥२॥३३॥

इस्थानश्चेत् प्लुतोऽसन्धि, प्राप्नोति वा स्वरे परे ॥
लुनीहि ३ इति धान्यार्था, लुनीहीति प्रचक्षते ॥३३॥

ईदूदेद् द्विवचनम् ॥१॥२॥३४॥

द्विवचनान्तमीदूदे-दसन्धिभाग् स्वरे परे ॥
मुनी इह सदा साधू, ईक्षेते आत्मनो हितम् ॥३४॥

अदो मुमी ॥१॥२॥३५॥

अदःसत्कौ मुमी स्याता-मसन्धी तौ स्वरे परे ॥
प्राप्ता अमुमुईचाऽमी, अश्वा लक्षणलक्षिताः ॥३५॥

चादिः स्वरोऽनाङ् ॥१॥२॥३६॥

चादि स्वरो न सन्धिभाग्, आङ्विमुक्तः स्वरे परे ॥
अ अपेहि इ इन्द्रोऽयम्, उ उत्तिष्ठेहि सज्जन ! ॥३६॥

ओदन्तः ॥१॥२॥३७॥

स्वरे परे चकारादि-रोदन्तो नैव सन्धिभाग् ॥
अहो अत्र महाश्चर्यं, गीतं गायन्ति गर्दभाः ॥३७॥

आसि, हे सुश्लोक ३ इतिसम्बन्धिनीं कथां कुरु। इतिवर्जनात् सुश्लोकेति-सन्धि सञ्जात ॥३२॥ धान्यार्था—धान्यवना., कृषीवला:, लुनीहि ३ इति, लुनीहीति प्रचक्षत—भाषन्ते ॥३३॥ इह द्वौ साधू—समीचीनौ मुनी सदा आत्मनो हितम् ईक्षेते इत्यन्वयः ॥३४॥ अमुमुईचाऽनेन जनेन अमी लक्षणलक्षिता अश्वा प्राप्ता इति ॥३५॥ अ! अपेहि, इ! अयम् इन्द्र, उ! उत्तिष्ठ हे सज्जन! एहि। आ-इहि-एहि अत्र सूत्रेऽनाङित्यस्याभाव ॥३६॥ अहो! अत्र गर्दभा गीतं गायन्ति, तत् महाश्चर्यम् ॥३७॥

सौ नवेतौ ॥१॥२॥३८॥

स्यात् सिनिमित्त ओदन्तो-ऽसन्धिरितौ विभाषया ॥
पटो इति वदेद्विज्ञः, पटविति तु प्राकृतः ॥३८॥

ऊँ चोञ् ॥१॥२॥३९॥

उञ् चादिरितौ स्याद्वा-ऽसन्धिस्तत्र तु ऊँ इति ॥
दीर्घोऽनुनासिको वा स्यात्, उइति विति ऊँ इति ॥३९॥

अञ्वर्गात् स्वरे वोऽसन् ॥१॥२॥४०॥

अवर्जवर्गतो वो वा, उञ् स्वरेऽसन् सचाभवेत् ॥
क्रुङ्ङ्वास्ते क्रुङ्ङ आस्ते वा-ऽसत्त्वाद् द्वित्वमुदाहृतम् ॥४०॥

अ-इ-उ वर्णस्यान्तेऽनुनासिकोऽनीदादेः ॥१॥२॥४१॥

अन्तेऽनीदादिवर्णानां, वैतेषामनुनासिकः ॥
सामँ साम कुमारीं वा कुमारी किं गिरी अमी ॥४१॥

॥ द्वितीयः पादः समाप्तः ॥

विज्ञ —सन्धिविद्विशारद. पटो इति वदेत्, प्राकृत.—सामान्यसन्धिज्ञ तु ‘पटवति’ वदेदित्यर्थ ॥३८॥ उञ् इत्यत्र ञ् इत्संज्ञक. ॥३९॥ द्वित्व ङकारस्य ‘ह्रस्वाद् ङणनो द्वे । १ । ३ । २७ । इत्यनेन, चेद् वकारोऽसन् न स्यात्तदा द्वित्वमपि नस्यादिति ॥४०॥ एतेषाम् अ-इ-उवर्णानाम् । अनीदादीति-‘ईदूदेद्द्विवचनम्’ । १ । २ । ३४ । इति सूत्रसम्बन्धि न इदादय ॥४१॥

॥ इति द्वितीय पाद ॥

॥ अथ तृतीयः पादः ॥

तृतीयस्य पञ्चमे ॥१॥३॥१॥

तृतीयस्य पदान्तस्य, पञ्चमे वाऽनुनासिकः ॥
ककुम्मण्डलमादित्यो-दये त्विड्मञ्जुमञ्जुलम् ॥१॥

प्रत्यये च ॥१॥३॥२॥

प्रत्यये पञ्चमे नित्यं, तृतीयस्यानुनासिकः ॥
षण्णां दर्शनमुख्याना, वाङ्मयं विश्वभूषणम् ॥२॥

ततो हश्चतुर्थः ॥१॥३॥३॥

पदान्तस्थात् तृतीयाद् ह-श्चतुर्थः पूर्ववर्गकः ॥
विकल्पेन स वाग्घीनो, वाग्ह्रीनकुलदीपकः ॥३॥

प्रथमादधुटि शश्छः ॥१॥३॥४॥

पदान्तप्रथमात् शस्या-धुटि स्याच्छो विभाषया ॥
वाक्छूरैः सह वाक्शूर-स्त्रिष्टुप् श्च्योतति वाक्छूतः॥४॥

रः कखपफयोः ≍ क ≍ पौ ॥१॥३॥५॥

कखे पफे यथासङ्ख्यं, ≍ क ≍ पौ वा स्तः पदान्तरः ॥

आदित्योदये सति ककुम्मण्डल-दिक्चक्रं त्विड्मञ्जुमञ्जुल-प्रभाभारभासुरमत्यन्तसुन्दरं भवतीति ॥१॥ आर्हत-साङ्ख्य-न्याय-वेदान्त-सौगत-चार्वाकेतिदर्शनषट्कम् ॥२॥ पूर्ववर्गकः-पूर्वं तृतीयाक्षरं तस्य यो वर्गस्तद्वर्गीय इत्यर्थः ॥३॥ वाक्शूरैः सह यदा वाक्छूत वाक्शूरो मिलति तदा त्रिष्टुप्-एकादशाक्षर-पादात्मिका छन्दोजाति श्च्योतति-क्षरतीत्यर्थः । अधुटीति किं-त्रिष्टुप्श्च्योतति ॥४॥ पदान्तरः-पदान्तस्थस्य रस्येत्यर्थः । कृष्ण. क ≍ खगे-पक्षिणा मध्ये धूर्त.

कः कृष्णः कः खगे धूर्त—ः पिकपः फल्गुनीप्रियः ॥५॥

शपसे शषसं वा ॥१॥३॥६॥

पदान्तरो यथासङ्ख्यं, शपसे शषसाश्च वा ॥
कश्शेते कष्ष आः कस्सन्, यः शीतः षण्मुखः सुधीः॥६॥

चटते सद्वितीये ॥१॥३॥७॥

चटते सद्वितीये स्युः, शषसा रस्य नित्यशः ॥
कश्छश्च कष्ट इत्युक्ते, जडष्ठस्तस्थ इत्यवक् ॥७॥

नोऽप्रशानोऽनुस्वारानुनासिकौ च पूर्वस्याधुट्परे॥१॥३॥८

शषसा नोऽप्रशानोऽधुट्—परेषु चटतेषु च ॥
सद्वितीयेषु पूर्वस्य, ह्यनुस्वारानुनासिकौ ॥८॥

पुमोऽशिट्यघोषेऽख्यागि रः ॥१॥३॥९॥

पुमो रोऽन्तः स्मृतोऽघोषे-ऽधुटि शिट्ख्यागविवर्जिते ॥

क ? पिकप.—कोकिलबाल परिपालक क ? इति प्रश्नत्रयमुत्तरन्तु फल्गुनीप्रिय — काक इति ॥५॥ शेते क ? प क ? सन् क ? इति प्रश्नत्रय तदुत्तराणि क्रमश य शीत॰ जडः स शेते, षण्मुख॰—पः, सुधी —सन् इति ॥६॥ छ॰ क॰ ? पुन ट क इति उक्ते—पृष्टे सति, जड.—मूर्ख. ठ॰, त , थ , इति अवक्—उक्तवानित्यर्थ ॥७॥ न.—नकारस्य । उदाहरणार्थमयमपर. श्लोक॰— 'बालाश्चुम्बति बालाऽसौ, रम्याँश्चिबुककोमलान् ॥ ताश्छेकाँश्छत्रपत्राभा—ष्टं टं शब्दाँष्टिटेप सा ' ॥ असौ बाला चिबुककोमलान् रम्यान् बालान् चुम्बति, पुन॰ छेकान् छत्रपत्राभान् ट ट शब्दान्—टटमिति शब्द कुर्वत॰ तान् सा टिटेप—नुनोद इत्यन्वय । प्रशाश्चरः, भवान्त्सरुक॰ इत्याद्युदाहरण प्रशान्-वर्जनाधुट्परत्वकथनफलतया बोध्यम् ॥८॥ 'पुम्' इति पुस॰ सयोगलु-प्त्यनुकरणम् । अशिटीति—पुशिर , अघोप इति पुदास॰, अख्यागीति—पुख्यातः,

अनुस्वारानुनासिक्ये, पूर्वं पुंश्चलपुँश्चली ॥९॥

नॄनः पेषु वा ॥१॥३॥१०॥

नॄन्शसन्तस्य रोऽन्तः स्यात्, पकारे वानुनासिकः ॥
अनुस्वारश्च पूर्वस्य, नॄं ⨯ पश्य नॄँ प्रपालय ॥१०॥

द्विः कानः कानि सः ॥१॥३॥११॥

शसन्तस्य किमः कानो, द्विरुक्तौ कान्परे भवेत् ॥
सान्तादेशः क्रमेण प्रा—गनुस्वारानुनासिकौ ॥११॥

स्सटि समः ॥१॥३॥१२॥

समः स्सटि परे सः प्रा-गनुस्वारानुनासिकौ ॥
आत्मसँस्स्करणं सम्य-गन्यसँस्स्करणेन किम् ? ॥१२॥

लुक् ॥१॥३॥१३॥

स्सटि परे समो लुक् स्यात्, पृथक्करणान्निवर्तते ॥
पूर्वस्य तद्द्वयं ज्ञानं, संस्कर्तुं यत्नमाचर ॥१३॥

तौ मुमो व्यञ्जने स्वौ ॥१॥३॥१४॥

पदान्तमोऽपदान्तस्य, म्वागमस्य च व्यञ्जने ॥
पूर्वं भवेदनुस्वार—स्तथैव स्यानुनासिकः ॥१४॥

पुंश्चर इति-पुंश्चार.। पुंश्चपुंश्चलीति षष्ठीतत्पुरुष. समास. ॥९॥ सन्धिनिरूपणानितोऽस्य स्थप्रत्य सन्धिपथदर्शीत उन्नेय ॥१०॥ कास्कान्, काःकानित्युदाहरणम् । कान् कान् पश्यतीत्यादौ द्वित्वाभावान्न सूत्रप्राप्तिः ॥११॥ किम् ? कार् नन न स्मिपीत्यर्थं । स्सटीति-सस्कृति ॥१२॥ पूर्वस्मिन्-तद्द्वयमनुस्वारानुनासिकाविति ॥१३॥ चकम्यते, चङ्कम्यत इत्याद्युदाहरण सम्भूयात् ॥१४॥

मनयवलपरे हे ॥१॥३॥१५॥

मनयवलसंयुक्ते, हे परे मोऽनुनासिकः ॥
स्वोऽनुस्वारः पदान्ते कि-ह्नुते भवति किन् ह्नुते ॥१५॥

सम्राट् ॥१॥३॥१६॥

क्विबन्तराजतौ मस्य, समोऽनुस्वारता नहि ॥
भरतो भारते सम्राट्, साम्राज्यं येन शासितम् ॥१६॥

ङ्णोः कटावन्तौ शिटि नवा ॥१॥३॥१७॥

शिटि परे यथासङ्ख्यं, पदान्तङणकारयोः ॥
कटावन्तौ भवेतां वा, प्राङ्क्शयः प्राङ्शयः सुखी ॥१७॥

ङ्नः सः त्सोऽश्चः ॥१॥३॥१८॥

पदान्तस्थाङ्काराच, नकारात्सस्य त्सो भवेत् ॥
विकल्पेन न चेत् श्चस्थ; षट्त्सेवां त्यजन्त्समः ॥१८॥

नः शि ञ्च् ॥१॥३॥१९॥

पदान्तस्थनकारस्य, वाञ्चादेश श्चवर्जिते ॥
शकारेऽस्तु भवाञ्च् शूरो, भवान् शूरः शिवङ्गमी ॥१९॥

स्व इति पूर्वानुनासिकेनान्वेय, तत्र स्वत्व मादिना सम समवसेयमिति ॥१५॥ भरत –श्रीआदिजिनात्मज प्रथमश्चक्रवर्ती ॥१६॥ प्राङ् इति नपुसकप्राच्–शब्दस्य द्वितीयैकवचन, तेन पूर्वस्थान प्रति शय शयनकर्ता सुखी स्यादिति ॥१७॥ षण्णा–काम–क्रोध–लोभ–मोह–मद–मात्सर्याणा, सेवा षट्सेवा ताम् , त्यजन् सम –[illegible]ासमन्वितो भवतीति शेष । अश्च इति षट्स्न्योतन्ति ॥१८॥ पदान्तन श[illegible]रे स्यात् , ञ्चादेशो वा श्चवर्जिते ॥ भवाञ्च् शूरो भवाञ्शूरो, भवमभिभवेद्भवान् ' (पाठा) शिवङ्गमी चेद् भवाञ्च् शूरो भवान् शूरोऽस्तु भवतु ॥ १९ ॥

अतोऽति रोरुः ॥१॥३॥२०॥

अतः परं पदान्तस्य, रोरुः स्यादति नित्यशः ॥
श्रेयोऽर्थी सेवते श्रेयः, प्रेयोऽर्थी प्रेयसीं सदा ॥२०॥

घोषवति ॥१॥३॥२१॥

पदान्तेऽतः परं रोः स्या—दुकारो घोषवत्परे ॥
रक्षतादनिशं धर्मं, धर्मो रक्षति रक्षितः ॥२१॥

अवर्ण–भो–भगो–अघोर्लुगसन्धिः ॥१॥३॥२२॥

अवर्णाद् भोभगोऽघोभ्यः, पदान्ते लुक् च रोर्भवेत् ॥
घोषवति ततोऽसन्धिः, श्रमणा यान्तु मङ्गलम् ॥२२॥

व्योः ॥१॥३॥२३॥

अतः परं पदान्तस्थ—व्योर्लुक् स्यात् घोषवत्परे ॥
स चासन्धिश्च वृक्षव् त्वं, वृक्ष गच्छति काननम् ॥२३॥

स्वरे वा ॥१॥३॥२४॥

अवर्णभोभगोऽघोभ्यः, स्याद् व्योर्लुग्वा स्वरे परे ॥
पदान्तयोः सचासन्धिः, देवा आयान्ति मन्दरम् ॥२४॥

रुरिति उकारानुबन्धस्य रस्य षष्ठ्येकवचने, पुनरत्रेत्यादावुत्वाभावः। अति–अकारे परे इति ॥२०॥ पदान्ते वर्तमानस्येति शेषः, अतः परम्–अकारात् परस्येत्यर्थः। उत्वसूत्रापवादकमिदं सूत्रम् ॥२१॥ असन्धिरित्युत्तरार्थम् ॥२२॥ वृक्ष इवाचरति क्विप्, वृक्षमाचष्टे इति णौ अन्त्यस्वरादिलोपे वृक्षयतीति क्विपि सिद्धं वृक्षव्। वृक्षव् वनिन्वित घोषवत्परत्वाभावाद् वा लुगभावः ॥२३॥ मन्दरम्—[illegible] पर्वतमिति ॥ २४ ॥

अस्पष्टाववर्णात्त्वनुञि वा ॥१॥३॥२५॥

ईषत्स्पृष्टतरौ स्याता, वयादेशौ स्वरे परे ॥
पदान्ते भोभगोऽघोभ्य-श्चावर्णात्तौ तु वानुञि ॥२५॥

रोर्यः ॥१॥३॥२६॥

अवर्णभोभगोऽघोभ्यः, पदान्ते रोः स्वरे परे ॥
यादेशः स्यात् भगोयत्र, देवतायासते दिवि ॥२६॥

ह्रस्वान्ङणनो द्वे ॥१॥३॥२७॥

ह्रस्वात् परस्य ङो णो नः, पदान्ते स्यात् स्वरे परे ॥
द्वित्वं कालः पचन्नास्ते, कुङ्ङास्ते च सुगण्णिह ॥२७॥

अनाङ्माङो दीर्घाद्वा छः ॥१॥३॥२८॥

आङ्माङ्वर्जिततो दीर्घात्, पदान्तस्थाद्विभाषया ॥
छस्य द्वित्वं भवेत्तेन, श्रीच्छलः श्रोछलं श्रितः ॥२८॥

प्लुताद्वा ॥१॥३॥२९॥

दीर्घस्थानात् पदान्तस्थात्, प्लुतात् छस्य द्विरूपकम् ॥

अवर्णभोभगोऽघोभ्य., पदान्तस्थवयो॰ स्वरे ॥ ईषत्स्पृष्टतरौ स्याता, व्यादेशौ वा भगोयिह ॥१॥ इति । अवर्णात् परयोर्व्योश्च, स्वरे उञ् वर्जिते परे ॥ अस्पष्टौ तौ भवेता वा, पटविहास्ति पाटवम् ॥ १ ॥ इति । (पाठान्तरद्वयम्)। भोयत्र इत्याद्युदाहरणमूह्यम् ॥ २५ ॥ भगो. अत्र, देवता॰ आसते इति विश्लेष ॥२६॥ ह्रस्वादेव विधानाद् दीर्घात् प्लुताच्च न द्वित्वम् । कुङ् पक्षिविशेष क्रोञ्च इति प्रसिद्ध ॥२७॥ अनाङ्माङिति आच्छाया, माच्छिदत् इत्यादौ 'स्वरेभ्य '।१।३०। इत्यनेन नित्यद्वित्वम्॥२८॥ 'आगच्छ भो देवदत्त ३च्छत्रमानय' इत्यादौ प्लुतस्य दीर्घस्थानीयत्वाभावात्

विकल्पेन मुनेश्च्छात्रं, मुनेश्छात्रं निबोधय ॥२९॥

स्वरेभ्यः ॥१॥३॥३०॥

पदान्तादपदान्ताच्च, स्वराच्छो द्विर्भवेत्खलु ॥
गच्छच्छात्र तरुच्छाया-माच्छाद्येतातपस्तया ॥३०॥

हादर्हस्वरस्यानु नवा ॥१॥३॥३१॥

स्वरेभ्यो रेफहाभ्यां यो, रेफहस्वरवर्जितः ॥
वर्णः स द्विर्भवेद्वाऽनु, नृत्त्यत्तो नूर्त्येण रञ्जितः ॥३१॥

अदीर्घाद्विरामैकव्यञ्जने ॥१॥३॥३२॥

अदीर्घस्वरतो वर्णो, रहस्वरविवर्जितः ॥
अयुक्तव्यञ्जने वा द्वि—र्विरामे चानु नृत्त्यति ॥३२॥

अत्रूर्वर्गस्यान्तस्थातः ॥१॥३॥३३॥

अन्तस्थातः परो वर्णो, वर्गीयो ञविवर्जितः ॥
अनु द्विर्वा भवेदुल्का-मेघ उल्कामयं जगत् ॥३३॥

ततोऽस्याः ॥१॥३॥३४॥

अन्तस्थाया भवेद् द्वित्वं, परस्या वाऽञवर्गतः ॥

तस्य नित्यद्वित्वम् ॥२९॥ छात्र ! तरुच्छाया गच्छ, तया—तरुच्छायया आतप आच्छाद्यत इत्यन्वय ॥३०॥ अनु—यदन्यत् कार्यं प्राप्नोति तस्मिन् कृते पश्चादित्यर्थः । तेन प्राप्णुनावेत्यादौ प्रार्णुन्नावेत्याद्यनिष्टस्यापत्तिर्न ॥३१॥ नृत्यति, [illegible], [illegible] इत्युदाहरणपूर्ति । रहस्वरवर्जनात्, चर्या, [illegible], [illegible] इत्यादौ द्वित्वं न ॥३२॥ उल्कामये—उल्काप्रधाने मेघे वर्षति सति जगत् उल्कामयं स्यादिति । [illegible] ह्रस्वनकारौ ॥३३॥ अत्र दधि, [illegible] [illegible] [illegible] यथादच्चि-[illegible] अर्थात ।

दध्ययत्र खलु दध्यत्र, भो अश्नीत यथारुचि ॥ ३४ ॥

शिटः प्रथमद्वितीयस्य ॥१॥३॥३५॥

आद्यद्वितीययोर्द्वे वा, भवेतां परयोः शिटः ॥
किं क्करोषि तरुच्छेदं, तरुः फ्फलति कालतः ॥ ३५ ॥

ततः शिटः ॥१॥३॥३६॥

आद्यद्वितीयवर्णाभ्या, परः शिड्द्विर्भवेन्नवा ॥
वत्स्सं मुञ्चत भो गोपा, वत्सः क्ष्षीरं पिपासति ॥३६॥

न रात् स्वरे ॥१॥३॥३७॥

रात् परस्य शिटः स्थाने, द्वित्वं नैव स्वरे वरे ॥
विमर्शः किं जगज्जेत्रं, स्याद्वादाज्जैनदर्शनम् ॥३७॥

पुत्रस्यादिन्–पुत्रादिन्याक्रोशे ॥१॥३॥३८॥

क्रोशे पुत्रे न तो द्विः स्या–दादिन्–पुत्रादिनोः परे ॥
पुत्रादिन्यसि पापे ? त्वं, पुत्रपुत्रादिनी भव ॥३८॥

म्नां धुड्वर्गेऽन्त्योऽपदान्ते ॥१॥३॥३९॥

धुटि म्नामपदान्ते स्या–न्निमित्तान्त्योऽनु वर्गके ॥

तत इति वाल्यम् ॥३४॥ तरुच्छेद किं करोपि ? मा कुरु तरुच्छेदम् , कालत.–समयपरिपाक्त॰ तरु फलति, त्वरा विमुञ्चेत्यर्थ ॥३५॥ क्ष्पीरम्–क्षीर–दुग्धमिति यावत् ॥३६॥ स्याद्वादाद्—अनेकान्तवादत , जैनदर्शन जगज्जेत्रमित्यत्र विमर्श किम् ? अर्थान्नैव विचारावकाश. । 'र्हाद् '–१ । ३।३१ । इति विकल्पे प्राप्त प्रतिपेध ॥३७॥ अयि पापे ? त्व पुत्रादिनी असि, पुत्रपुत्रादिनी भवेत्याक्रोशवचनम् । पुत्रादिनी शिशुमारी, पुत्रपुत्रादिनी नागीत्यादावाक्रोशाभाद्विकल्पेन द्वित्व भवति ॥३८॥ धुटि इत्यस्य–वर्गके वर्गे इत्यनेन सम्बन्ध । म्नामिति

भो इयं कीदृशी लङ्का ? वीरमर्कटकम्पिता ॥३९॥

शिड्हेऽनुस्वारः ॥१॥३॥४०॥

अपदान्तमनोः शिड्हे–ऽनुस्वारोऽनु भवेत् किल ॥
वर्षासु भगवन् ? भान्ति, पयांसीव यशांसि ते ॥४०॥

रो रे लुग् दीर्घश्चादिदुतः ॥१॥३॥४१॥

लुप्यते रः परे रेफे, दैर्घ्यमदिदुतां पुनः ॥
पुनाराज्यो वनं यायाद्, दूराज्याद्धीरतो भृशम् ॥४१॥

ढस्तड्ढे ॥१॥३॥४२॥

तन्निमित्त ढकारे ढो, लुग् दीर्घोऽदिदुतामनु ॥
नवनीतं घृतं गूढं, लीढवानच्युतो व्रजे ॥४२॥

सहिवहेरोच्चावर्णस्य ॥१॥३॥४३॥

सह्वहस्तकस्य ढस्तड्ढे, लुगवर्णस्य चौदनु ॥
सोढा सम्यक् तपः कष्टं, वोढा सुखस्य सर्वदा ॥४३॥

उदः स्थास्तम्भः सः ॥१॥३॥४४॥

स्थास्तम्भयोस्सकारस्य, लुग् भवेदुत्परस्थयोः ॥
उत्तम्भितु स्मराराति, समुत्थाता स धार्मिकः ॥४४॥

लङ्का-लङ्काराणामित्यर्थः । वीरश्चासौ मर्कटः हनुमान् तेन कम्पितेत्यर्थः ॥३९॥ शिड्हे-शिटि, हे च परे इत्यर्थः । हे भगवन् ! ते यशांसि वर्षासु पयांसि इव यथा [illegible] जलानि सतत प्रसरन्ति तथा, भान्ति ॥४०॥ [illegible]-[illegible], [illegible]-[illegible] ॥ ४१ ॥ ढ इति केवल ढव्यञ्जनस्य [illegible] ढकारस्यापि तदर्थं ॥ ४२ ॥ अवर्णस्येति किम् ? ऊढः ॥ ४३ ॥ स धार्मिकः स्मराराति-स्मरस्यारिम् उत्तम्भितु समुत्थाता ॥ ४४ ॥

तदः सेः स्वरे पादार्था ॥१॥३॥४५॥

तदः परस्य सेर्लुक् स्यात्, स्वरे चेत् पादपूरणम् ॥
सैप दाशरथी रामः, सैव राजा युधिष्ठिरः ॥४५॥

एतदश्च व्यञ्जनेऽनग्नञ्समासे ॥१॥३॥४६॥

एतत्तदोः परस्थस्य, सेर्लुक् स्याद् व्यञ्जने परे ॥
अकि नो नञ्समासे स्या—देप याति स धावति ॥४६॥

व्यञ्जनात् पञ्चमान्तस्थायाः सरूपे वा ॥१॥३॥४७॥

लुप्यन्ते पञ्चमान्तस्थाः, सरूपे व्यञ्जनात्पराः ॥
वाऽदित्योऽयं सदा प्रात—रादित्यैर्वन्ध्यने रविः ॥४७॥

धुटो धुटि स्वे वा ॥१॥३॥४८॥

लुग् व्यञ्जनात् परस्य स्वे, परस्थे वा धुटो धुटि ॥
प्रत्त प्रत्तं पुनः प्रत्त, प्रदत्तं नैव निष्फलम् ॥४८॥

तृतीयस्तृतीयचतुर्थे ॥१॥३॥४९॥

स्थान्यासन्नस्तृतीयः स्याद्, धुटः स्थाने तृतीयके ॥

पादपूरणाभावे तु नैतत्–सूत्रप्रवृत्ति· ' स एप भरतो राजा, स एप नल भूपति. ' इत्यादिवत् ॥ ४५ ॥ अकि नञ्समासे च न स्यादिति । तेन एपक करोति अनेपो गच्छतीत्यादौ लुगभाव ॥ ४६ ॥ आदित्योऽयमिति–अय जन आदित्योपासक इति । आदित्योपासकै प्रात सदा रविर्वन्द्यते । वन्द्यत इति सरूपाभावाल्लुगभावपरमुदाहरण बोध्यमिति ॥ ४७ ॥ व्यञ्जनात् परस्य धुट स्वे धुटि परस्थे लुग्वेत्यन्वय·, भवेदितिशेप । प्रत्तमिति–प्रपूर्वाद् ददातेरारम्भे क्ते ' प्राद् दागस्त्त०' (४-२-२) इति त्तादेशे तकारत्रयान्वित भवति, अनेन मध्यतकारस्य लुग् इति तकारद्वयम् ॥४८॥ लिख्यते इत्यादौ तृतीयचतुर्थपरत्वाभावाद्, वल्भत इत्यादौ च

चतुर्थे च परे राजन्? सुद्ध्युपास्यः सदा भव ॥४९॥

अघोपे प्रथमोऽशिटः ॥१॥३॥५०॥

शिड्वर्जस्य धुटः स्थाने, आद्योऽघोपे परे भवेत् ॥
दृषत्कल्पः स विज्ञेयो, यस्तत्त्वं नैव लिप्सति ॥५०॥

विरामे वा ॥१॥३॥५१॥

धुटः स्थाने विरामे वा-ऽशिटः स्यात् प्रथमाक्षरः ॥
दक्षिणार्के हि मासाः षट्, उत्तरार्के तथैव षड् ॥५१॥

न सन्धिः ॥१॥३॥५२॥

उक्तश्च वक्ष्यमाणश्च, सन्धिर्नो विरतौ भवेत् ॥
दधि अत्र भवान् लब्धा, तत्र संभ्राम्यते कुतः ॥५२॥

रः पदान्ते विसर्गस्तयोः ॥१॥३॥५१॥

पदान्तस्थस्य रेफस्य, विरामेऽघोपके परे ॥
विसर्गः स्याद् यथाकामं, फलेद्धर्मः पुनः पुनः ॥५३॥

ख्यागि ॥१॥३॥५४॥

पदान्ते वर्तमानस्य, रेफस्य ख्याक्परे भवेत् ॥
विसर्ग एव किं तेन, यः ख्यातो नैव भूतले ॥५४॥

पु[illegible]भागान्न प्राप्ति ॥४९॥ नैव लिप्सति—इच्छति य तत्त्व स दृपत्कल्प.—लघुमि [illegible] [illegible]य इति ॥५०॥ दक्षिणार्के—दक्षिणायने सूर्ये, उत्तरार्के—उत्त-[illegible] [illegible] [illegible] ॥५१॥ सन्धिकार्यार्थमिद सूत्रमय च श्लोक. समर्थीन-[illegible] —' संहितैकपदे नित्या, नित्या धातूपसर्गयोः ॥ नित्या समासे वाक्ये तु, सा [illegible] ॥१॥ ' ॥५२॥ अर्क इत्यादौ पदान्तत्वाभावाद्विसर्गाभावः ॥५३॥ [illegible] प्राप्तावपि पृथक्करणात् [illegible] वाच. ॥५४॥

शिट्यघोषात् ॥१॥३॥५५॥

रः शिट्परे परेऽघोषे, पदान्ते स्याद्विसर्गकः ॥
वासः क्षौमं सदा सद्भि-र्दुकूलमिति गीयते ॥५५॥

व्यत्यये लुग् वा ॥१॥३॥५६॥

शिट्यघोषपरे रो लुक्, पदान्ते स्याद्विभाषया ॥
बुद्धि स्फुरति नो तस्य, समापं दधि योऽश्नुते ॥५६॥

अरोः सुपि रः ॥१॥३॥५७॥

रुवर्जितस्य रेफस्य, रेफ एव सुवुत्तरे ॥
चतुर्षु पुरुषार्थेषु, मोक्षः खलु प्रशस्यते ॥५८॥

वाहर्पत्यादयः ॥१॥३॥५८॥

अहर्पत्यादयः शब्दा, निपात्यन्ते विभाषया ॥
गीर्पतिः गीःपतिस्तुल्यो-ऽहर्पतिः स्यादहःपतिः ॥५८॥

शिट्याद्यस्य द्वितीयो वा ॥१॥३॥५९॥

प्रथमस्य द्वितीयो वा, शिटि परे भवेत्किल ॥
फुल्लान्यब्जानि प्राङ्ख्षण्डे, प्राङ्क्षण्डे भ्रमरा गता ॥५९॥

तवर्गस्य श्चवर्गष्टवर्गाभ्यां योगे चटवर्गौ ॥१॥३॥६०॥

तवर्गस्य श्चवर्गाभ्या, ष्टवर्गाभ्या क्रमात् किल ॥

सूत्रमिद नियमार्थं, तेन सत्वपत्व≍क)(पा न भवन्ति ॥५५॥ बुद्धि स्फुरति, बुद्धि स्फुरतीत्यपि बोध्यम् ॥५६॥ सुवुत्तरे–सुपि परे इत्यर्थ. ॥५७॥ सूत्रे बहुवचनमाकृतिगणार्थम् ॥५८॥ प्राङ्ख्षण्डे–पूर्वदिक्स्थितपद्मषण्डे अब्जानि फुल्लानीति प्राङ्क्षण्डे–तत्र भ्रमरा गता इत्यन्वय ॥५९॥ श्चवर्गाभ्याम–शकार–

चटवर्गौ भवेतां यच्च, शेते तट्टीकते कथम् ॥६०॥

सस्य शषौ ॥१॥३॥६१॥

सस्य श्चवर्गयोगे शः, ष्टवर्गाभ्यां च षो भवेत् ॥
कश्चाश्चतश्चतुष्टङ्क्ष ? पश्यन्दृभिर्न पराजितः ॥६१॥

न शात् ॥१॥३॥६२॥

शात् परस्य तवर्गस्य, चवर्गो नैव जायते ।
किमश्नासीति सम्प्रश्ने, मापप्तुष्टि समश्नुवे ॥६२॥

पदान्ताट्टवर्गादनाम्-नगरी-नवतेः ॥१॥३॥६३॥

तवर्गस्य सकारस्य, टवर्गात् परतो न वै ॥
पदस्यान्ते टवर्गः षः, स्यान्नामादित्रये परे ॥६३॥

षि तवर्गस्य ॥१॥३॥६४॥

पदान्तस्य तवर्गस्य, टवर्गो नव षे परे ॥
तीर्थकृत षोडशश्शान्ति-श्चक्रवर्ती च पञ्चमः ॥६४॥

लि लौ ॥१॥६५॥

स्थान्यासन्नौ लकारौ स्त–स्तवर्गस्य तु ले परे ॥
पदान्ते तेन सल्लक्ष्मीं, भवाँल्लब्धा शुभोदये ॥६५॥

॥ इति तृतीयः पादः ॥

॥ अथ चतुर्थः पादः ॥

अत आःस्यादा जस्भ्यांये ॥१॥४॥१॥

संभवेदत आः स्यादौ, जसि भ्यामि च ये परे ॥
वृक्षा आभ्यां हि विक्रीना, धनायर्णच्छिदे त्वरम् ॥१॥

भिस ऐस् ॥१॥४॥२॥

आत् परस्य भिसः स्यादे–रैसादेशः प्रकीर्तितः ॥
अतिजरैरहो जैनैः, श्रमणैः साध्यते शिवम् ॥२॥

इदमदसोऽक्येव ॥१॥४॥३॥

अकि सतीदमदसो–र्भिसः स्यादैस् अतः परम् ॥
अमुकैः सद्भिराचीर्ण–मित्येभिश्चीर्यते चिरम् ॥ ३ ॥

शुभोदये–सुकृतस्योदये सति भवान् सल्लक्ष्मी लब्धा इत्यन्वय ॥६५॥

॥ तृतीय पाद. समाप्त. ॥

आभ्याम् ऋणच्छिदे धनाय तु–त्वर, शीघ्रमिति–हि वृक्षा विक्रीताः इति ॥१॥ अतिजरै –अतिवृद्धै जैनै. श्रमणै शिव साध्यते इत्यहो ! आश्चर्यमिति ॥२॥ नियमसूत्रमिद तेन अकि सत्येव स्याद् ऐस् नान्यथा, एवञ्च एभिरमीभिरिति सिद्धम् ॥३॥

एद् बहुस्भोसि ॥१॥४॥४॥

सादौ भादौ बहुत्वे स्यात्, स्यादावोस्यत एत् किल ॥
नमोऽस्तु सर्वदेवेभ्यः, सर्वेषां ते सुखप्रदाः ॥४॥

टाङसोरिनस्यौ ॥१॥४॥५॥

आत् स्याद्योष्टाङसोःस्थाने, इनस्यौ स्तो यथाक्रमम् ॥
अतिजरेण वृक्षेण, वंशो वृक्षस्य रक्षितः ॥५॥

ङेङस्योर्यातौ ॥१॥४॥६॥

ङेङस्योः क्रमशः स्याद्यो-र्यातौ स्यातामकारतः ॥
स्वर्गादापतनं नून-मतो मोक्षाय यत्यताम् ॥ ६ ॥

सर्वादेः स्मैस्मातौ ॥१॥४॥७॥

स्मैस्मातौ ननु ङेङस्योः, स्याता सर्वाद्यदन्ततः ॥
क्रमात् स्वं देहि सर्वस्मै, सर्वस्मात् प्राप्यते हि तत् ॥७॥

ङेः स्मिन् ॥१॥४॥८॥

स्याददन्तस्य सर्वादे-र्ङेः स्थाने स्मिन्निति ध्रुवम् ॥

बहुत्वविषये सकारादौ भकारादौ प्रत्यये ओसि प्रत्यये च स्यादौ परे अकारस्य एत् स्यात् इत्यर्थः ॥४॥ टाया इन ङसः स्य इति॥५॥ ङेप्रत्ययस्य यादेशः, ङसेश्च आत् इति ॥ ॥ सर्व, विश्व, उभ, उभयट्, अन्य, त्वत्, अन्यतर, इतर, डतर, डतम, त्व, नेम समसिमौ सर्वार्थौ, पूर्व-परा-वर-दक्षिणो-त्तरा-परा-धराणि व्यवस्थायाम्, स्वम् अज्ञातिधनाख्यायाम्, अन्तर बहिर्योगोपसंव्यानयोःपुरि, त्यद्, तद्, यद्, अदस्, इदम्, एतद्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्, इत्येतानि सर्वादि. ॥७॥ प्रियसर्वे इत्यादौ सर्व-

सर्वस्मिन्नस्ति चैतन्यं, तेन सर्वे सचेतनाः ॥ ८ ॥

जस इः ॥१॥४॥९॥

अकारान्तस्य सर्वादे-र्जस इरिति सम्मतः ॥
श्रेयो गच्छन्ति ते सर्वे, सेवन्ते ये वृषं सदा ॥ ९ ॥

नेमार्द्धप्रथमचरमतयायाल्पकतिपयस्य वा ॥१॥४॥१०॥

तयायप्रत्ययान्तस्य, नेमादेर्नाम्न इर्जसः ॥
अल्पादेश्च विकल्पेन, नेमे नेमा द्वये द्वयाः ॥ १० ॥

द्वन्द्वे वा ॥१॥४॥११॥

द्वन्द्वेऽदन्तस्य सर्वादे-र्जस इः स्याद्विभाषया ॥
पूर्वोत्तरे जनाः सर्वैः, पूर्वोत्तरा इतीष्यते ॥ ११ ॥

न सर्वादिः ॥१॥४॥१२॥

सर्वादिर्नैव सर्वादिः, समासं द्वन्द्वमाश्रितः ॥
दक्षिणोत्तरपूर्वाणा-मार्याणा जीवनं शुभम् ॥ १२ ॥

तृतीयान्तात् पूर्वावरं योगे ॥१॥४॥१३॥

पूर्वावरौ न सर्वादी, तृतीयान्तात् पदात्परौ ॥
योगे मासेन पूर्वाय, न रोचन्ते समावराः ॥ १३ ॥

सम्बन्धित्वाभावान्न स्मिन्नादेश ॥८॥ वृष-धर्ममित्यर्थ ॥९॥ नेमार्द्धप्रथम-चरमाल्पकतिपया नेमादय शब्दा., तयायौ प्रत्ययौ तदन्तस्येति ॥१०॥ उत्तरसूत्रेण निषेधे प्राप्त प्रतिप्रसवार्थो योग ॥११॥ दक्षिणा चोत्तरा च च पूर्वा चेति द्वन्द्व ॥१२॥ योगे–सम्बन्धे सति । समाभि.–वर्षेण अवराः समावरा , समशब्दो वर्षवाचक स्त्रीत्वे बहुत्वे च, तथा चाभिधानचिन्तामणि.–' वर्ष हायनोऽब्द समा. शरत्' (२–७३) इति ॥ १३ ॥

तीयं ङित्कार्ये वा ॥१॥४॥१४॥

तीयान्तं वा ङितां कार्ये, सर्वादित्वेन सम्मतम् ॥
द्वितीयस्मै द्वितीयाय, भिक्षुकाय प्रदीयताम् ॥ १४ ॥

अवर्णस्यामः साम् ॥१॥४॥१५॥

अवर्णान्तस्य सर्वादे-रामः साम् संभवेत्किल ॥
सर्वेषामेकजातानां समासां च समं समम् ॥ १५ ॥

नवभ्यः पूर्वेभ्य इस्मात्स्मिन् वा ॥१॥४॥१६॥

पूर्वादिभ्यो नवभ्यः स्यु-रिस्मात्स्मिनो यथास्थलम् ॥
विकल्पेन ततो ज्ञेयं, पूर्वे पूर्वाः परे पराः ॥ १६ ॥

आपो ङितां यै-यास्-यास्-याम् ॥१॥४॥१७॥

आबन्तस्य ङितां स्थाने, यै-यास्-यास्-याम् यथाक्रमम् ॥
कलायै रोचते चन्द्रः, कलायाः कल्पते कला ॥ १७ ॥

सर्वादेर्डस्पूर्वाः ॥१॥४॥१८॥

स्युराबन्तस्य सर्वादे-र्डस्पूर्वास्ते यथायथम् ॥
अस्यै देव्यै नमोऽस्याः श्रीः, प्राप्यतेऽस्यां महो महत् ॥१८॥

टौस्येत् ॥१॥४॥१९॥

आबन्तस्य भवेदेत्वं, टायामोसि च प्रत्यये ॥
किन्तया हतया मत्या, धर्मे या न प्रतिष्ठते ॥ १९ ॥

औता ॥१॥४॥२०॥

औताऽऽबन्तस्य चैत्त्वं स्याद्, द्व्यर्थे आद्यद्वितीययोः ॥
इमे देव्यौ समायाते, माले प्रक्षिपतानयोः ॥ २० ॥

इदुतोऽस्त्रेरीदूत् ॥१॥४॥२१॥

औता सह स्त्रिवर्जं स्त, ईदूत्त्वमिदुदन्तयोः ॥
क्रमादिमौ मुनी साधू, मुनी साधू नमस्यत ॥ २१ ॥

जस्येदोत् ॥१॥४॥२२॥

परे जसि यथासङ्ख्य-मेदोताविदुदन्तयोः ॥
मुनयो मुनिता प्राप्ताः, साधवः खलु साधुताम् ॥२२॥

ङित्यदिति ॥१॥४॥२३॥

दिद्वर्जिते ङिति स्यादौ, क्रमात् स्त इदुदन्तयोः ॥
एदोतौ रोचतेऽये श्री-रतनोरेस्तनूस्तनूः ॥ २३ ॥

या मतिर्धर्मे न प्रतिष्ठत, तया हतया मत्या किम् ? न किमपीत्यर्थ ॥ १९ ॥ आद्यद्वितीययो -प्रथमाविभक्तिद्वितीयाविभक्तिसम्बन्धिनो , द्व्यर्थे-द्विवचने। अनयोरिति पूर्वसूत्रीयौसि इत्यस्योदाहरण बोध्यम् ॥२०॥ अस्त्रेरिति-अतिस्त्रियौ नरौ स्त पश्य वा ॥२१॥ इदन्तस्य एत्, उदन्तस्य च ओत् इति ॥२२॥ इशब्द कामाय तन, अये-कामाय श्री-लक्ष्मी रोचते तन्मातृत्वात् । अतनो -ए -अनङ्गस्य कामस्य तनू.-मूर्ति तनू -कृशेत्यर्थ ॥२३॥

टः पुंसि ना ॥१॥१॥२४॥

इदुदन्तात् परं पुंसि, टो नादेशः स्मृतस्ततः ॥
अमुना मुनिना नित्यं, साधुना साध्यते शिवम् ॥२४॥

ङिर्डौ ॥१॥४॥२५॥

सप्तम्येकवचोऽडेर्डा–विदुदन्तात्परं भवेत् ॥
मुनौ संप्रीणिते प्रीतिः, प्रभौ भवति निर्मला ॥२५॥

केवलसखिपतेरौ ॥१॥४॥२६॥

सखिशब्दात् तथा पत्यु–रिदन्तात् केवलान् ङिरौः ॥
सख्यौ पत्यौ मृते साध्वी, ब्रह्मचर्यं चरेच्च चिरम् ॥२६॥

न ना ङिदेत् ॥१॥४॥२७॥

सखिपतेः परं टो ना, ङित्येत्त्वं च न केवलात् ॥
सख्या पत्या समं प्रीतिः, सख्ये पत्ये प्ररोचते ॥२७॥

स्त्रियां ङितां वा दै–दास्–दास्–दाम्॥१॥४॥२८॥

दै दास् दास् दाम् ङिता वा स्त्री–दुदन्तात्
प्राप्यं धेनोः पयो धेन्वा, बुध्याः स्वं बुद्धये

स्त्रीदूतः ॥१॥४॥२९॥

नित्यस्त्रीदूत्परेषा स्यु–र्ङिता दायादयः ·

सरस्वत्यै नमो देव्यै, तस्या देव्या वरो वरः ॥ २९ ॥

वेयुवोऽस्त्रियाः ॥१॥४॥३०॥

अस्त्रिया वेयुवः स्यादेः, स्त्रीदूतो दैमुखा ङिताम् ॥
श्रियां श्रियि शुभं सर्वं, श्रियै श्रिये श्रियाः श्रियः ॥

आमो नाम् वा ॥१॥४॥३१॥

स्यादियुवोऽस्त्रिया आमो, नाम् स्त्रीदूतः परं नवा ॥
अतिश्रियां भ्रुवां पातात्, श्रीणां भ्रूणां नतिर्भवेत् ॥३१॥

ह्रस्वापश्च ॥१॥४॥३२॥

स्याद् ह्रस्वान्तात्तथाऽऽबन्तात्, स्त्रीदूदन्ताच्च नाम् ध्रुवम् ॥
आमः किं जातु देवानां-प्रियो मोहं विमुञ्चति ॥३२॥

सङ्ख्यानां र्णाम् ॥१॥४॥३३॥

रेफान्तसान्तनान्ताना, संख्यानामाम् च नाम् भवेत् ॥
षण्णां तथैव पञ्चानां चतुर्णामेकमाप्नुहि ॥ ३३ ॥

त्रेस्त्रयः ॥१॥४॥३४॥

आम्सम्बन्धि त्रिशब्दस्य, त्रयादेशो भवेत् किल ॥

श्रष्ट ॥२९॥ इयुव -इयुवस्थानिन, स्त्रीदूत स्याद ङिता दैमुखाश्चत्वार आदेशा वा स्यु, स्त्रीशब्दसम्बन्धिनो न स्युरिति । तेन स्त्रियै इत्याद्येव ॥३०॥ इयुव स्त्रीदूत पर स्यादे आम नाम् वा स्यात्, स्त्रिया न इत्यथ ॥३१॥ मालाना, स्त्रीणा, वधूना-मित्याद्यपि बोध्यम्। देवानांप्रिय -मूर्ख मोह जातु-कदाचिदपि किं विमुञ्चति ? नैवेत्यर्थ ॥३२॥ षण्णा-तपमा, पञ्चाना महानताना, चतुर्णा-दानादिप्रमाणामिति यावत् ॥३३॥ उदाहरणमत्क-ल्पार्थं वाल्मीकिरामायणे, तत्पूर्वार्ध तु " तत्र वा वैनतेयस्य, मारुतस्य

त्रयाणामेव भूतानां, शक्तिः सागरलघने ॥ ३४ ॥

एदोद्भ्यां ङसिङसो रः ॥१॥४॥३५॥

रेफो ङसिङसोः स्थाने, स्यादेदोद्भ्यां परस्थयोः ॥
मुनेर्गा रक्षतो धेनोः, हरेर्द्योस्तनयोऽभवत् ॥ ३५ ॥

खितिखीतीय उर् ॥१॥४॥३६॥

खितिसम्बन्धिनः खीती-सम्बन्धिन इवर्णजात् ॥
यतो ङसिङसोरुर् स्यात्, सख्युः पत्युः सुखात् सुखम् ॥

ऋतो डुर् ॥१॥४॥३७॥

ङसिङसोर्डुरादेशः, ऋकारात् परयोर्मतः ॥
पितुर्धनं सुतस्य स्यान्, मातुश्च दुहितुर्भवेत् ॥ ३७ ॥

तृ-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्त्रो घुट्यार् ॥१॥४॥३८॥

स्यात् तृच्-तृन्प्रत्ययान्तस्य, स्वसादेश्च ऋतो घुटि ॥
आरादेशोऽरिहन्तारं, स्मारं स्मारं स्मरं हरेत् ॥ ३८ ॥

अर्डौ च ॥१॥४॥३९॥

डौ घुटि च ऋतः स्थाने-ऽरादेशो नित्यशः स्मृतः ॥

महालन ॥ इति ॥३४॥ मुने, गा धेनो रक्षत हरेस्तनामकस्य नृपस्य द्यो-स्नात् तनय अभवत्-अजातदिति ॥३५॥ इवर्णजात्-यत -यकारादिति । [illegible] यत्राभावात् ॥३६॥ लकारान्तादप्यनेन ङसिङसोर्डुरादेश, [illegible] ३, तन आप्लशब्दस्य आपुर् इति स्यात् ॥३७॥ अरि-हन्तारम्- हन्तम्, स्मार स्मार-स्मृत्वा स्मृत्वा, स्मर-काम, हरेदिति । [illegible], [illegible] ॰ [illegible] इत्यादिरूपसिद्धिर्बोध्या ॥३८॥ ऋत-

पितरि पितरं वालो, मातरि मातरं नमेत् ॥ ३९ ॥

मातुर्मातः पुत्रेऽर्हे सिनाऽऽमन्त्र्ये ॥१॥४॥४०॥

प्रशंसायां सिनाऽऽमन्त्र्ये मातुर्मातो भवेत् सुते ॥
वहुव्रीहौ समासे हे–वामामात ? चिरं जय ॥ ४० ॥

ह्रस्वस्य गुणः ॥१॥४॥४१॥

आमन्त्र्ये वर्तमानस्य, ह्रस्वान्तस्य सिना समम् ॥
भवेद् गुणः समासन्नः, मुने ? साधो ? श्रुत पठ ॥४१॥

एदापः ॥१॥४॥४२॥

आमन्त्र्ये वर्तमानस्य, ह्यावन्तस्य सिना समम् ॥
एदन्तादेश आदेश्यो, वाले ? मानमपाकुरु ॥ ४२ ॥

नित्यदिद्द्विस्वराम्बार्थस्य ह्रस्वः ॥१॥४॥४३॥

द्विस्वराम्बार्थशब्दाना–मावन्ताना सदादिताम् ॥
चामन्त्र्येऽर्थे सिना ह्रस्व, आगोऽम्ब ? क्षम देवि ? मे ॥४३॥

अदेतः स्यमोर्लुक ॥१॥४॥४४॥

सेस्तदादेशभूतस्या–मो लुक् सम्बोधने भवेत् ॥

ऋकारस्येति ॥३९॥ ‘प्रशसाया’ स्थाने ‘प्रशसिते’ इत्यपि पाठ । हे वामामात ?–पार्श्वप्रभो ? । चेद् मातृद्वारा पुत्रस्य प्रशसा न तदा अरे गदभीमातृक ‘ इति मातुमात इत्यदन्तादेशोऽपि न ॥४०॥ समासन –‘आसन्न’ (७-४-१२०) इतिसूत्रविपर्यभूत इकारादेरेकारादिर्गुण स्यादिति ॥४१॥ अपाकुरु–दूरीकुरु इति ॥४२॥ अम्बा, अक्का, अत्ता, अल्ला इत्यावन्ता द्विस्वराम्बार्थशब्दा । सदादिता–नित्यदितामिति । आग –अपराधम् ॥४३॥ अम्–नपुसके सेरमादेश । परमे ? परमा उत्कृष्टा, ई –लक्ष्मीर्यस्य स, तत्सम्बोधने हे परमे !

अदेदन्ताच्च हे देव !, परमे ! परमे वस ॥ ४४ ॥

दीर्घङ्याब्व्यञ्जनात् सेः ॥१॥४॥४५॥

ङ्याब्भ्यां परस्य दीर्घाभ्यां, व्यञ्जनाच्च लुगिष्यते ॥
सेरस्तीयं परा देवी, राजा ता वन्दते सदा ॥ ४५ ॥

समानादमोऽतः ॥१॥४॥४६॥

लुक् समानात् परस्यामो-ऽकारस्य व्यपदिश्यते ॥
वन्देऽहम् ऋषभं शान्ति, नेमिं पार्श्वं च वीरपम् ॥४६॥

दीर्घो नाम्यतिसृचतसृषः ॥१॥४॥४७॥

आमादेशे परे नामि, स्यात् समानस्य दीर्घता ॥
तिसृ-चतसृ-षान्ताना, न जिनानां तपस्तपः ॥ ४७ ॥

नुर्वा ॥१॥४॥४८॥

समानस्य नृशब्दस्य, नामि दीर्घो विभाषया ॥
यौवनं धनमायुष्यं, नृणा नॄणा विनश्वरम् ॥ ४८ ॥

शसोऽता सश्च नः पुंसि ॥१॥४॥४९॥

शसोऽकारेण दीर्घः स्यात्, समानस्य यथोचितः ॥
तथा पुंसि शसः सो नो, मुनीन् देवाननुपाश्रय ॥ ४९ ॥

सङ्ख्यासायवेरह्नस्याहन् ङौ वा ॥१॥४॥५०॥

सङ्ख्याभ्यः सायशब्दाच्च, वेरह्नस्य परस्य ङौ ॥
आदेशोऽहन् भवेद्वा तद्, द्व्यह्नि द्व्यहनि नो चिरम् ॥५०॥

निय आम् ॥१॥४॥५१॥

नियः परस्य ङेः स्थाने, आमादेशो बुधैर्मतः ॥
सन्नद्धे सति सेनान्यां, सेना स्वर्गं जयेदपि ॥ ५१ ॥

वाष्टन आः स्यादौ ॥१॥४॥५२॥

स्वसम्बन्ध्यन्यसम्बन्धि–स्यादौ वाष्टन आ भवेत् ॥
अष्टभिः कर्मभिर्भ्रान्ति–रष्टाभिर्मातृभिर्हृता ॥ ५२ ॥

अष्ट और्जस्शसोः ॥१॥४॥५३॥

कृतात्वस्याष्टशब्दस्य, जस्शसोरौरुदाहृतः ॥
बुद्धेरष्टौ गुणाः सन्ति, सिद्धीरष्टौ नयन्ति ते ॥५३॥

द्व्यह्नि, द्व्यहनि इति रूपद्वयं ङौ–'ईङौ वा' (२–१–१०९) इति विकल्पजनितम्, अस्य विकल्पपक्षे तु द्व्यह्ने इति तृतीयं रूपं ज्ञेयम्। एवमन्यत्रापि सायाह्नादौ ॥५०॥ सेनान्या–सेनापतौ सन्नद्धे सति सेना स्वर्गमपि जयेदित्यन्वयः ॥ ५१ ॥ अष्टभिः कर्मभिः–ज्ञानावरणादिभिः जनिता भ्रान्तिः–भवभ्रमणम् अष्टाभिः मातृभिः पञ्चसमिति–त्रिगुप्तिस्वरूपप्रवचनमातृभिः हृता–अपाकृतेति ॥५२॥ 'शुश्रूषा श्रवणं चैव, ग्रहणं धारणं तथा ॥ ऊहोऽपोहोऽर्थविज्ञानं, तत्त्वज्ञानं च धीगुणाः' ॥१॥ इत्यभिधानचिन्तामणिद्वितीयकाण्डोक्ता अष्टौ बुद्धिगुणाः । 'लघिमा वशितेशित्वं, प्राकाम्यं महिमाऽणिमा ॥ यत्रकामावसायित्वं, प्राप्तिरैश्वर्यमष्टधा' ॥ २ । ११२ ॥ इत्यष्टौ सिद्धयः (अभि०) ॥५३॥

डतिष्णः सङ्ख्याया लुप् ॥१॥४॥५४॥

डतिपकारनान्तानां, सङ्ख्यानां जसूशसोर्हि लुप् ॥
कत्यागच्छन्ति शालायां, षट् सप्त नव वा दश ॥५४॥

नपुंसकस्य शिः ॥१॥४॥५५॥

नपुंसकस्य शब्दस्य, जायते शिस्तु जसूशसोः ॥
कुण्डानि सन्ति कुण्डानि, पश्य तत्र पयांसि च ॥५५॥

औरीः ॥१॥४॥५६॥

नपुंसकस्य सम्बन्धी, भवेदौकार ईर्ध्रुवम् ॥
पयसी स्तो जले दुग्धे, कोषं नानार्थकं स्मर ॥ ५६ ॥

अतः स्यमोऽम् ॥१॥४॥५७॥

क्लीबादन्तस्य शब्दस्य, स्यमोरम् जायते ततः ॥
गृहं वनं सुखं दुःखं, समस्तं योगिनां समम् ॥५७॥

पञ्चतोऽन्यादेरनेकतरस्य दः ॥१॥४॥५८॥

दः क्लीबान्यादिपञ्चानां, स्यमोरेकतरादृते ॥
चित्तं संचिन्तितं चान्यद्, दैवेनान्यत् पुरस्कृतम् ॥५८॥

शालायां कति बाला आगच्छन्ति ? षट् सप्त नव दश वा बाला आगच्छन्ति इति ॥५४॥ तत्र पयांसि च–चात् सन्ति पश्य चेति ॥५५॥ पयसी–जले दुग्धे इति द्विवचनं न तु सप्तम्येकवचनं प्रवृत्ते। 'पयो जलं पयः क्षीरम्' इति नानार्थकः कोषः ॥५६॥ क्लीबादन्तस्य–अदन्तस्य नपुंसकस्येति। 'अनन्ता शासने जना, जैनं जयति शासनम्' इति जगन्नाथोऽपि ॥५७॥ नपुंसकस्यान्यादिपञ्चकस्य स्यमोर्दः स्यादेकतरं वर्जयित्वेति। अन्य-अन्यतर इतर-कतर कतम इत्यन्यादयः पञ्च सर्वाद्यन्तर्वर्तिनः ॥५८॥

अनतो लुप् ॥१॥४॥५९॥

नपुंसकानदन्तस्य, स्यमोर्लुब् विदुषा मते ॥
जीर्यति गोपयः सद्यो, दधि मासेन जीर्यति ॥ ५९ ॥

जरसो वा ॥१॥४॥६०॥

क्लीबस्य जरसन्तस्य, स्यमोर्लुब् वा प्रजायते ॥
अतिजरः कुलं पश्या-तिजरसं कृतं सुरैः ॥ ६० ॥

नामिनो लुग् वा ॥१॥४॥६१॥

लुग्वा भवेत् स्यमोर्नाम्नो, नाम्यन्तस्य नपुंसके ॥
सिद्धे लुपेव लुक्कारः; स्थानिवत्त्वार्थमिष्यते ॥ ६१ ॥

वान्यतः पुमाँष्टादौ स्वरे ॥१॥४॥६२॥

यो नाम्यन्तोऽन्यतः क्लीबः, स पुंवद्वा स्वरे परे ॥
टादौ स्यात् कर्तृणा कर्त्रा, कुलेन कर्म युज्यते ॥६२॥

दध्यस्थिसक्थ्यक्ष्णोऽन्तस्यान् ॥१॥४॥६३॥

स्वान्यसम्बन्धिटादौ वा, स्वरे परे नपुंसके ॥
दध्यादीनामनादेशो, दध्नि दधनि सद्घृतम् ॥ ६३ ॥

अनाम्स्वरे नोऽन्तः ॥१॥४॥६४॥

आमवर्जिते स्वरे स्यादौ, नाम्यन्तस्य नपुंसके ॥

लुग्भङ्क्त्वा लुप्करणं स्यमोः स्थानिवद्भावेन यत् कार्यं तस्य प्रतिषेधार्थं, तेन त्यदाद्यत्व-सत्वादि न स्यादिति ॥५९॥ जरसान्तशब्दाभावेऽतिजरमिति ॥६०॥ हे वारे हे वारि इत्याद्युदाहरणमुन्नेयमिति॥६१॥ अपुंस इत्यादौ अन्यतः क्लीबत्व नेति न पुंवद्भावनिषेधः ।६२।दध्नि दधनि-दधिमात्रे घृतं सद् नत्वाददिति।६३।अना-

नोऽन्तः स्याद्वारिणा व्याप्तं, विश्वं वर्षति वारिदे ॥६४॥

स्वराच्छौ ॥१॥४॥६५॥

नोऽन्तः शौ जस्शसादेशे, भवेत् क्लीबात् स्वरान्ततः ॥
कुलानि सत्कुलान्येषु, सञ्जाता जनिरर्हताम् ॥६५॥

धुटां प्राक् ॥१॥४॥६६॥

नोऽन्तः स्वरान्नु धुड्जाति-स्तदन्तस्य नपुंसके ॥
प्राग् धुड्भ्यः शौ परे सन्ति, पयांसि सन्ति शर्मणे ॥६६॥

र्लो वा ॥१॥४॥६७॥

रेफलाभ्या च धुड्जाति-स्तदन्तस्य नपुंसके ॥
नोऽन्तः प्राग् धुटः शौ वा, ऊर्ञ्जि ऊर्जि कुलानि ते ॥६७॥

घुटि ॥१॥४॥६८॥

यावत् पादसमाप्ति यत् , कार्यं तद् घुटि संभवेत् ॥
यत्र विशेपता तत्र, वक्ष्यति सूत्रकृत् स्वयम् ॥ ६८ ॥

अचः ॥१॥४॥६९॥

धुडन्तस्याञ्चतेर्धातो-र्नोऽन्तः स्याद् घुटि प्राग् धुटः ॥
स्वान्यसम्बन्धिनि प्राञ्च, तर्कं प्राञ्चः समाश्रिताः ॥६९॥

विश्वं-जगत् [illegible] ॥६४॥ अत इत्येव सिद्धे स्वरग्रहणमुत्तरार्थम् ॥६५॥ स्वरात् परो यो धुड्जातिस्तदन्तस्य नपुंसके शौ परे धुड्भ्यः प्राग् नोऽन्तः स्यादिति । सन्ति-निम्नगानि, पयांसि-वारीणि शर्मणे-सुखाय सन्ति-विद्यन्त इत्यर्थः ॥६६॥ ऊर्ञ्जि [illegible] , शोभना ऊर्जः येषु तानि ॥६७॥ [illegible] ॥६८॥ धुडन्तस्याञ्चतेर्धातोः स्वान्यसम्बन्धिनि घुटि परे धुटः प्राग् नोऽन्तः स्यादिति ॥६९॥

ऋदुदितः ॥१॥४॥७०॥

ऋदुदितो धुडन्तस्य, स्वान्यसम्बन्धिघुट्परे ॥
नोऽन्तः स्वराद् धुटः प्राक् स्यात्, सुदन् वालो भवेन् महान्॥

युञ्जोऽसमासे ॥१॥४॥७१॥

'युजृंपी योग' इत्यस्या-समासे प्राग् धुटो घुटि ॥
धुडन्तस्य भवेन्नोऽन्तो, युञ्जौ हस्तौ मतोऽञ्जलिः ॥७१॥

अनडुहः सौ ॥१॥४॥७२॥

अनडुहो धुडन्तस्य, स्वान्यसम्बन्धिसौ परे ॥
नोऽन्तो भवेद् धुटः पूर्वम-नड्वान् वृषभो महान् ॥७२॥

पुंसोः पुमन्स् ॥१॥४॥७३॥

स्वसम्बन्ध्यन्यसम्बन्धि-घुटि पुंसः पुमन्स् भवेत् ॥
पुमांसं सात्विकं नत्वा, सात्विकः संभवेत् पुमान् ॥७३॥

ओत औः ॥१॥४॥७४॥

ओकारस्य भवेदोतो, वहिते औः परे घुटि ॥
यद्गृहे गौश्चगावश्चेद्, व्यर्था द्यौस्तस्य गोमतः ॥७४॥

सुदन्निति—शोभना दन्ता यस्येति 'वयसि दन्तस्य दतृ' (७-३-१५१) इति दत्रादेशत्वाद् ऋदित्वात् सूत्रप्राप्तिरिति ॥७०॥ असमास इति—अश्वयुक्। युजिच् समाधावित्यस्य न, प्रकृत निर्देशवचनात्, तेन युजमापन्ना मुनय इति ॥७१॥ सान्विनि—अनड्वाहौ ॥७२॥ सूत्रे पुमानिति उदिदन्वितस्य स्यम्, वृत्तौ तु पुम इति पुंशब्दस्य स्पष्टप्रतिपत्त्यर्थमुदिद्वर्जितस्य स्यन् आकारस्य ओत एव विहित घुटि परे औ भवेदिति। ओत इति—चित्रगु ॥७४॥

आ अम् शसोऽता ॥२॥४॥७५॥

स्यादमृशसोरकारेण, ह्योकारस्याः सतां मते ॥
निपीय गा जिनेन्द्रस्य, गच्छ द्यां भव्य ! सत्वरम् ॥७५॥

पथिन्मथिनृभुक्षः सौ ॥१॥४॥७६॥

पथिन्–मथिन्–ऋभुक्षिन् चे–त्येषामन्तस्य सौ परे॥
नान्तानाम् आ भवेत् पन्था, गतो येन महाजनः ॥ ७६ ॥

ए· ॥१॥४॥७७॥

पथ्यादीनः च नान्ताना–मिकारस्य परे घुटि ॥
आकारः स्यात् सुपन्थानं, गन्ता मन्था हि कर्मणाम् ॥७७॥

थो न्थ् ॥१॥४॥७८॥

पथिनो मथिनश्चैव, नान्तयोस्थस्य घुट्परे ॥
न्थादेशो जायते नित्यं, पन्थान सौम्यमाश्रय ॥७८॥

इन् डीस्वरे लुक् ॥१॥४॥७९॥

पथ्यादीना च नान्ताना, लुप्यते इन्निति ध्रुवम् ॥

डौ स्याद्यघुट्स्वरादौ च, यायात् स्त्री सुपथी पथा ॥७९॥

वोशनसो नश्चामन्त्र्ये सौ ॥१॥४॥८०॥

आमन्त्र्ये सौ परे स्याता-मुशनसश्च नश्च लुक् ॥
वान्तादेशावुशनन् हे, उशन ! शिक्षायासुरान् ॥८०॥

उतोऽनडुच्चतुरो वः ॥१॥४॥८१॥

चतुरोऽनडुहो नित्य-मामन्त्र्ये सौ परे उतः ॥
स्यात् सस्वरो वकारोऽमु, हेऽनड्वन् ? हलिनं स्मर ॥८१॥

वाः शेषे ॥१॥४॥८२॥

अनडुच्चतुरोःशेषे, घुट्युकारस्य वाः स्मृतः ॥
यस्य धर्मा न चत्वारः, सोऽनड्वानिति गीयते ॥८२॥

सख्युरितोऽशावैत् ॥१॥४॥८३॥

इदन्तसखिशब्दस्य, स्यान्यसम्बन्धिनीष्यते ॥
शेषे घुटि शि भिन्ने चे-दैकारान्तः सखाय ए ? ॥८३॥

ऋदुशनस्पुरुदंशोऽनेहसश्च सेर्डाः ॥१॥४॥८४॥

ऋदुशनस्पुरुदंशो-ऽनेहोभ्यः सखिशब्दतः ॥
परस्य शेषसेर्डाः स्यात्, कर्ता कार्यमसौ सखा ॥८४॥

न तृन्मार्गेण यायात् ॥७९॥ आमन्त्र्य वर्तमानस्य उशनसूशब्दस्य सौ परे 'न-लुकौ' अन्तादेशौ वा स्यातामिति । उशना शुक्र । विकल्पपक्षे तु हे उशन इति ॥८०॥ हे अनड्वन् ? अमु हलिन-कर्षक स्मर, तत्र गुणदानृत्वात् । हे प्रियचत्व इत्यपि ॥८१॥ चत्वार -दान-शील-तपो-भावरूपा ॥८२॥ ए सखाय इति सखि शब्दस्य सम्बोधन बहुवचनम् ॥८३॥ ऋदिति-ऋदन्तस्येति । उशना, पुरुदंशा, अनेहा इत्युदाहरणानि ॥८४॥

नि दीर्घः ॥१॥४॥८५॥

शेषे घुटि परे यो नस्तस्मिन् प्राक्स्वरदीर्घता ॥
राजा धीमान् प्रजाप्रेमी, दयालुर्भुवि दुर्लभः ॥८५॥

न्स्महतोः ॥१॥४॥८६॥

शेषे, घुटि स्वरो दीर्घो, महतो नन्तसन्तयोः ॥
श्रेयो यशांसि वाञ्छन्तो, महान्तो यान्ति काननम् ॥८६॥

इन्हन्पूषार्यम्णः शिस्योः ॥१॥४॥८७॥

इनन्तस्य हनादीना, स्वरस्य शौ तथा च सौ ॥
शेषे दीर्घो भवेद् दण्डी, वाग्मी नूनं न संशयः ॥८७॥

अपः ॥१॥४॥८८॥

अपः स्वरस्य शेषे तु, घुटि भवति दीर्घता ॥
आपः स्त्रीभूम्नि तोये स्यात्, स्वाप् सरोजाञ्चितं सरः ॥८८॥

नि वा ॥१॥४॥८९॥

अपः स्वरस्य दीर्घो वा, नागमे सति घुट्परे ॥
सरासि स्वाम्पि चेत् स्नानं, स्वम्पि वा स्वस्थताप्रदम् ॥८९

अभ्वादेरत्वसः सौ ॥१॥४॥९०॥

अत्वन्तासन्तयोर्भ्वादि-वर्जितस्य स्वरस्य वै ॥

शेष इत्यत्र, शे गमन् ॥८५॥ महत–महच्छब्दस्यति ॥८६॥ स्वनाप्रभृत्युदाहरणान्यूह्यानि ॥८७॥ स्त्रीभूम्नि–स्त्रीलिङ्गे बहुवचने इति। वाराम्नि सु स्याद् इति ॥८८॥ स्वाम्पि–स्वम्पि–शोभनजल-र्म्नानानि ॥८९॥ चन्द्रमा इव भवान् भाति इत्यन्वय ॥९०॥ क्राष्टा–

दीर्घो भवति शेषे सौ, भवान् भातीव चन्द्रमाः ॥९०॥

क्रुशस्तुनस्तृच् पुंसि ॥१॥४॥९१॥

क्रुशः परं तुनः शेषे, घुटि तृच् पुंसि जायते ॥
क्रोष्टा पशोः कुले धूर्तो, नराणामिव नापित. ॥९१॥

टादौ स्वरे वा ॥१॥४॥९२॥

क्रुशः परं तुनष्टादौ, स्वरादौ तृज् विभाषया ॥
पुंसि क्रोष्ट्रा समुद्योगात्, कूपे सिंहो निपातितः ॥९२॥

स्त्रियाम् ॥१॥४॥९३॥

स्त्रीत्वेऽर्थे वर्तमानस्य, निर्निमित्तं क्रुश. परम् ॥
तृजादेशस्तुनः क्रोष्ट्री, क्रोष्टोरपि खलायते ॥९३॥

इति चतुर्थः पादः ॥ प्रथमोऽध्यायः ॥

शृगाल ॥९१॥ क्रोष्ट्रा—शृगालेन समुद्योगात् सिंह कूपे निपातित इति प्रसिद्धेय कथा ॥९२॥ क्रोष्ट्री—शृगाली । क्रोष्टो इति पूर्वसूत्रस्य वर्त्तिक मुदाहरण नेयम् ॥९३॥

॥ चतुर्थ पाद समाप्त ॥

॥ प्रथमोऽध्याय समाप्त ॥

अथ द्वितीयोऽध्यायः ॥

। प्रथमः पादः ।

त्रिचतुरस्तिसृचतसृ स्यादौ ॥२॥१॥१॥

स्यान्यसम्बन्धिनि स्यादौ, क्रमात् त्रिचतुरोः स्त्रियाम् ॥
तिसृचतसृ इत्येतौ, चतस्रः श्रुतयो मताः ॥ १ ॥

ऋतो रः स्वरेऽनि ॥२॥१॥२॥

ऋतस्तिसृचतस्रोः स्या-न्नकाराविषये स्वरे ॥
स्यादौ स्वेतरयोरत्वं राज्ञस्तिस्रो हि शक्तयः ॥ २ ॥

जराया जरस् वा ॥२॥१॥३॥

स्वान्यसम्बन्धिनि स्यादौ, स्वरादौ परतो नवा ॥
जराया जरमादेशो, जरसा हीयते रतिः ॥ ३ ॥

अपोऽद्भे ॥२॥१॥४॥

अपः स्यादौ भकारादौ, स्वान्यसम्बन्धिनि ध्रुवम् ॥
अदादेशः सदा स्वद्भिः, सरोभी राजते पुरम् ॥२॥१॥४॥

आ रायो व्यञ्जने ॥२॥१॥५॥

व्यञ्जनादौ परे स्यादौ, सम्बन्धिनि निजान्ययोः ॥
रैशब्दस्य भवेदात्व–मन्ते रा राति योग्यताम् ॥५॥

युष्मदस्मदोः ॥२॥१॥६॥

युष्मदोऽस्मद इत्यस्य, चाकारान्तो भवेत् किल ॥
व्यञ्जनादौ परे स्यादौ, त्वां मां च शिवमाप्नुयात् ॥६॥

टाङ्योसि यः ॥२॥१॥७॥

स्वसम्बन्ध्यन्यसम्बन्धि–स्यादिषु युष्मदस्मदोः ॥
टाङिओस्सु भवेद् योऽन्त–स्त्वयाऽध्येयं मया श्रुतम् ॥७।

शेषे लुक् ॥२॥१॥८॥

आत्वयत्वनिमित्तान्य–स्यादौ स्याद् युष्मदस्मदोः ॥
अन्त्यस्य लुग् नु युष्मभ्य, शमस्मभ्य च रोचते ॥८॥

मोर्वा ॥२॥१॥९॥

शेषे स्यादौ परे मो लुक्, स्यान्मन्तयुष्मदस्मदोः ॥
वाऽस्मभ्य शतमस्मभ्यं, धारयति स निष्कनान् ॥९॥

रा–धन योग्यता राति–ददातीति ॥५॥ षष्ठ्या निर्देशोऽन्त्यस्य कार्यमिति दकारस्य आकारादेशः । शिव कल्याणम्, त्वा मा कर्म ॥६॥ टाङिओस्सु–इत्यत्र सम्बन्धिग्रहण सम्बन्धिनिवृत्त्यर्थम् । त्वया–मया च श्रुतम् अध्येयमिति ॥७॥ नु–पादपूरणार्थं । युष्मभ्यम् अस्मभ्य च शं रोचत इति ॥८॥ युष्मान्, युष्मान् वा । अस्मान्, अस्मान् वा आचक्षाणेभ्यो णिचि क्विपि लुकि च—युष्मभ्यम्, युष्मभ्यम् अस्मभ्यम्, अस्मभ्यमिति ॥९॥

मन्तस्य युवाऽऽवौ द्वयोः ॥२॥१॥१०॥

युवावौ स्तो द्वयोरर्थे, मन्तस्य युष्मदस्मदोः ॥
स्यान्यस्यादौ यथासङ्ख्यं, युवामावां प्रबोधतम् ॥१०॥

त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ॥२॥१॥११॥

एकत्वे प्रत्यये स्यादौ, मान्तस्य युष्मदस्मदोः ॥
पदोत्तरे यथासङ्ख्यं, त्वमौ त्वां मां स रक्षतु ॥११॥

त्वमहं सिना प्राक् चाकः ॥२॥१॥१२॥

स्यान्यसम्बन्धिना सार्धं, सिना स्तो युष्मदस्मदोः ॥
त्वमहञ्च यथासङ्ख्यं, प्रागकोऽहं स्तुवे जिनम् ॥१२॥

यूयं वयं जसा ॥२॥१॥१३॥

जसा सह क्रमाद् यूयं, वयं च युष्मदस्मदोः ॥
अकः प्राक् चाऽधुना जातं, यूयं यूयं वयं वयम् ॥१३॥

तुभ्यं मह्यं ङया ॥२॥१॥१४॥

तुभ्यं मह्यं ङया साकं, क्रमात् स्तो युष्मदस्मदोः ॥
तुभ्यं नमो जिनेन्द्राय, मह्यं देहि सुखं विभो ॥१४॥

तव मम ङसा ॥२॥१॥१५॥

तवममौ ङसा साकं, क्रमशो युष्मदस्मदोः ॥

तव स्वं मत्कृते भूयात, मम स्वं त्वत्कृते क्वचित् ॥१५॥

अमौ मः ॥२॥१॥१६॥

मादेशो युष्मदस्मद्भ्याम्, अम्-औ इत्येतयोर्भवेत् ॥
त्वां च मां नीतवान् धर्म, तेनावां खलु धार्मिकौ ॥१६॥

शसो न. ॥२॥१॥१७॥

शसो हि युष्मदस्मद्भ्यां, नादेशो जायते यतः ॥
युष्मान् ब्रूमो वयं सत्यं, यूयं सद् वदतास्माकान् ॥ १७ ॥

अभ्यं भ्यस. ॥२॥१॥१८॥

तुर्याबहोर्भ्यसोऽभ्यं स्या-द्युष्मदस्मत्परस्य तत् ॥
युष्मभ्यं दीयतेऽस्मभ्यं, शं जिनेन नमोऽर्हते ॥१८॥

ङसेश्चाद् ॥२॥१॥१९॥

युष्मदस्मत्परस्य स्यात्, पञ्चम्याश्च भ्यसो ङसेः ॥
अदादेशो नियुक्तास्त्वद्, मत्तस्ते युष्मदस्मदा ॥१९॥

आम आकम् ॥२॥२॥२०॥

युष्मदस्मत्परस्यामः, स्थाने आकं भवेद् ध्रुवम् ॥

वृत्ति ॥१५॥ युष्मदस्मद्भ्यां परयोः अम्-औ इत्यनयोर्मादेशो भव-
दित्यन्वयः । स त्वां मां धर्मं प्रति नीतवान् तेन आवां धार्मिकौ स्व
स्यातामिति ॥१६॥ युष्मदस्मद्भ्यां परस्य शसः नादेशो जायते इति
॥१७॥ युष्मदस्मत्परस्य तुर्याबहो-चतुर्थीबहुवचनस्य भ्यसः 'अभ्यम्'
इत्यादेशः स्यादिति । जिनेन युष्मभ्यम् अस्मभ्यं च शं-कल्याणं दीयते इति
अर्हते नमः ॥१८॥ वा-इति वेदे मात्-त्वत् मत्, युष्मद्-युष्मत्,
अस्मद्-अस्मत् इति नियुक्त-निपात प्राप्ता ॥१९॥ हे जनाः युष्माक'

युष्माकं वैरिणो येऽर्ह—न्नस्माकं ते हि वैरिणः ॥२०॥

पदाद्युग्विभक्त्यैकवाक्ये वस्नसौ बहुत्वे ॥२॥१॥२१॥

बहुत्वे युग्विभक्त्यैक—वाक्ये चेद् युष्मदस्मदोः ॥
पदाद्वा वस्नसौ स्याता, धर्मो वो नोऽस्तु कामधुक् ॥२१॥

द्वित्वे वाम्नौ ॥२॥१॥२२॥

द्वित्वेऽर्थे युग्विभक्त्यै—कवाक्ये वा युष्मदस्मदोः ॥
पदाद्वाम्नौ यथासङ्ख्यं, धर्मो वा नौ च रक्षतु ॥२२॥

डेङसा ते मे ॥२॥१॥२३॥

एकवाक्ये पदादूर्ध्वं, ङेङसा युष्मदस्मदोः ॥
ते मे वा स्तः स श ते मे, ददूयात् श तेन तेऽस्तु मे ॥२३॥

अमा त्वा मा ॥२॥१॥२४॥

पदात्परं द्वितीयैक—वचसा युष्मदस्मदोः ॥
त्वा मा वा क्रमशस्त्वा मा, धर्मो रक्षति रक्षितः ॥२४॥

असदिवामन्त्र्यं पूर्वम् ॥२॥१॥२५॥

स्यात् प्रागमदिवामन्त्र्य, ताभ्या न स्यात्तथासति ॥
पूर्वोक्तिं तेन भो साधो—ऽस्मभ्य शर्म प्रदीयताम् ॥२५॥

ये मदादेशा वैरिण, ते हि—निश्चयेनास्माकं वैरिण इति ॥२०॥ धर्मो व.—नः युष्मान् अस्मान् प्रति, युष्मभ्यम् अस्मभ्य, युष्माकम् अस्माकञ्च कामधुक् अस्तु इति, द्विताचतुर्थीषष्ठीयुक्तेऽनुसन्धेयमर्थत ॥२२॥ ते–मे, तुभ्य, मह्यम् । ते–ते, तव–मम ॥२३॥ त्वा–मा, त्वा माम् ॥२४॥ सान्ता–युष्मदस्मद्भ्या प्राक्–पूर्वम्, आमन्त्र्यम् यदि न स्यात्, तथासति पूर्वोक्तं वस्नसादि न स्यादित्यर्थ ॥२५॥

जस्विशेष्यं वाऽऽमन्त्र्ये ॥२॥१॥२६॥

ताभ्या पूर्वं जसन्त त–द्विशेष्यं हि विशेषणे ॥
आमन्त्र्येऽसदिव स्याद्वा, जिना? धीरा व आश्रये ॥२६॥

नान्यत् ॥२॥१॥२७॥

ताभ्या पूर्वं जसन्तान्य–त्तदामन्त्र्यं विशेष्यकम् ॥
नैव विशेषणेऽसद्वत्, साधो? सन्? त्वा नमाम्यहम् ॥२७॥

पादाद्यो: ॥२॥१॥२८॥

पदात् परं यदुक्तं तत्, पादादौ वस्नसादि न ॥
वीरो विश्वेश्वरो देवो, युष्माकं कुलदेवता ॥२८॥

चाहहवैवयोगे ॥२॥१॥२९॥

चादिपञ्चकयोगे हि, वस्नसादि न जायते ॥
आत्मनीनः सदागम्यो, धर्मस्त्वां मां च रक्षतु ॥२९॥

दृश्यर्थैश्चिन्तायाम् ॥२॥१॥३०॥

चिन्तार्थकैर्हि दृश्यर्थ–धातुभिर्युष्मदस्मदोः ॥
वस्नसादि न जायेत, मनसा त्वा स पश्यति ॥३०॥

'व' इति [illegible], पक्षे 'युष्मान्' इति ॥[illegible]॥
साधो 'सन्' अत्र जसन्तादन्य[illegible] विशेषणमिति ॥२७॥ नित्य
[illegible] । [illegible] । [illegible] इति–[illegible]
देवा, युष्माकं कुलदेवता । [illegible] नाथा [illegible]–[illegible] ॥
इति पूर्णे [illegible] ॥२८॥ आत्मनीनः [illegible] न [illegible] चादि [illegible]
वस्नसादि स्यात् ॥२९॥ अत्र 'पश्यति' इत्यत्र [illegible] ॥३०॥

नित्यमन्वादेशे ॥२॥१॥३१॥

किञ्चिदुक्त्वा वचस्तस्या-न्यदन्वादेश उच्यते ॥
वस्नसादि ध्रुवं तस्मिन्, त्वं सॅस्तत्त्वे नमो नमः ॥३१॥

सपूर्वात् प्रथमान्ताद्वा ॥२॥१॥३२॥

सपूर्वात् प्रथमान्ताद्वा-ऽन्वादेशे वस्नसादयः ॥
त्वमसि सद्विनीतस्तद्, गुरुर्ज्ञानं ददाति ते ॥ ३२ ॥

त्यदामेनदेतदो द्वितीयाटौस्यवृत्त्यन्ते ॥२॥१॥३३॥

त्यदादेरेतदस्त्वन्वा-देश एनदिति ध्रुवम् ॥
द्वितीयाटौस्यवृत्त्यन्ते-ऽस्त्येतदेनद् गृहाण भोः ॥३३॥

इदमः ॥२॥१॥३४॥

पूर्ववदिदमश्चान्वा-देशे एनदितीष्यते ॥
उद्दिष्टोऽयं पुराऽध्यायो-ऽधुनैनं विवृणोतु सन् ॥३४॥

अद्व्यञ्जने ॥२॥१॥३५॥

अन् स्यादौ व्यञ्जनादौ स्या-दन्वादेशे इदं खलु ॥
इमकाभ्यामधीतं स-न्त्थो आभ्यामधीयते ॥३५॥

अनक् ॥२॥१॥३६॥

इदमद् व्यञ्जनादौ स्यात्, स्यादौ परेऽगविवर्जितः ।
इदमेभिः कृतं तस्मा-देभ्यो दानं प्रदीयताम् ॥३६॥

टौस्यनः ॥२॥१॥३७॥

टायामोसि परेऽनः स्या-दिदमस्तत्र चाग्युजः ॥
अनयोक्तः श्रुतोऽनेना-नयोः पाठः स्थिरोऽभवत् ॥३७॥

अयमियं पुंस्त्रियोः सौ ॥२॥१॥३८॥

पुंसि स्त्रिया परे सौ स्या-दिदमोऽयं क्रमादियम् ॥
अयं नेयं च नारी त-द्वय भ्राता स्वसा त्वियम् ॥३८॥

दो मः स्यादौ ॥२॥१॥३९॥

इदमो दस्य मः स्यादौ, त्यदादेः खलु जायते ॥
इमौ शास्त्रं पठेता चे-दिमौ ब्रूमो हि पण्डितौ ॥३९॥

किमः कस्तसादौ च ॥२॥१॥४०॥

क आदेशः किमः स्यादौ, तसादौ च परे भवेत् ॥
को धर्मो? यो दयामूलः, के धीराः? ये स्त्र्यनञ्चिताः ॥४०॥

आद्वेरः ॥२॥१॥४१॥

स्वे स्यादौ च वसादौ च, तौ द्वौ परमधार्मिकौ ।४१॥

तः सौ सः ॥२॥१॥४२॥

द्विपर्यन्तत्यदादीना, स्यादिसम्बन्धिसौ परे ॥
तकारस्य सकारस्स्यात्, स गप गतवान् शिवम् ॥४२॥

अदसो दः सेस्तु डौ ॥२॥१॥४३॥

त्यदादेः सौ परे दस्या–दसः सः सेस्तु डौः स्मृतः ॥
शान्तिप्रियो महात्माऽसौ, सदा शान्ति समीहते ॥४३॥

असुको वाऽकि ॥२॥१॥४४॥

त्यदादेरदसः साको, दस्य सः सादतश्च उत् ॥
डौत्वाभावश्च सेर्वा स्यात्, गतोऽसुकोऽसकौ ? पुरम् ॥४४॥

मोऽवर्णस्य ॥२॥१॥४५॥

त्यदादेरदमोऽवर्णा–न्तस्य दस्य तु मो भवेत् ॥
अमू वोरावमी दीना, यतोऽमी संसृति श्रिताः ॥४५॥

वाऽद्रौ ॥२॥१॥४६॥

अद्रानन्तेऽदसोदस्य, संभवेन्मो विभाषया ॥
अमुमुयङदद्र यङ्गो–ऽदमुयङ्गोऽमुमञ्चति ॥४६॥

मादुवर्णोऽनु ॥२॥१॥४७॥

अदसो मात्परस्य स्या-द्वर्णमात्रस्य सर्वतः ॥
पश्चादुवर्ण आदेशो, वन्देऽमुं जिनभास्करम् ॥४७॥

प्रागिनात् ॥२॥१॥४८॥

अदसो मादुवर्णः स्या-द्वर्णमात्रस्य प्रागिनात् ॥
अमुना कृतिना कार्यं, सत्कार्यं स्वात्ममुक्तये ॥४८॥

बहुष्वेरीः ॥२॥१॥४९॥

स्याद् बहुष्वदसो मात्तु, परैकारस्य नूनमीः ॥
अमी बाला अमीषां त-दमीभ्यः स ददाति तान् ॥४९॥

धातोरिवर्णोवर्णस्येयुव् स्वरे प्रत्यये ॥२॥१॥५०॥

इवर्णोवर्णयोर्धातोः, स्वरादौ प्रत्यये परे ॥
इयुवौ स्तो यथाह्वय, नेतारः श्रेयसा नियः ॥५०॥

इणः ॥२॥१॥५१॥

स्यादिणधातोर्यिादेशः, स्वरादौ प्रत्यये परे ॥
पान्थाः स्वनगरीमीयु-स्तस्माद् यन्तु पथाऽमुना ॥५१॥

संयोगात् ॥२॥१॥५२॥

इवर्णोवर्णयोर्धातो , संयोगात् प्रत्यये स्वरे ॥

भवेतामियुवौ कामं, शिश्रियुः सश्रियं जनम् ॥५२॥

भ्रूश्नोः ॥२॥१॥५३॥

स्वरादौ प्रत्यये भ्रूश्नोः, संयोगादुविधीयते ॥
आप्नुवन्ति हि ते श्वभ्रं, भ्रान्ता ये सुभ्रुवा भ्रुवा ॥५३॥

स्त्रियाः ॥२॥१॥५४॥

स्त्रीवर्णस्य त्वियादेशः, स्वरादौ प्रत्यये परे ॥
संसारे चेत् स्त्रियो नस्यु–रीयुः सर्वेऽपि श्रेयसम् ॥५४॥

वाम्शसि ॥२॥१॥५५॥

इयादेशः स्त्रियो वा स्या–दिवर्णस्यामि वै शसि ॥
स्त्रियं त्यज त्यजेत् स्त्री यत्, समीहन्ते स्त्रियः स्त्रियः ॥५५॥

योऽनेकस्वरस्य ॥२॥१॥५६॥

अनेकस्वरधातोरि–वर्णस्य यः प्रजायते ॥
स्वरादौ प्रत्यये निन्यु–र्मोक्षं शश्रञ्जिना जनान् ॥५६॥

स्यादौ वः ॥२॥१॥५७॥

अनेकस्वरधातोरु–वर्णस्य वो भवेत् परे ॥
स्वरादौ प्रत्यये स्यादौ, वस्त्रौ हि नमस्यतः ॥५७॥

क्विवृत्तेरसुधियस्तौ ॥२।१।५८॥

सुधीवर्जितक्विब्वृत्ते-रिवर्णोवर्णयोर्यवौ ॥
स्वरादौ प्रत्यये स्यादा-वुन्न्यः समीयुरुन्नतिम् ॥५८॥

दृन्पुनर्वर्षाकारैर्भुवः ॥२।१।५९॥

क्विब्वृत्तेर्दृन्पुनर्वर्षा-कारैस्सह भुवश्च वः ॥
स्वरादौ प्रत्यये स्यादौ, पुनर्भ्वो न पतिव्रताः ॥५९॥

णषमसत् परे स्यादिविधौ च ॥२।१।६०॥

इतः सूत्रात् समारभ्य, कार्यं यद्व विधास्यते ॥
तस्मिन् स्यादिविधौ चासन्, णत्वं षत्वं च जायते ॥६०॥

क्तादेशोऽपि ॥२।१।६१॥

क्तस्यादेशः षभिन्ने चेत्, कार्ये स्यादिविधौ तथा ॥
कर्तव्येऽसन् म विज्ञेयः ! क्षामिमानेनसः सुखी ॥६१॥

षढोः कः सि ॥२।१।६२॥

षस्य ढस्य सकारे हि, ककारः क्रियते बुधैः ॥
मुनि काञ्चनवर्णाभ-मद्राक्ष गहने वने ॥६२॥

भ्वादेर्नामिनो दीर्घो र्वोर्व्यञ्जने ॥२।१।६३॥

दीर्घः स्यान्नामिनो भ्वादे-स्तस्य रेफवकारयोः ॥

व्यञ्जनं स्यात्तदूर्ध्वं चेत्, मूर्च्छितो भुवि दीव्यति ॥६३॥

पदान्ते ॥२॥१॥६४॥

पदान्तभ्वादिमत्के रे, वकारे च परे भवेत् ॥
तस्यैव नामिनो दीर्घ, आशीर्वादोऽपि मङ्गलम् ॥६४॥

न यि तद्धिते ॥२॥१॥६५॥

न दीर्घो नामिनोर्वोः स्या–द्यकारादौ तु तद्धिते ॥
धुरं वहति धर्मस्य, धुर्यो धर्मधुरन्धरः ॥६५॥

कुरुच्छुरः ॥२॥१॥६६॥

रेफे परे न दीर्घः स्या–न्नामिनश्चेत् कुरुच्छुरोः ॥
कुर्याद्धर्मं यथाशक्ति, छुर्याच्च भवबन्धनम् ॥६६॥

मो नो म्वोश्च ॥२॥१॥६७॥

पदान्ते भ्वादिमान्तस्य, म्वोः परे चान्तिमस्य हि ॥
नोऽन्तः स्यात् श्लाघनीयोऽसौ, नृत्नेऽपि वयसि प्रशान् ॥६७॥

स्रंस्ध्वंसुक्वस्सनडुहो दः ॥२॥१॥६८॥

सकारान्तकसन्तस्य, स्रन्सुध्वंसनडुहा तथा ॥
अन्त्यस्य शब्दविद्भिः, पदान्ते दो विधीयते ॥६८॥

ऋत्विज्दिश्दृश्स्पृश्स्रज्दधृषुष्णिहो गः ॥२॥१६९

स्रजुदधृषुष्णिहश्चैव, ऋत्विजो दिशदृशोः स्पृशः ॥
गोऽन्तादेशः पदान्ते स्यात्, स्रुदृक् गजा विराजते ॥६९॥

नशो वा ॥२॥१॥७०॥

पदान्ते गोऽन्त आदेशो, नशधातोर्जायते नवा ॥
जीवनग् जीवनड् ज्ञेयो, यस्य धर्मो न रोचते ॥७०॥

युजञ्चक्रुञ्चो नो ङ. ॥२॥१॥७१॥

युजादीना नकारस्य, पदान्ते ङः प्रजायते ॥
युङ् चेन्मिलितः प्राङ्भ्यां, क्रुङ्षु कोलाहलो भवेत् ॥७१॥

सो रु. ॥२॥१॥७२॥

पदान्ते वर्तमानस्य, सकारस्य रुरुच्यते ॥
आशीर्नमःपद वस्तु-निर्देशो मङ्गल त्रिधा ॥७२॥

सजुष ॥२॥१॥७३॥

स्यात् सजुषो रुरादेशः, पदान्ते शब्दलक्षणे ॥
सजूर्भ्यां दम्पतीभ्या नौ, सजुषौ जनितौ सुतौ ॥७३॥

अह्नः ॥२॥१॥७४॥

पदान्तेऽह्नो भवेद् सः सो-ऽसँश्च स्यादिविध परे ॥
अयि निदाघ ? दीर्घाह-स्तेऽहस्तु तप्यते जनैः ॥७४॥

रो लुप्यरि ॥२॥१॥७५॥

पदान्तेऽह्नश्च रोऽन्तः स्या-ल्लुप्यरेफे परे सदा ॥
नाहर्भुङ्क्ते तपस्वी य-दहोरात्रं तपस्यति ॥७५॥

धुटस्तृतीयः ॥२॥१॥७६॥

पदान्ते वर्तमानाना, तृतीयः स्याद् धुटा स्वकः ॥
वागीश्वरी सदा वाग्भि-र्जगज्जाड्यमपाकरोत् ॥७६॥

गडदबादेश्चतुर्थान्तस्यैकस्वरस्यादेश्चतुर्थः स्ध्वोश्च प्रत्यये ॥७७॥

गडदबादि तुर्यान्तै-कस्वरस्य चतुर्थकः ॥

अत्र 'णषमसत्परे-' ।२।१।६०। इत्यतोऽसत्परे स्यादिविधौ चेति अनुवर्तते तेन दीर्घाह्ना निदाघ इत्यपि स्यात् । अयि दीर्घाहो निदाघ ? तेऽहस्तु जनैस्तप्यत इत्यन्वयः ॥७४॥ लुपि सत्या पदान्तेऽहन्शब्दस्य रन्तादेशो भवति, अरेफ पर-रेफपरे तु न भवतीत्यर्थः । पूर्वसूत्रापवादकमिदं सूत्रम् । तपस्वी सदा अह्नि भुङ्क्ते, यत् सोऽहोरात्रं तपस्यति, अहर्निशं न्याशी द्वितीया । अत्रानेन रत्वाभावे पूर्वेण रत्वं भवति अहोभुङ्क्ते इति रुफनिषेधाभावे [illegible] ॥७५॥ स्वकः-यद्वर्गीयो धुट् तद्वर्गीय इत्यर्थः ॥७६॥ गडदबादीति-गडदबादेः, तुर्यान्तस्य चतुर्थान्तस्य एकस्वरस्येत्यर्थः, धातोरित्यस्य विशेषणम्, कर्मधारय समासः । चतुर्थक-

धातोरादेः पदान्ते स्यात्, सादौ ध्वादौ च प्रत्यये ॥७७॥

धागस्तथोश्च ॥२॥१॥७८॥

तुर्यान्तस्य दधातेः स्या-द्गादिदस्य तथोः परे ॥
सादौ ध्वादौ चतुर्थो वै धत्ते धर्मः सुखे जनान् ॥७८॥

अधश्चतुर्थात् तथोर्धः ॥२॥१॥७९॥

धाभिन्नधातुसंस्थित्यो-श्चतुर्थात् परयोस्तथोः ॥
भवेद् धकार आदेशो, दोग्धा दोग्धुं हि गामगात् ॥७९॥

नाम्यन्तात् परोक्षाद्यतन्याशिषो धो ढः ॥२॥१॥८०॥

रेफनाम्यन्तधातूना, परोक्षाद्यतन्याशिषाम् ॥
विभक्तीना धकारस्य, ढः स्यादनीढ्वमम्बुधिम् ॥८०॥

हान्तस्थाञ्जीड्भ्यां वा ॥२॥१॥८१॥

अन्तस्थातो हकाराच्च, यो ञिजिटो ततः परम् ॥
परोक्षादेर्धकारस्य, ढो वा ग्राहिढ्वमुत्पथात् ॥ ८१ ॥

हो धुट्-पदान्ते ॥२॥१॥८२॥

हस्य ढत्वं भवेन्नित्यं, पदान्ते धुटि प्रत्यये ॥

मधुलिट् पद्मिनीसक्तो, वोढा दुःखमनीश्वरः ॥८२॥

भ्वादेर्दादेर्घः ॥२॥१॥८३॥

दादेर्भ्वादिहकारस्य, धुट्प्रत्ययपदान्तयोः ॥
घादेशो नहि केनापि, दग्धं दारिद्र्यमग्निना ॥८३॥

मुहद्रुहस्नुहस्निहो वा ॥२॥१॥८४॥

मुहद्रुहस्नुहां तद्वत्, स्निहश्च धुटि प्रत्यये ॥
पदान्ते हस्य घो वा स्यात्, द्रोग्धा द्रोढा समार्थकौ ॥८४॥

नहाहोर्धतौ ॥२॥१॥८५॥

नहेर्ब्रूस्थानजाताहो, धातोश्च धुटि प्रत्यये ॥
क्रमात् धतौ पदान्ते चो-पानत्कल्पं किमात्थ भोः ॥८५॥

चजः कगम् ॥२॥१॥८६॥

कगौ स्यातां पदान्ते च, धुडादिप्रत्यये चजोः ॥
वक्ता सत्यं वदेत् सेव, त्यक्ता स्यात् पापमोचकः ॥८६॥

[illegible] —[illegible] ॥८२॥ केनापि अग्निना दारिद्र्यं नहि दग्धमिति । [illegible] वह्निना, [illegible] सेवित, दग्धा वायु-[illegible] पुन [illegible] ॥ [illegible] पतिना, तेना-[illegible], [illegible] केनापि [illegible] नहि ॥१॥ इति [illegible] ॥८३॥ समार्थकौ—समानार्थकाविति ॥८४॥ [illegible] धुटि प्रत्यये पदान्ते च क्रमात् धतौ स्यातामित्यर्थः। [illegible] —वदति ॥८५॥ [illegible] वक्ता [illegible] त्यक्ता—त्यागी स्यात् ॥८६॥

यजसृजमृजराजभ्राजभ्रस्जव्रश्चपरिव्राजः शः षः ॥२॥१॥८७॥

चजोः शः षो यजादीनां, पदान्ते धुटि मन्यते ॥
देव यड्, राजसम्राड्, विभ्राड् सम्राड् प्रतन्यते ॥८७॥

संयोगस्यादौ स्कोर्लुक् ॥२॥१॥८८॥

संयोगस्यादौ स्कोर्लुक् पदान्ते धुटि मन्यते ॥
स्थाने लग्न अभ्रेमिको, भृज्जति तपसा भृगु ॥८८॥

पदस्य ॥२॥१॥८९॥

संयोगान्त पदान्त लु-गन्तादशो विधि स्थित ॥
पर स्यादिविधौ नाम, कुर्वन् देव पुमान् महान् ॥८९॥

नाम्नो नोऽनह्नः ॥२॥१॥९१॥

पदान्ते वर्तमानस्य, नाम्नोऽनह्नो लुगिष्यते ॥
नस्यासन् स विधौ स्यादेः, राजा वाग्मी कचिद्भवेत् ॥९१॥

नाऽऽमन्त्र्ये ॥२॥१॥९२॥

आमन्त्र्ये वर्तमानस्य, नाम्नो नस्य न लुग् भवेत् ॥
राजन्? प्रयततामात्म-ज्ञाने वै मुक्तिसाधने ॥९२॥

क्लीबे वा ॥२॥१॥९३॥

आमन्त्र्यविषये नाम्नो, नो लुक् क्लीबे विभाषया ॥
ब्रूते दशमुखो ब्रह्मन्?, पाठः सम्प्रत्यसाम्प्रतम् ॥९३॥

मावर्णान्तोपान्त्यापञ्चमवर्गान्मतोर्मो वः ॥२॥१॥९४॥

मान्ताच्च तदुपान्ताच्चा-वर्णान्तात्तदुपान्ततः ॥
नाम्नोऽपञ्चमवर्गान्ताद्, मतोर्वो मस्य शवताम् ॥९४॥

नाम्नि ॥२॥१॥९५॥

मतोर्मस्य वकारः स्यात्, संज्ञाया विदुषा मते ॥

अहन्[illegible]नस्य पदान्ते वर्तमानस्य नाम्नो नकारस्य लुक् स्यात्, स [illegible] स्यादि[illegible] [illegible] ॥९१॥ [illegible]म् ॥९२॥ पक्षे हे ब्रह्म? [illegible] । [illegible] नव [illegible]पूर्णा नहि [illegible]ता, [illegible] जल [illegible] ' [illegible] ', [illegible] ॥ [illegible] नारद ' स्तुतिकथा-[illegible] ' [illegible], [illegible] न लङ्केश्वर ॥१॥ [illegible]म् ॥९३॥ तदुपान्तात्-आपान्तात्, तदुपान्ततः-[illegible], [illegible] शमीवान्, [illegible]वान्, मालावान्, [illegible], [illegible]वान्, [illegible] इत्यादीन्युदाहरणानि ॥९४॥ अहीवत्याम्-

अष्ठीवत्या तरङ्गिण्या-मष्ठीना ननु शासनम् ॥९५॥

चर्मण्वत्यष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वत् ॥२।१।९६॥

एते शब्दा मतौ नाम्नि, निपात्यन्ते नु शाब्दिकैः ॥
चक्रीवान् गर्दभो यस्य, कुम्भकारः स भाग्यवान् ॥९६॥

उदन्वानब्धौ च ॥२।१।९७॥

मतावुदकशब्दस्य, मुदन्निति निपात्यते ॥
संज्ञायामुदधौ चैव-मुदन्वन्न घटे न तु ॥९७॥

राजन्वान् सुराज्ञि ॥२।१।९८॥

अनेन सुराज्ञि राजन्वान्, मतौ न लोपगमनात् ॥
राजन्वति भवेद् देशे, राजन्वती प्रजावनि ॥९८॥

नोर्म्यादिभ्यः ॥२।१।९९॥

ऊर्म्यादिभ्यः परे मस्य, मतौ वो नैव जायते ।
'नाम्नी'ति प्रतिरोधश्च, ऊर्मिमान् यवमो यथा ॥९९॥

मासनिशासनस्य शसादौ लुग्वा ॥२।१।१००॥

मासनिशासनानां लुक्, शसादौ स्यादिके न वा ॥
शसि मासि निशि नसः-ऽऽसनि भाति नहि ॥१००॥

दन्तपादनासिकाहृदयासृग्यूषोदकदोर्यकृच्छकृतो दत्पन्नस्-
हृदसन्यूषन्नुदन्दोषन्यकञ्शकन् वा ॥२॥१॥१०१॥

दन्तपादादिशब्दानां, क्रमाद् दत्पन्नसादयः ॥
नवा स्यादौ शसादौ स्यु-र्द्वन्द्वयां दन्ती विशिष्यते ॥१०१॥

यस्वरे पादः पदणिक्यघुटि ॥२॥१॥१०२॥

यस्वरे णिक्यघुड्भिन्ने, पादित्येतस्य पद् भवेत् ॥
स्वस्त्यस्तु द्विपदे तस्मै, गाथा यस्त्रिपदीं पठेत् ॥१०२॥

उदच उदीच् ॥२॥१॥१०३॥

यकारादौ स्वरादौ च, णिक्यघुड्वर्जिते परे ॥
उदचः स्यादुदीच् नित्य-मुदीची स्त्री कुलोत्तमा ॥१०३॥

अचच् प्राग् दीर्घश्च ॥२॥१॥१०४॥

अचश्चो जायते यादौ, स्वरे चाणिक्यघुट्परे ॥
तथाच प्राक्स्वरे दीर्घः, प्राचः श्रीर्वृणुते स्वयम् ॥१०४॥

क्सुष्मतौ च ॥२॥१॥१०५॥

णिक्यघुड्वर्जिते यादौ, स्वरादौ च मतौ परे ॥
स्मम उष मभवेद्विश्वं, विदुषा नैव दुष्यते ॥१०५॥

द्वन्द्वे दन्तान्यामिलादि । दन्ती—हस्ती ॥१०१॥ द्विपदे—नराय । त्रिपदी —छन्दोविशेषाम् ॥१०२॥ उदीची—उत्तरा, उत्तमा वा ॥१०३॥ प्राचः—पूर्वभागः ॥१०४॥ [illegible] [illegible] [illegible] [illegible] [illegible] ॥१०५॥

न व मन्तसंयोगात् ॥२॥१॥१११॥

वान्तान्मान्ताच्च संयोगा-द्नो नो लुगतो भवेत् ॥
सत्पर्वणा सुपर्वाणः, सत्कर्माणः सुकर्मणा ॥१११॥

हनो ह्ना घ्नः ॥२॥१॥११२॥

हन्तेर्ह्न इति रूपस्य घ्नादेशो जायते यतः ॥
भ्रूणघ्नी नरकं याति, घ्नन्ति भ्रूणान् हि दुर्भगाः ॥११२॥

लुगस्यादेत्यपद ॥२॥१॥११३॥

अपदादावकारे चै-कारे च लुगतो भवेत् ॥
ते नयन्ति कथं कालं, शास्त्रं नैव पठन्ति ये ॥११३॥

डित्यन्त्यस्वरादेः ॥२॥१॥११४॥

अन्त्यस्वरादिभागस्य, लुग् जायेत परे डिति ॥
मुनौ भवति मान्ना स्यात्, स्वसा वा निखिलाः स्त्रियः ॥११४॥

अवर्णादश्नोऽन्तो वातुरीङ्योः ॥२॥१॥११५॥

अन्तोऽवर्णात् परस्यातु-रीङी प्रत्यययोर्नवा ॥
श्नापरस्य न जायेत, तुदन्ती नुदती खरी ॥११५॥

॥ द्वितीयः पादः ॥

क्रियाहेतुः कारकम् ॥२॥२॥१॥

क्रियायाः कारणं शास्त्रे, भवेत् कारकसंज्ञकम् ॥
कर्तृकर्मादिभेदेन, षड्विधं तद्धि जायते ॥१॥

स्वतन्त्रः कर्ता ॥२॥२॥२॥

स्वातन्त्र्येण क्रियासिद्धौ, विवक्षा यस्य जायते ॥
सोऽर्थः कारकसंज्ञोऽपि, कर्ता शिष्येण पठ्यते ॥२॥

कर्तुर्व्याप्यं कर्म ॥२॥२॥३॥

आप्तुमिष्टतमं कर्तुः, क्रियया कर्मसंज्ञकम् ॥
देवं भज नयात्मानं, मोक्षं प्राप्नुहि सत्सुखम् ॥३॥

वाऽकर्मणामणिक्कर्ता णौ ॥२॥२॥४॥

अकर्मणामणिक्कर्ता, णौ सति कर्म वा भवेत् ॥
शिष्यः पठति शिष्येण, शिष्यं पाठयते गुरुः ॥४॥

कर्ता कर्म च करणं, सम्प्रदानं तथैव च ॥ अपादानाधिकरणे, इत्याहुः कारकाणि षट् ॥१॥ कर्ता-स्वतन्त्र ॥२॥ कर्म त्रिविधम्, निर्वर्त्य विकार्य [illegible], घटं करोति, काष्ठं दहति, ग्रामं [illegible]त्यादि ॥३॥ अकर्मणाम्-[illegible] [illegible] अणिक[illegible] [illegible] न कर्ता स णौ सति कर्म [illegible] ॥४॥

गतिबोधाहारार्थशब्दकर्मनित्याऽकर्मणामनी-
खाद्यदिह्वाशब्दायक्रन्दाम् ॥२॥२॥५॥

धीगत्यभ्यवहारार्थ-शब्दकर्म-म्नकर्मणाम् ॥
अन्यादीनामणौ कर्ता, णौ सति कर्म जायते ॥५॥

भक्षेर्हिंसायाम् ॥२॥२॥६॥

भक्षेर्हिंसार्थकस्याणौ, कर्ता णौ कर्म संभवेत् ॥
भक्षयति बलीवर्दान, सस्यं सत्रः पुपोषिषुः ॥६॥

वहेः प्रवेयः ॥२॥२॥७॥

अणिङ्कर्ता प्रवेयो णौ, वहः स्यात् कर्मसज्ञकः ॥
वाहयति बलीवर्दान, भारं वाहयिता जनः ॥७॥

हृक्रोर्नवा ॥२॥२॥८॥

कृगेर्नहृगेश्चाणौ, कर्ता णौ कर्म वा भवेत् ॥
कारयन्ति कटं भृत्यं, भृत्येन स्वामिनो जनाः ॥८॥

दृश्यभिवदोरात्मने ॥२॥२॥९॥

अभिपूर्वकवद्धातोः, पश्यतेश्चात्मनेपदे ॥
अणिकर्ता भवेत् कर्म, णौ वा दर्शयते शिशून् ॥९॥

नाथः ॥२॥२॥१०॥

व्याप्यं स्यान्नाथतेः कर्म, विषये वाऽऽत्मनेपदे ॥
सर्पिषो नाथते सर्पि-र्घृतस्य कामुको जनः ॥१०॥

स्मृत्यर्थदयेशः ॥२॥२॥११॥

स्मरणार्थदयेशानां, व्याप्यं वा कर्मसंज्ञकम् ॥
मातुः स्मरति बालोऽय, मातरं वा बुभुक्षितः ॥११॥

कृगः प्रतियत्ने ॥२॥२॥१२॥

करोतेः प्रतियत्नार्थ-कस्य व्याप्यं तु कर्म वा ॥
शतपत्रमुपस्कुर्या-च्छतपत्रस्य वा सरः ॥१२॥

रुजार्थस्याज्वरि सन्तापेर्भावे कर्तरि ॥२॥२॥१३॥

व्याप्यं कर्म रुजार्थस्य, भावे कर्तरि वा भवेत् ॥
ज्वरिसन्तापिभिन्नस्य, रुजेद्रोगः स्त्रिय स्त्रियः ॥१३॥

जासनाटक्राथपिषो हिंसायाम् ॥२॥२॥१४॥

जासादीना तु हिंसाया, व्याप्यं वा कर्म संभवेत् ॥

उन्नाटयति चौरस्य, चौरं वा चतुरो जनः ॥१४॥

निप्रेभ्यो घ्नः ॥२॥२॥१५॥

समस्तव्यस्तपर्यस्त निप्राभ्यां कर्म वा भवेत् ॥
हन्तेर्व्याप्यं तु हिंसायां, चौरं निहन्ति निर्दयः ॥१५॥

विनिमेयद्यूतपणं पणव्यवहोः ॥२॥२॥१६॥

विनिमेयस्तथा द्यूत-पणो वा कर्मसंज्ञकः ॥
व्याप्यं पणव्यवहार्थेऽ, शतं प्राणान् पणायति ॥१६॥

उपसर्गाद् दिवः ॥२॥२॥१७॥

सोपसर्गदिवो व्याप्या-युक्तौ वा कर्मसंज्ञकौ ॥
यस्यायुतस्य प्रद्यूत, लक्षं लक्षस्य न निश्चकृत ॥१७॥

न ॥२॥२॥१८॥

नोपसर्गदिवो व्याप्या-युक्तौ न कर्मसंज्ञकौ ॥

करणं च ॥२॥२॥१९॥

दीव्यतेः करणं कर्म-संज्ञं चात् करणं मतम् ॥
चाणक्यो मान्त्रिकैरक्षै-र्दीव्यत्यक्षान्नु नागरैः ॥१९॥

अधेः शीङ्स्थास आधारः ॥२॥२॥२०॥

अधिपूर्वकशीङ्स्थाऽऽसा-माधारः कर्मसंज्ञकः ॥
अधिशेते वनं ध्यान-मध्यममध्यामितो मुनिः ॥२०॥

उपान्वध्याङ्वसः ॥२॥२॥२१॥

उपान्वध्याङ्विशिष्टस्य, ह्याधारो वसतेर्भवेत् ॥
कर्मसंज्ञो महाग्राम-मावसेद् यः स नागरः ॥२१॥

वाऽभिनिविशः ॥२॥२॥२२॥

आधारो वा भवेत् कर्म-संज्ञोऽभिनिविशेरियम् ॥
व्यवस्थितविभाषा सोऽभिनिविष्टो दिवं सुखे ॥२२॥

कालाध्वभावदेशं वाऽकर्म चाकर्मणाम् ॥२॥२॥२३॥

कालाध्वभावदेशाना-माधाराणामकर्मणाम् ॥
कर्मत्वं वाऽपि तत्पक्षे-ऽकर्मता मासमासते ॥२३॥

अपायेऽवधिरपादानम् ॥२॥२॥२९॥

अपायावधिभूत यत्, तदपादानकारकम् ॥
जीर्णं पर्णं पतेद् वृक्षात्, तथैव चेतनो भवात् ॥२९॥

क्रियाश्रयस्याधारोऽधिकरणम् ॥२॥२॥३०॥

कर्मणः कर्तुराधारो-ऽधिकरणं तदुच्यते ॥
दिवि देवा नरा भूमौ, पाताले सन्ति पन्नगाः ॥३०॥

नाम्नः प्रथमैकद्विबहौ ॥२॥२॥३१॥

स्यादेकद्विबहावर्थे, आद्या नाम्नः सतः परा ॥
सि-औ-जस्-लक्षणा शुक्लः, शुक्लौ शुक्ला गुणाः सताम् ॥३१

आमन्त्र्ये ॥२॥२॥३२॥

आमन्त्र्येऽर्थे स्थितान्नाम्नो, विभक्तिः प्रथमा भवेत् ॥
भगवन्? भो महावीर?, रक्ष मां कर्मबन्धनात् ॥३२॥

गौणात् समयानिकषाहाधिगन्तराऽन्तरेणातियेन-तेनैर्द्वितीया ॥२॥२॥३३॥

स्यात् समयादिभिर्युक्ताद्, द्वितीया गौणनामतः ॥

[illegible]सार क्रियेयं योऽवधि सोऽनेकविधा विवक्षावशाद्विज्ञेयस्तदपादान[illegible]त्। एवं धनात् प्रमाद्यति, चौरेभ्यस्त्रायते इत्यादि बोध्यम् ॥२९॥ [illegible] [illegible] स्यात् [illegible] [illegible] येन तदाधारोऽधिकरणं स्यात्। स्थाल्या [illegible] पातीन्यत्र [illegible] आधार ॥३०॥ एक-द्वि-बहार्थे सतो-वर्तमा[illegible] नाम्न परा सि-औ-जस्लक्षणा [illegible]-प्रथमाविभक्ति स्यादित्यन्वेयम् ॥ [illegible] ॥ स्पष्ट ॥३२॥ निकषा [illegible] नदी, [illegible] [illegible] व्याधि, धिग्

६

समया सिद्धभूमिध्र, रम्या शत्रुञ्जयी नदी ॥३३॥

द्वित्वेऽधोऽध्युपरिभिः ॥२॥२॥३४॥

अधोऽध्युपरिभिर्युक्ताद्, द्वित्वे चेद्गौणनामतः ॥
द्वितीया, ह्यध्यधि ग्रामं, क्षेत्राणि सुखिनो जनाः ॥३४॥

सर्वोभयाभिपरिणा तसा ॥२॥२॥३५॥

सर्वादिभिस्तसन्तैः स्याद्, द्वितीया गौणनामतः ॥
वनानि सर्वतो ग्राम-मभितः परितस्तथा ॥३५॥

लक्षणवीप्स्येत्थंभूतेष्वभिना ॥२॥२॥३६॥

अभिना तेन यस्यार्था, वीप्स्येत्थंभूतलक्षणाः ॥
द्वितीया नामतो गौणा-द्विद्युद्विद्योततेऽभि तम् ॥३६॥

भागिनि च प्रतिपर्यनुभिः ॥२॥२॥३७॥

प्रतिपर्यनुभिर्युक्ताद्, भागिनो गौणनामतः ॥

जाल्मम्, अन्तराऽन्तरेण वा निषध नील च विदेहा अन्तरेण धर्म मुख न, अतिवृद्ध कुरून् महद् वलम्, येन पश्चिमा गत, तेन पश्चिमा नीत इत्यादि । समया—निकषा—समीपार्थके, हा—शोच्यार्थम्, धिग्—निन्दार्थम्, अन्तराऽन्तरेण—मध्यार्थे, विनार्थमप्यन्तरेण, अति—अतिक्रमार्थम्, येन तन—हेत्वर्थे ॥३३॥ एवम् अधोऽधोग्रामम्। उपर्युपरिग्राममित्याद्यवसेयम् ॥३४॥ सर्वादिभिस्तसन्तैरिति युक्तादितिशेष । एवमुभयत इत्यत्रापि बोध्यम् ॥३५॥ यस्य वीप्साकर्म वीप्स्यम्, इत्थभूत किञ्चित्प्रकारमापन्न, लक्षण चिह्नम्, एते अर्था भवन्ति तेन अभिना युक्ताद् गौणान्नामतो द्वितीया स्यात् । तत्प्रसिद्ध कञ्चनाभि विद्युद् विद्योतते । एव वृक्ष वृक्षमभिसेक । साधुर्मैत्रो मातरमभि ॥३६॥ स्त्रीकार्येऽशो भोगस्तत्स्वामी भागी तत उक्तार्थेषु

चोक्तार्थेषु द्वितीया मां, प्रति भागः स दीयताम् ॥३७॥

हेतुसहार्थेऽनुना ॥२॥२॥३८॥

गौणान्नाम्नो द्वितीयाऽनु–युक्ताद् हेतुसहार्थयोः ॥
अन्वागच्छन् सुराः शान्तिं, सेनाऽन्ववसिता नगम् ॥३८॥

उत्कृष्टेऽनूपेन ॥२॥२॥३९॥

उत्कृष्टेऽर्थे स्थिताद्गौणाद्, द्वितीयाऽनूपसंयुताद् ॥
अनु सिद्धं बुधास्तूप. हेमचन्द्रं नु शाब्दिकाः ॥३९॥

कर्मणि ॥२॥२॥४०॥

द्वितीया नामतो गौणाद्, भवेत् कर्मणि कारके ॥
जिनं नमति यो नित्यं, याति मोक्षमसंशयम् ॥४०॥

क्रियाविशेषणात् ॥२॥२॥४१॥

क्रियाविशेषणाद्गौणाद्, द्वितीया ननु नामतः ॥
मन्दं याति स्रग्वं शेते देवी गर्भभरालसा ॥४१॥

कालाध्वनोर्व्याप्तौ ॥२॥२॥४२॥

व्याप्तौ सत्यां द्वितीया स्यात्, कालाध्वगौणनामतः ॥
जीवनं सेवते धर्मं, संसारात् सैव मुच्यते ॥४२॥

सिद्धौ तृतीया ॥२॥२॥४३॥

कालाध्ववाचिनः सिद्धौ, तृतीया गौणनामतः ॥
मासेनावश्यकं सर्व-मधीते ननु बुद्धिमान् ॥४३॥

हेतुकर्तृकरणेत्थंभूतलक्षणे ॥२॥२॥४४॥

हेत्वादिचतुरर्थेषु, तृतीया गौणनामतः ॥
यशोऽर्हताऽऽप्तमात्मार्थ-सिद्ध्या सिद्धिश्च संगता ॥४४॥

सहार्थे ॥२॥२॥४५॥

सहार्थे नामतो गौणात्, तृतीया संभवेत् परा ॥
सहैव दशभिः पुत्रै-र्भारं वहति गर्दभी ॥४५॥

यद्भेदैस्तद्वदाख्या ॥२॥२॥४६॥

यत्प्रकारैर्विशेषः स्यात्, तद्वतो गौणनामतः ॥

जीवन-जीवन यावत्, एवमध्वव्याप्तौ क्रोश गिरिरित्यन्तसयोगस्तद भावे तु मासस्य मासे वा त्र्यह गुडधाना. ॥४२॥ सिद्धौ-फलनिष्पत्तौ द्योत्यायामन्यथा मासमधीत आचारो नानेन गृहीत इति ॥४३॥ आत्माथसिद्ध्याऽहता यश आप्तम् अत्र प्रथमे हेतौ द्वितीये कर्तरि पुन आत्मार्थसिद्ध्या सिद्धि सङ्गतेत्यत्र करणे तृतीयाऽवसेया । इत्थम्भूतलक्षणे तु अपि त्व कमण्डलुना छात्रमद्राक्षीरित्यादौ ॥४४॥ उदाहरणश्लोकपूर्वार्धमेवम्, ' एकेनापि सुपुत्रेण, सिंही स्वपिति निर्भरम्' इति ॥४५॥ आख्येति प्रसिद्धिपरिग्रहार्थम्,

तृतीयाऽऽख्या हि कारणात्स्ते, पार्दैः खञ्जा मुण्डैः खराः ॥४६॥

कृताद्यैः ॥२॥१॥४७॥

कृताद्यैः [illegible]–स्तृतीया, गौणनामतः ॥
[illegible] ॥, तेन मृगैण चार्यताम् ॥२॥२॥४७॥

काले मात्रयाऽऽधारे ॥२॥१॥४८॥

[illegible]– [illegible] नामतो नया ॥
[illegible] तृतीया स्या–द्दशान् पुष्येण पायसम् ॥४८॥

प्रसितोत्सुकावबद्धैः ॥२॥१॥४९॥

प्रसितादिनिर्युक्ता–दाधारे गौणतो नया ॥
तृतीया प्रसिताः केशैः, केशेषु [illegible] ॥४९॥

व्याप्ये द्विद्रोणादिभ्यो वीप्सायाम् ॥२॥१॥५०॥

द्विद्रोणप्रमुखाद्गौणा–न्नाम्नो व्याप्ये [illegible] नया ॥
[illegible] तृतीयाऽत्र, द्विद्रोणेन ददाति मः ॥५०॥

समो ज्ञोऽस्मृतौ वा ॥२॥१॥५१॥

[illegible] आनाति–र्व्याप्याद्वा गौणनामतः ॥

[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

तृतीया स्मृतिभिन्नेऽर्थे, सञ्जानीते स गां गवा ॥५१॥

दामः सम्प्रदानेऽधर्म्ये आत्मने च ॥२॥२॥५२॥

संदामः सम्प्रदानेऽर्थे–ऽधर्म्यरूपे नु नामतः ॥
स्यात् तृतीयाऽऽत्मनेरूपं, वृषल्या संप्रयच्छते ॥५२॥

चतुर्थी ॥२॥२॥५३॥

सम्प्रदाने स्थिताद्गौणा–च्चतुर्थी नामतो भवेत् ॥
शिष्येभ्यो ददतां विद्यां, कुशिष्याय न दीयताम् ॥५३॥

तादर्थ्ये ॥२॥२॥५४॥

तादर्थ्ये नामतो गौणा–च्चतुर्थी जायते ध्रुवम् ॥
षष्ठ्यपवादभूतेयं, यूपाय दारु नीयताम् ॥५४॥

रुचिकृप्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ॥२॥२॥५५

चतुर्थी नामतो गौणात्, रुचिकृप्यर्थधारिभिः ॥
प्रेयाद्यर्थे क्रमाज् ज्ञेया, धर्मो भक्ताय रोचते ॥५५॥

प्रत्याङः श्रुवार्थिनि ॥२॥२॥५६॥

गौणान्नाम्नश्चतुर्थी स्यात्, प्रत्याङ्पूर्वश्रृणोतिना ॥
इच्छुके वर्तमानं चेत्, तस्मै प्रतिशृणोति गाम् ॥५६॥

गा गोवा सञ्जानाति स्मरतीत्यर्थ ॥५१॥ एतद्योगे सदाम आत्मनेपदता। पत्न्यै सप्रयच्छतीत्यादावधर्म्याभावान्न तृतीया ॥५२॥ सूत्रे स्पष्टे ॥५३॥५४॥ रुच्यर्थैः कृप्यर्थैर्धारिणा च योगे क्रमश प्रेयविकारोत्तमर्णवृत्तेर्गौणान्नामतश्च तुर्थी । एव मूत्राय कल्पते यवागू, चैत्राय शत धारयतीत्यादि ज्ञेयम् ॥५५॥ एवम् आशृणोतीत्यत्रापि, याचितोऽयाचितो वा प्रतिजानीते इत्यर्थ. ॥५ ॥

प्रत्यनोर्गृणाख्यातरि ॥१॥१॥५७॥

गौणान्नाम्नश्चतुर्थी स्यात्, प्रत्यनुभ्यां गृणातिना ॥
आख्यातरि स्थितात् साधु-र्गुरवेऽनुगृणात्ययम् ॥५७॥

यद्वीक्ष्ये राधीक्षी ॥१॥१॥५८॥

यत् सम्बन्धिनि वीक्ष्ये स्यात्, राधीक्षी तत्र नामतः ॥
तुर्या राध्यति मित्राय, कामुकः स्त्रीभ्य ईक्षते ॥५८॥

उत्पातेन ज्ञाप्ये ॥१॥१॥५९॥

स्यादुत्पातेन विज्ञाप्ये, चतुर्थी गौणनामतः ॥
पीता वर्षाय विद्युत् स्यात्, दुर्भिक्षाय सिता भवेत् ॥५९॥

श्लाघ-ह्नु-स्था-शपा प्रयोज्ये ॥१॥१॥६०॥

ज्ञाप्ये श्लाघादिभिर्युक्ता-च्चतुर्थी गौणनामतः ॥
श्लाघते तिष्ठते सद्भ्यः, सज्जनः शपते ह्नुते ॥६०॥

तुमोऽर्थे भाववचनात् ॥२॥२॥६१॥

भवेत् स्वार्थे चतुर्थी ये, तुमोऽर्थे भाववाचिनः ॥
तदन्तान्नामतो गौणात्, याति लाभाय पत्तनम् ॥६१॥

गम्यस्याप्ये ॥२॥२॥६२॥

यद् गम्यस्य तुमो व्याप्यं, तुर्या तत्रत्यनामतः ॥
धर्माय याति-धर्मं स, याति श्रोतुमुपाश्रयम् ॥६२॥

गतेर्नवाऽनाप्ते ॥२॥२॥६३॥

असंप्राप्ते गतेराप्ये, तुर्या वा गौणनामतः ॥
मोक्षं गच्छति मोक्षाय, गुणस्थानक्रमान्मुनिः ॥६३॥

मन्यस्यानावादिभ्योऽतिकुत्सने ॥२॥२॥६४॥

तुर्या वा मन्यतेराप्ये-ऽनावादिभ्योऽतिकुत्सने ॥
न त्वा तृणाय मन्ये वा, तृणं सर्वतिरस्कृत ? ॥६४॥

हितसुखाभ्याम् ॥२॥२॥६५॥

तुर्या हितसुखाभ्यां वा, जायते गौणनामतः ॥
हितं लोकस्य लोकाय,, नूनं राज्ञा विधीयते ॥६५॥

तद्भद्रायुष्यक्षेमार्थार्थेनाशिषि ॥२॥२॥६६॥

हिताद्यर्थयुताद्गौणाद्, नाम्नस्तुर्या विभाषया ॥

स्पष्टम् ॥६१॥ धर्ममिति-गम्याभावाद् द्वितीया ॥६२॥ प्राप्त तु मोक्षं गत इति द्वितीयैव ॥६३॥ हे सर्वतिरस्कृत ? त्वा तृण वा न मन्य इत्यन्वय । न त्वा नावमन्न शुक शृगाल काक वा मन्ये इत्यादौ नावादि-वर्जनान्न चतुर्थी । कुत्सनाभावेतु न त्वा रत्न मन्ये इत्यादावपि न चतुर्थी ॥६४॥ एव सुखमित्यत्रापि ज्ञेयम ॥६५॥ विकल्पपक्षे प्रजानामिति ।

आशिषि गम्यमानायां, प्रजाभ्यः स्तात् सदा शिवम् ॥६६॥

परिक्रयणे ॥२॥२॥६७॥

परिक्रीधातुना योगे, वेतनार्थकनामतः ॥
ज्ञेया तुर्या विभक्तिर्वा, परिक्रीतः श्रियै श्रिया ॥६७॥

शक्तार्थवषड्नमःस्वस्तिस्वाहास्वधाभिः ॥२॥२॥६८॥

गौणान्नाम्नश्चतुर्थी स्या-च्छक्तार्थैर्वषडादिभिः ॥
मोक्षाय ज्ञानिनः शक्ता, देवेभ्योऽस्तु नमो नमः ॥६८॥

पञ्चम्यपादाने ॥२॥२॥६९॥

पञ्चमी नामतो गौणात्, स्यादपादानकारके ॥
चैत्रो ग्रामात् समायाति, सरिता पतिता गिरेः ॥६९॥

आङावधौ ॥२॥२॥७०॥

आङ् मर्यादाभिविध्योश्च-त्तद्योगे पञ्चमी मता ॥
आगिरेर्वारिदो वृष्ट, आमुक्तेर्ननु संसृतिः ॥७०॥

पर्यपाभ्यां वर्ज्ये ॥२॥२॥७१॥

वर्ज्येऽर्थे वर्तमानाभ्यां, पर्यपाभ्यां नु पञ्चमी ॥
विज्ञेया नामतो गौणाद्, अनार्याः परि भारतात् ॥७१॥

[illegible] ॥६६॥ [illegible] ॥६७॥ [illegible], [illegible] प्रजाभ्य, स्वाहेन्द्राय, [illegible] ॥६८॥ [illegible] ॥६९॥ [illegible] ॥७०॥ [illegible] ॥७१॥

यतः प्रतिनिधिप्रतिदाने प्रतिना ॥२॥२॥७२॥

प्रतिनिधौ प्रतिदाने, प्रतिना पञ्चमी भवेत् ॥
वैशेषिकः प्रति न्यायाद्, दौर्जन्यात् प्रति ताडनम् ॥७२॥

आख्यातर्युपयोगे ॥२॥२॥७३॥

प्रतिपादयितुर्नाम्न, उपयोगे तु पञ्चमी ॥
उपाध्यायादधीते सन्, शृणोति नर्तकस्य ना ॥७३॥

गम्ययपः कर्माधारे ॥२॥२॥७४॥

गम्यस्य यौ यबन्तस्य, कर्माधारौ ततो भवेत् ॥
पञ्चमी प्रेक्षते वृक्षाद्, भुङ्क्ते सज्जन आसनात् ॥७४॥

प्रभृत्यन्यार्थदिक्शब्दबहिरारादितरैः ॥२॥२॥७५॥

प्रभृत्यन्यार्थदिक्शब्दै-र्बहिराराच्च पञ्चमी ॥
इतरेणापि विज्ञेया, ज्ञानं नैवात्मनो बहिः ॥७५॥

ऋणाद्धेतोः ॥२॥२॥७६॥

हेतुभूताद्दणान्नाम्नो, नो तृतीया तु पञ्चमी ॥
अल्पायश्चेच्छताद् बद्धः, स्वल्पायुश्चितन्या तया ॥७६

स्पष्टम् ॥७२॥ ना—नर नर्तकस्य शृणोतीत्यत्रोपयोगाभावात् पञ्चम्य भाव, सत्युपयोगे तु भवेदिति ॥७३॥ वृक्षाद्—वृक्षमारुह्य । आसनाद्—आसने उपविश्य ॥७४॥ तत प्रभृति, ग्रीष्मादारभ्य, अन्यो भिन्नो वा मैत्रात्, ग्रामात् पूर्वस्या वसति, उत्तरो विन्ध्यात् पारियात्र, पश्चिमो रामाद् युधिष्ठिर, आरात्, इतरा वा ग्रामात् इत्यादि बोध्यम् ॥७५॥ तृतीयाऽपवाद । अल्पलाभो यदि शताद् बद्धस्तदा तया तत्कृतया चिन्तया स्वल्पायु र्भवति ॥७६॥

गुणादस्त्रियां न वा ॥२।२।७७॥

पञ्चमी हेतुभूतात् स्यात्, वाऽस्त्रियां गुणवाचिनः ॥
जाड्याद् बद्धः स जाड्येन, प्रज्ञया परिवर्जितः ॥७७॥

आराद्र्थैः ॥२।२।७८॥

स्याद् दूरान्तिकयोराराद्, तदर्थे पञ्चमी नवा ॥
धनाद् धनस्य दारिद्र्यं, दूरं तिष्ठति निश्चयम् ॥७८॥

स्तोकाल्पकृच्छ्रकतिपयादसत्त्वे करणे ॥२।२।७९॥

असत्त्वे करणे स्तोका-दिभ्यो वा पञ्चमी मता ॥
अल्पेन मधुना मत्तो, हन्यतेऽल्पाद्विपाज्जनः ॥७९॥

अज्ञाने ज्ञः षष्ठी ॥२।२।८०॥

अज्ञानार्थस्य जानातेः, करणे नामतो भवेत् ॥
षष्ठी नालः स जानीते, मधुनो मधुरप्रियः ॥८०॥

शेषे ॥२।२।८१॥

नामार्थकारकाद्भिन्नः सम्बन्धः शेष उच्यते ॥
तदर्थे नामतः षष्ठी, स्वामी धर्मस्य तीर्थकृन् ॥८१॥

[illegible] प्रज्ञया परिवर्जित इति ॥७७॥ एवमन्तिकमभ्याश [illegible] ॥७८॥ अस्यार्थ—यतो द्रव्ये शब्दप्रवृत्ति[illegible] इत्यादि, तस्मिन् करणे [illegible] स्तोकादिभ्य [illegible] वा स्यात । एवं स्तोकेन स्तोकेन वा [illegible] इत्यादि वाच्यम ॥७९॥ [illegible] जानाति ॥८०॥ [illegible] ॥८१॥

रिरिष्टात्स्तादस्तादसतसाता ।।१।।१।।८१।।

रिरिष्टात्प्रमुखान्ताना, योगे पष्ठी प्रजायते ॥
वृक्षस्योपरि शाखाया, मधा कूजति कोकिलः ॥८२॥

कर्मणि कृतः ।।१।।१।।८३।।

गौणान्नाम्नो भवेत् पष्ठी, कृदन्तस्य तु कर्मणि ॥
ज्ञाता विश्वस्य सर्वज्ञः, कर्ता ज्ञातैव कथ्यते ।।८३।।

द्विषो वाऽतृशः ।।१।।१।।८४।।

स्यादतृशूप्रत्ययान्तस्य, द्विपः कर्मणि नामतः ॥
वा षष्ठी द्विषतो लोकान्, लोकानां शासिता प्रभुः।।८४।।

वैकत्र द्वयोः ।।१।।१।।८५।।

द्विकर्मधातुभिः पष्ठी, वा कृदन्तैस्तु कर्मणि ॥
गौणे मुख्ये तु नित्यैव, नेताश्वस्य पुर पुरः ।।८५।।

कर्तरि ।।१।।१।।८६।।

गौणान्नाम्नो भवेत् पष्ठी, कृदन्तस्य तु कर्तरि ॥

मधौ—चैत्रे मासि, वसन्त वा । एवम् उपरिष्टात् , परस्तात् , पुरस्तात् , पुर॰, दक्षिणत , उत्तराद् इत्यादियोगेऽप्युन्नेयम् ॥८२॥ ' सर्वभावेषु कर्तृत्व, ज्ञातृत्व यदि समतम । मत न सन्ति सर्वज्ञा, मुक्ता कायभृतोऽपि च ' ।७।७। इति वीतरागस्तोत्रश्लोकोद्‌बोधकमुदाहरणम् ॥८३॥ प्रभु —राजा ॥८४॥ कृदन्तै —कृत्प्रत्ययान्तैर्द्विकर्मधातुभिर्योगे गौणे कर्मणि षष्ठी वा स्यादिति । पुर, पुर —अत्र रेफान्त पुर—शब्द । कर्मणा गौणता मुख्यता च विवक्षाधीनेति नेताऽश्व पुर इत्यपि ॥८५॥ आसिका—आसनस्थिति । कर्तरीति

लोकोत्तरचमत्कारं, धत्ते भवत आसिका। ।८६॥

द्विहेतोरस्त्र्यणकस्य वा ॥२॥२॥८७॥

स्त्र्यणकान्यकृतो हेतोः षष्ठी कर्तरि वा द्वयोः ॥
पयसः खलु मैत्रस्य, पानं मैत्रेण शोभनम् ॥८७॥

कृत्यस्य वा ॥२॥२॥८८॥

कृत्यस्य कर्तरि गौणा—न्नाम्नः षष्ठी विभाषया ॥
शास्त्रं वै भवतोऽध्येयं, शमनीयं त्वया मनः ॥८८॥

नोभयोर्हेतोः ॥२॥२॥८९॥

उभयोर्हेतुभूतस्य, कृत्यस्य कर्तृकर्मणोः ॥
योगे षष्ठी न जायेत, नेया ग्राममजा त्वया २॥८९॥

तृन्नुदन्ताव्ययक्वस्वानातृश्शतृङिणकच्खलर्थस्य ॥२॥२॥९०॥

तृन्नुदन्तादियोगे तु, षष्ठी न कर्तृकर्मणोः ॥
सच्छास्त्रं मनसाऽधीयन्, हन्ता मोहादिकानरीन् ॥९०॥

टी॰ ॥ स्पष्टं शास्त्रि ॥॥८७॥ अस्यार्थ —स्त्र्यधिकार-विहिताभ्यामणकाभ्यामन्य-न कृ॰ -कर्तृकर्मणोर्हेतोः कृत कर्तरि षष्ठी वा स्यादिति अस्त्र्यणकस्येति ... चिकीर्षा मैत्रस्य काव्यानाम् , भेदिका चैत्रस्य काष्ठानामिति ॥ ।८७॥ स्पष्टं ॥८८॥८९॥ कन्यामलङ्करिष्णु, कटं चारु याति, ओदनं पेचि-वे, कटं चकृवान् कटं कुर्वन्, परिक्रामन् मासहि, कटं कारको व्रजति, ... त्वया, उदाहरणानीमानि क्रमशः उदन्ता-व्यय-क्वसु-आन-शतृ ... -आदिचू-... नामानि ।।९०॥

क्तयोरसदाधारे ॥२॥२॥९१॥

आधारवर्तमानार्था-ऽन्यक्तक्तवतुयोगिनः ॥
न षष्ठी कर्मणः कर्तुः, फलं जग्धं वनं गतः ॥९१॥

वा क्लीबे ॥२॥२॥९२॥

क्लीबेऽर्थे विहितक्तस्य, कर्तुः षष्ठी भवेन्नवा ॥
नृत्तं मत्तमयूरस्य, वीक्ष्यैवानन्दितं जनैः ॥९२॥

अकमेरुकस्य ॥२॥२॥९३॥

उकान्तस्याकमेर्नित्यं, भवेत् षष्ठी न कर्मणि ॥
स्त्रियः कामुकता मुञ्च, मोक्षं यद्यभिलापुकः ॥९३॥

एष्यदृणेनः ॥२॥२॥९४॥

एष्यत्यर्थे ऋणे चेनो, णिनः षष्ठी न कर्मणि ॥
शतं दायी गमी स्वर्गं, साधुदायी धनस्य च ॥९४॥

सप्तम्यधिकरणे ॥२॥२॥९५॥

स्यादधिकरणे गौणा-न्नामतो ननु सप्तमी ॥
तैलं तिलेषु चैतन्यं, तथैवात्मनि राजते ॥९५॥

नवा सुजर्थैः काले ॥२॥२॥९६॥

स्यादधिकरणे काले, वारार्थप्रत्ययान्तकैः ॥

असदाधार इति किम् ? राज्ञा पूजितः, इह सक्तूना पीतम् ॥९१॥ सूत्रत्रिक व्यक्तार्थम् ॥९२॥९३॥९४॥ अधिकरणं षोढा वैषयिकौपश्लेषिका-भिव्यापक-सामीप्यकनैमित्तिकौपचारिकभेदात् । तत्र प्रस्तुते उदाहरणे अभिव्यापकस्य । अन्यान्युदाहरणानि क्रमशः-दिवि देवाः, कटे आस्ते, वटे गावः, युद्धे सन्नह्यते, अङ्गुल्यग्रे करिशतमिति ॥९५॥ काल इति किम् ?

अप्रत्यादावसाधुना ॥२॥२॥१०१॥

सप्तमी नामतो गौणा-दसाधुशब्दसंयुतात् ॥
प्रत्यादीनां प्रयोगे न, मैत्रोऽसाधुर्विमातरि ॥१०१॥

साधुना ॥२॥२॥१०२॥

साधुशब्दयुतान्नाम्नो-ऽप्रत्यादौ सप्तमी भवेत् ॥
साधव स्युः सुधर्मे ये, विश्वे ते हि सुसाधवः ॥१०२॥

निपुणेन चार्चायाम् ॥२॥२॥१०३॥

साधुनिपुणयोर्युक्ता-न्नाम्नोऽर्चाया नु सप्तमी ॥
मातरि निपुणः साधुः, पितरि सज्जनो जनः ॥१०३॥

स्वेशेऽधिना ॥२॥२॥१०४॥

ईशितव्ये तथेशे चा-धिना युक्तान्नु सप्तमी ॥
अध्यवन्तिषु प्रद्योतः, प्रद्योते त्वध्यवन्तयः ॥१०४॥

उपेनाधिकिनि ॥२॥२॥१०५॥

अधिकिनि स्थितान्नाम्नः, सप्तमी तूपसंयुतात् ॥
उपखार्यां भवेद् द्रोणः, खार्यां द्रोणोऽधिकाधिकः ॥१०५॥

यद्भावो भावलक्षणम् ॥२॥२॥१०६॥

एकया क्रिययाऽन्या चेत्, क्रिया यत्रैव लक्ष्यते ॥

प्रत्यादिना योगे तु असाधुर्मैत्रो विमातरं प्रति, एवं परि, अनु, अभि योगेऽप्यवसेयमिति ॥१०१॥ स्पष्टम् ॥१०२॥ प्रत्यादियोगे नेति ज्ञेयमत्रापि ॥१०३॥ अवन्तिषु ईशितव्ये सप्तमी, प्रद्योत ईशे सप्तमी । प्रद्योतोऽवन्तीनामधीश ॥१०४॥ स्पष्टम ॥१०५॥ अत्र गायनस्य गानकरणसमयो नियतस्तन

पञ्चमी सप्तमी च स्यात्, माषान्माषेऽधिकोऽक्षतः ॥१११॥

तृतीयाऽल्पीयसः ॥२॥२॥११२॥

अधिकेन तृतीया स्याद्–ल्पीयोवाचिना मता ॥
द्रोणेन त्वधिका खारी, खारी द्रोणचतुष्टयम् ॥११२॥

पृथग् नाना पञ्चमी च ॥२॥२॥११३॥

पृथक्नानायुतान्नाम्न–स्तृतोया पञ्चमी तथा ॥
पृथक् धर्मेण संसारो, नानाऽधर्मात् भवेच्छिवम् ॥११३॥

ऋते द्वितीया च ॥२॥२॥११४॥

ऋतेयुक्ताद्भवेन्नाम्नो, द्वितीया चैव पञ्चमी ॥
अङ्गं स्वस्थमृते रोगम्, ऋते धर्मात् कुतः सुखम् ॥११४॥

विना ते तृतीया च ॥२॥२॥११५॥

विनायोगे द्वितीया स्याद्, तृतीया पञ्चमी तथा ॥
वातं वातेन वाताद्वा, विना जातु न जीवनम् ॥११५॥

तुल्यार्थैस्तृतीयाषष्ठ्यौ ॥२॥२॥११६॥

तुल्यार्थैः संयुतात् षष्ठी, तृतीया गौणनामतः ॥
भवेत् पुत्रः पितुस्तुल्यः, पुत्री मात्रा समा मता ॥११६॥

द्वितीयाषष्ठ्यावेनेनानञ्चेः ॥२॥२॥११७॥

एनान्तेन युताद् षष्ठी, द्वितीयाऽञ्चेः परं न चेत् ॥

इति माषशब्दात् पञ्चमी सप्तमी चानेनेति ॥१११॥ अधिकेन–युक्तादिति शेष ॥११२॥ पृथग्–अन्य, नाना–विनार्थम् ॥११३॥ स्पष्टे॥११४॥११५॥ समा–समाना ॥११६॥ पूर्वेणेति–पूर्वात् ‘ अदूरे एन. ’ ७।२।१२२। इतिएनः,

ग्रामं ग्रामस्य पूर्वेण, ग्रामात् प्राग् राजते गिरिः ॥११७॥

हेत्वर्थैस्तृतीयाद्याः ॥२॥२॥११८॥

हेत्वर्थैः स्युस्तृतीयाद्याः, पञ्चापि ता विभक्तयः ॥
धनेन हेतुना हेतौ, धने श्राम्यति किङ्करः ॥११८॥

सर्वादेः सर्वाः ॥२॥२॥११९॥

हेत्वर्थैः सयुतात् सर्वाः, सर्वादेः स्युर्विभक्तयः ॥
को हेतुर्हेतुना केन, कस्य हेतोरिदं कृतम् ॥११९॥

असत्त्वारादर्थाट्टाङसिङ्यम् ॥२॥२॥१२०॥

आरादर्थादसत्त्वाट्टा-ङसिङ्यंप्रत्यया मताः ॥
दूराद् दूरेण दूरे वा, दूरं मोहाद्वसेन्मुनिः ॥१२०॥

जात्याख्यायां नवैकोऽसंख्यो बहुवत् ॥२॥२॥१२१॥

जात्याख्यायां भवेदेको-ऽसंख्यश्चेद्बहुवन्नवा ॥
सम्पन्नो व्रीहिरद्यत्वे-ऽधर्माधिक्यान्न जायते ॥१२१॥

अविशेषणे द्वौ चास्मदः ॥२॥२॥१२२॥

अस्मदा द्व्येकयोर्वा स्या-द्बहुत्वमविशेषणे ॥

[illegible]न्तात्स 'अण्' ।१।१।३२। इत्यव्ययत्वम् ॥१७॥ एवं धनाय हेतवे, [illegible]नादे॥, [illegible] इत्यादि बोध्यम् । निमित्तादिभिरप्येवमेवेति॥११८॥
[illegible] हेतुम्, [illegible], [illegible]स्माद्धेतो, [illegible]स्मिन् हेतावित्याद्युन्नेयम्॥११९॥
[illegible]नान्तिकेनेत्यादि । असत्त्वेति—दूर [illegible] इत्यादौ न ॥१२०॥
[illegible]विशेषणविमुक्त । [illegible] व्रीहय इति वैकल्पिकमुदाहरणम् ॥१२१॥ अविशेषण इति किम्? [illegible] गार्ग्यो [illegible], अहं चैत्रो

आवां ब्रूवो वयं ब्रूमो, वयं किलब्रवीम्यहम् ॥१२२॥

फल्गुनीप्रोष्ठपदस्य भे ॥२॥२॥१२३॥

फल्गुनीप्रोष्ठपदयो–र्नक्षत्रे वर्तमानयोः ॥
द्वित्वे ज्ञेयं वहुत्वं वा, पूर्वाः प्रोष्ठपदाः कदा ॥१२३॥

गुरावेकश्च ॥२॥२॥१२४॥

स्याद् गुरौ गौरवार्हेऽर्थे, शब्दस्य द्व्येकयोर्नवा ॥
वहुत्वं मे इमे पूज्या, गुरवश्च गुरुस्तथा ॥१२४॥

॥ इति द्वितीयपादः ॥

ब्रवीमि ॥१२२॥ भभिन्ने तु–फल्गुनीषु जाते फाल्गुन्यौ कन्ये इत्यादि ॥१२३॥ स्पष्टम् ॥१२४॥

॥ इति द्वितीयपाद ॥

नमस्पुरसो गतेः कखपफि रः सः ॥२॥३॥१॥

स्यान्नमस्पुरसोर्नित्यं, शब्दयोर्गतिसंज्ञयोः ॥
कखपफेषु रेफस्य, सत्वं देवान्नमस्कुरु ॥ १ ॥

तिरसो वा ॥२॥३॥२॥

गतिसंज्ञतिरोरस्य, सो वा स्यात् कखयोः पफोः ॥
तिरस्करोति यो धर्मं, तिरःकर्ता स आत्मनः ॥ २ ॥

पुंसः ॥२॥३॥३॥

पुंसः शब्दस्य रेफस्य, सत्वं कखपफेषु वै ॥
पुस्कोकिलः कुहू कृत्वा, पान्थान् हन्ति वियोगिनः ॥३॥

शिरोऽधसः पदे समासैक्ये ॥२॥३॥४॥

पदशब्दे समासैक्ये, रः सत्वं शिरसोऽधसः ॥
कृत्वा शिरस्पदं विष्णु–र्नीतवान् तमधस्पदम् ॥४॥

अतः कृकमिकंसकुम्भकुशाकर्णीपात्रेऽनव्ययस्य ॥२॥३॥५॥

अनव्ययस्य रेफस्या–त्परस्य कृकमादिषु ॥
सत्वं भवेत् समासैक्ये, पयस्पात्रमयस्कृतम् ॥ ५ ॥

प्रत्यये ॥२॥३॥६॥

अनव्ययस्य यो रेफ–स्तस्य सत्वं नु प्रत्यये ॥
कादौ पादौ यशस्कल्पं, जगज्जनः प्रबोधतात् ॥ ६ ॥

रोः काम्ये ॥२॥३॥७॥

अनव्ययस्य रेफस्य, रोरेव काम्यप्रत्यये ॥
सत्वं भवेन्नरो नूनं, यशस्काम्यन् हितं चरेत् ॥७॥

नामिनस्तयोः षः ॥२॥३॥८॥

काम्ये रोरेव कादौ पः, प्रत्यये रस्य नामिनः ॥
धनुष्पाशं धनुष्कल्प, धानुष्कः क्रमते धनुः ॥८॥

निर्दुर्बहिराविष्प्रादुश्चतुराम् ॥२॥३॥९॥

निरादीनां कपादौ नु, पत्वं रेफस्य जायते ॥
दुष्कृत चेद बहिष्कर्तुं, वाञ्छस्याविष्कुरुद्यमम् ॥९॥

एव–यशस्काम , पयस्कस , अयस्कुम्भ , अयस्कुशा, अयस्कर्णी इत्यादि। अत इति वा पात्रम् । अनव्ययस्येति स्व कार । समासैक्य इति उपपय.-कार. ॥५॥ स्व पाशमित्यादावनव्ययत्वाभावात् सत्व न ॥६॥ रोरित्येव–अह -काम्यति ॥७॥ प्रत्ययस्थे कखपफि, रोरव च काम्ये नामिन परस्य रस्य पः स्यादिति सूत्रार्थ । नामिन इति अयस्कल्पम् । रो काम्ये इति गी-ष्काम्यति ॥८॥ एव निष्परिग्रहम् , प्रादुष्कृतम् , चतुष्पात्रम् ॥९॥

सुचो वा ॥२॥३॥१०॥

कखपफि सुजन्तानां, रस्य षत्वं विभाषया ॥
द्विष्कुरु त्वं स त्रिष्कुर्यात्, कर्तव्यमसकृच्छुभम् ॥१०॥

वेसुसोऽपेक्षायाम् ॥२॥३॥११॥

स्यादिसुप्रत्ययान्तस्य, रस्य षः कखयोः पफोः ॥
वाऽपेक्षायां धनी सर्पिष्, खादति वै धनुष्पतिः ॥११॥

नैकार्थेऽक्रिये ॥२॥३॥१२॥

एकार्थे चाक्रिये नस्यात्, षत्वं रेफस्य पूर्ववत् ॥
सर्पि ⏑ कालकमधानो, वपु ⏑ पीतं नु पाण्डुना ॥१२॥

समासेऽसमस्तस्य ॥२॥३॥१३॥

रस्येसुसप्रत्ययान्तस्य-षोऽसमस्तस्य कादिषु ॥
नित्यं तौ द्वौ समासे चेत्, सर्पिष्पान मधौ हितम् ॥१३॥

भ्रातुष्पुत्रकस्कादयः ॥२॥३॥१४॥

भ्रातुष्पुत्रादयः कस्का-दयो ज्ञेया निपातिताः ॥
कृतपसाः क्रमात कस्को, भ्रातुष्पुत्रश्च पत्रकः ॥१४॥

नाम्यन्तस्थाकवर्गात् पदान्तः कृतस्य सः शिड्नान्तरेऽपि ॥२॥३॥१५॥

नाम्यन्तस्थाकवर्गात् स्यात्, व्यवधानेऽपि नः शिटः ॥
कृतस्य पदमध्यस्य, सस्य पो नृषु पौरुषम् ॥१५॥

समासेऽग्नेः स्तुतः ॥२॥३॥१६॥

अग्निशब्दात् समासे तु, सस्य पत्वं स्तुतो भवेत् ॥
स्यान्नूनं निर्भयो वह्ने-रग्निष्टुत् कमठो जनः ॥१६॥

ज्योतिरायुर्भ्यां च स्तोमस्य ॥२॥३॥१७॥

आयुषो ज्योतिषश्चाग्नेः, स्तोमस्य सस्य पो भवेत् ॥
आयुष्टोमं यजेदेव, ज्योतिष्टोमं च वेदविद् ॥१७॥

मातृपितुः स्वसुः ॥२॥३॥१८॥

समासे मातृपितृभ्या, पत्वं सस्य भवेत् स्वसुः ॥
मातृष्वसा स्वसा मातुः, पितृष्वसा पितुः स्वसा ॥१८॥

अलुपि वा ॥२॥३॥१९॥

समासेऽलुपि पो वा स्यात्, मातृपितृपरस्वसुः ॥
मातुःष्वसा स्वसा मातुः, पितुःष्वसा पितुःस्वसा ॥१९॥

नाम्यन्तस्थाकवर्गेभ्य परस्य पदस्यान्तर्मध्ये कृतस्य कृतस्थस्य वा सस्य स्यात्, शिटा नकारेण चान्तरेऽपि इत्यर्थ । पदान्तरिति—दधिसेक् । कृतस्येति विसम् ॥१५॥ अग्निष्टुत् कमठो जन वह्ने निर्भयो नून स्यादित्यन्वय ॥१६॥ एवमग्निष्टोम इति । समासाभावे तु ज्योति स्तोम नानि ॥१७॥ स्पष्टम् ॥१८॥ विकल्पपक्षे मातु स्वसेत्यादि ॥१९॥

निनद्याः स्नातेः कौशले ॥२॥३॥२०॥

स्यान्निनदीपरस्नातेः, सस्य पत्वं नु कौशले ॥
निष्णातः सोऽपि किं कुर्या—न्न नदीष्णो नदीरये ॥२०॥

प्रतेः स्नातस्य सूत्रे ॥२॥३॥२१॥

सूत्रमात्रे समासे स्यात्, प्रतेः स्नातस्य सस्य षः ॥
शुद्धं सूत्रं प्रतिष्णात शास्त्रे लोके नु सर्वथा ॥२१॥

स्नानस्य नाम्नि ॥२॥३॥२२॥

स्नानस्य सस्य षो नाम्नि, सूत्रस्य विषये प्रतेः ॥
वृत्तौ सूत्रं प्रतिष्णान, स्यात् प्रतिस्नानमन्यथा ॥२२॥

वेः स्त्रः ॥२॥३॥२३॥

वेः स्तृणातेः समासे षो, नाम्नि सस्य नु जायते ॥
विष्टरे विष्टरं कृत्वा, विस्तरं वचसा वद ॥२३॥

अभिनिःष्टानः ॥२॥३॥२४॥

कृतषत्वोऽभिनिष्टानो, वृत्तौ नाम्नि निपात्यते ॥
निसर्गार्थोऽभिनिष्टानो, वर्णार्थः कस्यचिन्मते ॥२४॥

गवियुधेः स्थिरस्य ॥२॥३॥२५॥

वृत्तौ गवियुधीत्याभ्यां, नाम्नि स्थिरस्य सस्य षः ॥
धर्मात्मा नानृतं ब्रूते, गविष्ठिरो युधिष्ठिरः ॥२५॥

एत्यकः ॥२॥३॥२६॥

स्यात् कवर्जितनाम्यन्त-स्थाकवर्गान्तु सस्य षः ॥
समासे नाम्नि चैकारे, हरिषेणोऽभवन्नृपः ॥२६॥

भादितो वा ॥२॥३॥२७॥

सस्यैति नाम्नि षत्वं वे-कारान्तादुडुवाचिनः ॥
वृत्तौ रोहिणिषेणः स, भाति रोहिणिसेनवत् ॥२७॥

विकुशमिपरेः स्थलस्य ॥२॥३॥२८॥

विकुशमिपरे· सस्य, स्थलशब्दस्य षो भवेत् ॥
समासे विष्ठलं वीना, पक्षिणा कुष्ठलं मतम् ॥२८॥

कपेर्गोत्रे ॥२॥३॥२९॥

कपिशब्दात्परस्य स्या-द्गोत्रे स्थलस्य सस्य षः ॥
बीजी कपिष्ठलो नाम, यस्य कापिष्ठलः सुतः ॥२९॥

गोऽम्बाम्बसव्यापद्वित्रिभूम्यग्निशेकुशङ्कु-कङ्गुमञ्जिपुञ्जिबर्हिः परमेदिवेः स्थस्य॥२॥३॥३०॥

गोऽम्बादिभ्यः परं स्थस्य, समासे सस्य षो भवेत् ॥

वृत्तौ समाने, गवि-वाचि स्थिर इति गविष्ठिरस्तन्नामको नृप ॥२५॥ क्वर्जनाद्-विष्वक्सेन· ॥२६॥ उडुवाचिन -नक्षत्रवाचिन इकारान्तात् पर स्य सस्य षत्वं वा एकारे पर समासे नाम्नि । इत इति वसुषेण· ॥२७॥ एव शमिष्ठल, परिष्ठलम् ॥२८॥ बीजी-गोत्रप्रवर्तक·, वसा ॥२९॥ द्वि

दिविष्ठोऽपि स भूमिष्ठो, द्विष्ठस्त्रिष्ठश्चतुष्टकः ॥३०॥

निर्दुस्सोः सेधसन्धिसाम्नाम् ॥२॥३॥३१॥

निरादिभ्यः समासे स्यात्, सेधादीना नु सस्य षः ॥
निःषेधः सर्वपापानां, कृतो येन सुषामवान् ॥३१॥

प्रष्ठोऽग्रगे ॥२॥३॥३२॥

प्रात् परस्य सकारस्य, षत्वं स्थस्याग्रगे भवेत् ॥
अग्रगामी भवेत् प्रष्ठः, प्रस्थो धान्यस्य मापकः ॥३२॥

भीरुष्ठानादयः ॥२॥३॥३३॥

भीरुष्ठानादयः शब्दाः, कृतषत्वा हि साधवः ॥
सुः अ-सि-आ-उ-सा एते, पञ्चापि परमेष्ठिनः ॥३३॥

ह्रस्वान्नाम्नस्तिः ॥२॥३॥३४॥

नामतो विहिते तादौ, प्रत्यये सस्य षो भवेत् ॥
परस्य नामिनो ह्रस्वा-न्निष्ट्यो जातु न जातिमान् ॥३४॥

निसस्तपेऽनासेवायाम् ॥२॥३॥३५॥

तादौ निसस्तपेः सस्या-नासेवाया नु षो भवेत् ॥

स्वर्णं शुद्धं न निष्टप्त, निस्तप्त ननु काञ्चनम् ॥३५॥

घस्वसः ॥२॥३॥३६॥

नाम्यन्तस्थाकवर्गात् स्याद्, घसेर्वसेश्च सस्य षः ॥
उपोषिता जना जक्षु–राहारं न चतुर्विधम् ॥३६॥

णिस्तोरेवास्वदस्विदसहः षणि ॥२॥३॥३७॥

ण्यन्ताना स्तोश्च नाम्यादेः, सस्य षः षणि सन्परे ॥
स्वदृस्विदृसहा न तुष्टूषा, सिषेवयिषतां वरा ॥३७॥

सञ्जेर्वा ॥२॥३॥३८॥

ण्यन्तसञ्जेः परे सन्पे, नाम्यादेः सस्य षो नवा ॥
सिषञ्जयिषनि क्रूरो, मोह संसारपावकम् ॥३८॥

उपसर्गात् सुग्सुवसोस्तुस्तुभोऽट्यप्यद्वित्वे ॥२॥३॥३९

उपसर्गस्थनाम्यादेः, सुग्सुवादेर्नु सस्य षः ॥
अडागमेऽपि न द्वित्वे, परिष्टौति बुधो बुधान् ॥३९॥

स्थासेनिसेधसिचसञ्जां द्वित्वेऽपि ॥२॥३॥४०॥

उपसर्गस्थनाम्यादेः, स्थादीना मस्य षो भवेत् ॥
द्वित्वेऽप्यटाऽन्तरेणापि, मृढं प्रत्यषिषेधिषत् ॥४०॥

अडप्रतिस्तब्धनिस्तब्धे स्तम्भः ॥२॥३॥४१॥

डप्रतिस्तब्धनिस्तब्धान्, त्यक्त्वा स्तम्भस्य मस्य षः ॥

भूनत्तप्तमिति ॥३५॥ अशन-पान-खादिम-स्वादिमभेदादाहारश्चतुर्विध ॥३६॥ सष्टम् ॥३७॥ पक्षे सिसञ्जयिषतीति ॥३८॥ अद्वित्व इति किम् ? अभिसुसूति ॥३९॥ सष्टम् ॥४०॥ पूर्ववदिति–उपसर्गस्थानाम्याद द्वित्वेऽप्यटाऽपि

पूर्ववत् स्यात् वितष्टम्भ, वादे वाचः स वादिनाम् ॥४१॥

अवाच्चाश्रयोर्जाविदूरे ॥२॥३॥४२॥

गम्यमानाश्रयाद्यर्थे, स्तम्भस्य सस्य पो न्ववात् ॥
द्वित्वेऽप्यट्यपि ङश्चैनो, सोऽवष्टब्नान्महापुरम् ॥४२॥

व्यवात् स्वनोऽशने ॥२॥३॥४३॥

द्वित्वे डेऽट्यपि सः पः स्याद्, स्वनोऽशने च वेरवात् ॥
विष्वणति म भुङ्क्ते वा, भुङ्क्ते तु शब्दपूर्वकम् ॥४३॥

सदोऽप्रतेः परोक्षायां त्वादेः ॥२॥३॥४४॥

उपसर्गस्थनाम्यादे-र्द्वित्वेऽट्यपि सदोऽप्रतेः ॥
सस्य पस्तु परोक्षाया-मादेर्मूढो विषीदति ॥४४॥

स्वञ्जश्च ॥२॥३॥४५॥

उपसर्गस्थनाम्यादेः, स्वञ्जेः सस्य पो भवेत् ॥
द्वित्वेऽट्यपि परोक्षाया-मादेरेवाभिषस्वजे ॥४५॥

परिनिवेः सेवः ॥२॥३॥४६॥

परिनिव्युपसर्गस्थात्, सेवतेः सस्य पो भवेत् ॥

द्वित्वेऽप्यटच्यपि चाश्वल्या-न्नप्टोऽध्रुवं निषेविता ॥४६॥

सयसितस्य ॥२॥३॥४७॥

सयसितोभयोः सस्य, पत्वं परिनिवेः परम् ॥
रूपगन्धरसस्पर्श-शब्दाश्च विषया अमी ॥४७॥

असोङसिवूसहस्सटाम् ॥२॥३॥४८॥

परिनिवेः परं सस्य, सडागमसिवूसहाम् ॥
पत्वं सिवूसहौ स्तश्चे-दसोङौ विष्किरः खगः ॥४८॥

स्तुस्वञ्जश्चाटि नवा ॥२॥३॥४९॥

परिनिवेः स्तुवः स्वञ्जो-ऽसोङसिवूसहस्सटाम् ॥
सकारस्याटि वा पत्वं, पर्यष्टौत् स्वामिनं जनः ॥४९॥

निरभ्यनोश्च स्यन्दस्याप्राणिनि ॥२॥३॥५०॥

अप्राणिकर्तृकेऽर्थे वा, परिनिवेर्निरभ्यनोः ॥
परं सस्य तु पः स्यन्दे, तैलं निःष्यन्दते तिलात् ॥५०॥

वेः स्कन्दोऽक्तयोः ॥२॥३॥५१॥

विपूर्वात् स्कन्दतेर्धातोः, सस्य पत्वं विभापया ॥
न चेत् क्तक्तवतू स्याता, विष्कन्तैनः स भाग्यवान् ॥५१॥

॥१॥' इति श्लोकोद्भवो यत्समुदाहरणम् ॥४२॥ एव निपिताद्युन्नयमिति ॥४७॥ परिपीव्यति, परिपहते इत्याद्यवसेयम् । असाटेति परिसाड, मापरिर्माषिवदि-त्यादौ पत्व न ॥४८॥ एतत्सम्भवोदाहरणसमूह समूह्य । विकल्पपक्षे पर्यस्तौ दित्यादि ॥४९॥ विकल्पे तु नि स्यन्दत इत्यादि । प्राणिनि तु परिस्यन्दत मत्स्य इत्येव, न पत्वम् ॥५०॥ य. एन -पाप विष्कन्ता स भाग्यवानिति । विकल्पे विस्कन्तत्यादि । अक्तयोरिति निस्कन्न, विस्कनवान् ॥५१॥

परेः ॥२॥३॥५२॥

परेः परस्य वा स्कन्देः, सस्य पः स्यात् क्तयोरपि ॥
परिष्कन्ना परिस्कन्ता, मूलं शास्त्रस्य दुर्जनः ॥५२॥

निर्नेः स्फुरस्फुलोः ॥२॥३॥५३॥

पो वा स्फुरस्फुलोः सस्य, निनिर्भ्यां परयोर्भवेत् ॥
निष्फुलति च निःस्फुल्लो, निष्फुरेदथ निस्फुरः॥५३॥

वेः ॥२॥३॥५४॥

स्फुरस्फुलोर्विकल्पेन, वेः परस्य नु सस्य पः ॥
विष्फुरेद्विस्फुरेद्वापि, ज्ञानं ज्ञानिजने सदा ॥५४॥

स्कभ्नः ॥२॥३॥५५॥

स्कभ्नातेर्वेः परस्य स्यात्, पत्वं सस्य नु नित्यशः ॥
विष्कम्भकं विना नव, रम्यं भवति नाटकम् ॥५५॥

निर्दुःसुवेः समसूतेः ॥२॥३॥५६॥

समसूत्योः सकारस्य, पत्वं निर्दुःसुवेः परम् ॥
सुपूतिरपि दुःसूति-र्दुषमे सुषमेऽन्यथा ॥५६॥

अवः स्वपः ॥२॥३॥५७॥

सोऽञ्चितस्य स्वपेर्निर्दुः-सुविभ्यः सस्य पो भवेत् ॥
सुषुप्ता ज्ञानिनो जाड्ये, दुःषुप्ताः सत्पथे जडाः ॥५७॥

सूत्रस्य [illegible] ॥[illegible]॥[illegible]॥ ' वृत्तवर्तिष्णनाणाना, [illegible] [illegible] । [illegible] विष्कम्भ, [illegible] दर्शित. ॥[illegible]॥५५॥
' ([illegible]) [illegible] ॥[illegible]॥ [illegible] निषम, विषम. इत्यादि [illegible] ॥[illegible]॥ [illegible] ' दुःसन. ॥[illegible]॥

प्रादुरुपसर्गाद्यस्वरेऽस्तेः ॥२॥३॥५८॥

प्रादुस्त उपसर्गाच्च, नाम्यन्ताद्यस्वरे परे ॥
सस्य षोऽस्तेर्भवेत् प्रादुः, प्राःदुष्यादभिषन्ति ते ॥५८॥

न स्सः ॥२॥३॥५९॥

कृतद्वित्वसकारस्य, सस्य षत्वं न जातुचित् ॥
दधिस्यन्तः सुपिस्स्यन्ते, मधुस्यँश्च सुतुस्स्यते ॥५९॥

सिचो यङि ॥२॥३॥६०॥

सिश्चेतस्तु सकारस्य, षत्वं न यङि प्रत्यये ॥
सेसिच्यते तु पुष्पस्या–ऽऽलवालं मालिको जनः ॥६०॥

गतौ सेधः ॥२॥३॥६१॥

सकारस्य न षत्वं स्या–द्गत्यर्थकस्य सेधतेः ॥
शिशून् विसेधतो गङ्गा, निषेधन्ति हितैषिणः ॥६१॥

सुगः स्यसनि ॥२॥३॥६२॥

सुनोतेः सस्य षत्वं न, स्याच्च स्ये सनि प्रत्यये ॥
यदि नो मानसं पूतं, कथं त्वमभिसोष्यसि ॥६२॥

प्रादु–प्रकाश प्रादुष्यात् । तेऽभिषन्ति । अस्तेः इति किम्? प्रादुःस्त ॥५८॥ दधि अत्तुमिच्छन्तो दधिस्यन्त एवं मधु अत्तुमिच्छन् मधुस्यन् सुष्ठमन्यत ॥५९॥ स्पष्टम् ॥६०॥ विसेधत प्रविशत इत्यर्थ शेष स्पष्टम् ॥६१॥ अभिसोष्यसि–शुद्धो भविष्यसीत्यर्थ । सुसूषति–सनि ॥६२॥

रपृवर्णान्नो ण एकपदेऽनन्त्यस्यालचटवर्ग-
शसान्तरे ॥२॥३॥६३॥

रपृवर्णात् परं नस्या-नन्त्यस्यैकपदे भवेत् ॥
णत्वं लादिव्यवाये नो, नृणां न्याय्यं धनार्जनम् ॥६३॥

पूर्वपदस्थान्नाम्न्यगः ॥२॥३॥६४॥

रपृभ्यः प्राक्पदस्थेभ्यो ऽगान्तेभ्य उत्तरे पदे ॥
नस्य णत्व भवेच्चन्द्र-गखा नारी सुलक्षणा ॥६४॥

नसस्य ॥२॥३॥६५॥

रपृभ्यः प्राक्पदस्थेभ्यो, नसशब्दस्य नस्य ण· ॥
प्रणसा तरुणी काम, शोभते नैव निर्णसा ॥६५॥

निष्प्रागेऽन्तःखदिरकार्श्याम्रशरेक्षुप्लक्षपीयूक्षाभ्यो
वनस्य ॥२॥३॥६६॥

निराद्यर्थकादशभ्यः स्या-द्वनशब्दस्य नस्य णः ॥
वसन्ते कोकिलाकीर्णं, निभात्याम्रवणं नरम् ॥६६॥

द्वित्रिस्वरौषधिवृक्षेभ्यो नवानिरिकादिभ्यः
॥२॥३॥६७॥

द्वित्रिस्वरौषधिवृक्ष-वाचिभ्योऽनिरिकादितः ॥

वनस्य नस्य णत्वं वा, दूर्वावण सदाहितम् ॥६७॥

गिरिनद्यादीनाम् ॥२॥३॥६८॥

गिरिनद्यादिशब्दानां, नस्य णत्व विभाषया ॥
गिरिणद्यां जलं प्रायो, वर्षास्वेवावतिष्ठते ॥६८॥

पानस्य भावकरणे ॥२॥३॥६९॥

भावे च करणे पूर्व-पदस्थरषृवर्णतः ॥
पानस्य नस्य णत्वं वा, क्षीरपाणं बलप्रदम् ॥६९॥

देशे ॥२॥३॥७०॥

रषृभ्यः प्राक्पदस्थेभ्यो, नित्यं पानस्य नस्य णः ॥
देशेऽर्थे समुदायश्चेत्, क्षीरपाणा उशीनराः ॥७०॥

ग्रामाग्रान्नियः ॥२॥३॥७१॥

ग्रामाग्राभ्या परं नस्य, नियो णत्वं भवेद् ध्रुवम् ॥
ग्रामणीः मभभावेन, त्वग्रणीर्जायते जनः ॥७१॥

वाह्याद्वाहनस्य ॥२॥३॥७२॥

वोढव्यवाचिनः पूर्व-पदाद्रादिमतो मतः ॥
नस्य णो वाहनस्येक्षु-वाहण क्लेशभञ्जनम् ॥७२॥

अतोऽह्नस्य ॥२॥३॥७३॥

पूर्वपदादकारान्ता-द्रादितोऽह्नस्य नस्य णः ॥

वर्जनामिरिकाननदित्यादौ णत्व न ॥ ७॥ नित्यपक्षे गिरिनदीत्यादि ॥ ८॥ क्षीरपानमित्यादि नित्यपक्षे ॥ ९॥ दशाभावे तु क्षीरपाना गावुह इति ॥७०॥ सदम् ॥ ७१ ॥ वाह्यादिति किम् ? मुग्नाहनम् ॥ ७२ ॥ [illegible] इति

प्राह्णपराह्णमध्याह्ना-स्त्रिसन्ध्यं कालसन्धिना ॥७३॥

चतुस्त्रेर्हायनस्य वयसि ॥२॥३॥७४॥

वयसि गम्यमाने त्रि-चतुर्भ्यां हायनस्य नः ॥
णः स्यात्त्रिहायणो वत्सः, स्याच्चतुर्हायणः क्रमात् ॥७४॥

वोत्तरपदान्तस्यादेरयुवपक्वाह्नः ॥२॥३॥७५॥

स्यादुत्तरपदान्तस्य, स्यादेश्च नागमस्य वा ॥
नस्य णोऽयुवपक्वाह्नः, पूर्ववद् व्रीहिवापिणः ॥७५॥

कवर्गैकस्वरवति ॥२॥३॥७६॥

रादेः परं कवर्गैक-स्वरभाज्युत्तरे पदे ॥
पूर्ववद् नस्य णत्वं नो-ऽपत्यस्य स्वर्गकामिणः ॥७६॥

अदुरुपसर्गान्तरो णहिनुमीनानेः ॥२॥३॥७७॥

स्याद् दुर्वर्जोपसर्गस्था-ऽन्तःशब्दस्थरपादितः ॥
णो णोपदेशधातूना, हिन्वादेर्नस्य प्राणमत् ॥७७॥

नशः शः ॥२॥३॥७८॥

स्याद् दुर्भिन्नोपसर्गस्था-न्तः शब्दस्थरपादितः ॥
नशेः शान्तस्य णो नस्य, विस्वस्तो नु प्रणश्यति ॥७८॥

नेर्ङ्मादापतपदनदगदवपीवहीशमूचिग्यातिवाति-द्रातिप्सातिस्यतिहन्तिदेग्धौ ॥२॥३॥७९॥

पूर्ववद्रादितो ज्ञेयं, णत्वं नेर्नस्य नित्यशः ॥
मादापतपदाद्येषु, प्रणिद्रात्यलसो जनः ॥७९॥

अकखाद्यपान्ते पाठे वा ॥२॥३॥८०॥

पाठेऽकखाद्यपान्ते वा, धातो नेर्नस्य णो भवेत् ॥
स्याददुरुपसर्गान्तः-स्थाद्रादेः प्रणिपात्यते ॥८०॥

द्वित्वेऽप्यन्तेप्यनितेः परेस्तु वा ॥२॥३॥८१॥

द्वित्वेऽद्वित्वेऽप्यनन्तेऽन्ते, उपसर्गस्थरादितः ॥
अनितेर्नस्य णोऽन्तस्तो, वा परेरदुरः पराण् ? ॥८१॥

हनः ॥२॥३॥८२॥

स्याददुरुपसर्गान्तः-स्थाद्रादेर्नस्य णो हनः ॥
प्रहण्यते सदा मद्भिर्दुष्कृतं नैव सत्कृतम् ॥८२॥

वमि वा ॥२॥३॥८३॥

स्याददुरुपसर्गान्तः-स्थाद्रादेर्वे च मे परे ॥
हन्धातोर्नस्य णो वाऽहं, प्रहण्मि कर्म धर्मतः ॥८३॥

स्पष्टम् ॥७९॥ अकखादीति प्रनिकगाति, प्रनिखनति । अपान्तीति प्रनिद्वेष्टि । पाठ इति प्रनिचकार विकल्पपक्षे प्रनिपात्यते ॥८०॥ हे परण ? हे पर्यन् ? इत्याद्यवसेयम् ॥८१॥ स्पष्टम् ॥८२॥ विकल्पपक्षे प्रहन्मि इत्यादि ॥८३॥

निंसनिक्षनिन्दः कृति वा ॥२॥३॥८४॥

स्याददुरुपसर्गान्तः—स्थाद्रादेर्नस्य णो नवा ॥
कृति निंसादिधातूना, प्रणिन्दनं प्रणिंसनम् ॥८४॥

स्वरात् ॥२॥३॥८५॥

स्याददुरुपसर्गान्तः—स्थाद्रादितः कृतश्च नः ॥
स्वरात् परस्य णो नित्य, प्रयाणं त्वरितं शुभम् ॥८५॥

नाम्यादेरेव ने ॥२॥३॥८६॥

स्याददुरुपसर्गान्तः—स्थाद्रादेर्नागमे सति ॥
नाम्यादेः स्वरतः कृन्नो, णत्वं तु प्रेङ्खण मधौ ॥८६॥

व्यञ्जनादेर्नाम्युपान्त्याद्वा ॥२॥३॥८७॥

नस्य णो व्यञ्जनादेश्च, नाम्युपान्त्याद्विभाषया ॥
पूर्वंनद् दुर्गति दत्त, प्रकोपिनां प्रकोपणम् ॥८७॥

णेर्वा ॥२॥३॥८८॥

ण्यन्तात् कृतस्य णत्व वा, स्वरात् पर कृतो भवेत् ॥
पूर्ववत् सर्वशास्त्रेषु, प्रमापणं परीक्ष्यते ॥८८॥

निर्विण्णः ॥२॥३॥८९॥

सत्तालाभविचारार्थाद्, निर्विदः क्तस्य नस्य णः ॥

निपात्यते स निर्विण्णः, प्राव्राजीन् मुनिसन्निधौ ॥८९॥

न ख्यापूग्भूभाकमगमप्यायवेपो णेश्च ॥२॥३॥९०॥

ण्यन्तेभ्यः ख्यादिकेभ्यश्च, कृतो नो णो न पूर्ववत् ॥
प्राख्यानं सुन्दरं तेषा, भवेयुर्ये प्रभाविनः ॥९०॥

देशेऽन्तरोऽयनहनः ॥२॥३॥९१॥

देशार्थेऽन्तःपरं हन्ते-श्चायनस्य न नस्य णः ॥
देशोऽन्तरयनो वान्त-र्हननो विषयोऽवरः ॥९१॥

षात् पदे ॥२॥३॥९२॥

पदे परे षकारात् स्या-न्निमित्तान्नस्य णो न वै ॥
सर्पिष्पान यजुष्पानं, दुष्पान कथमुच्यते ॥९२॥

पदेऽन्तरेऽनाङ्यतद्धिते ॥२॥३॥९३॥

आङन्तं तद्धितान्तं च, त्यक्त्वाऽन्यस्मिन् पदे परे ॥
व्यवधाने न णो नस्य, रोषभीममुखेन किम् ? ॥९३॥

हनो घि ॥२॥३॥९४॥

हन्तेर्घे नस्य नो णत्वं, स्यान्निमित्तनिमित्तिनोः ॥
अन्तरे सति वृत्रघ्नः, शत्रुघ्नता हि युज्यते ॥९४॥

ससारोऽसार इति विचार्य ततस्त्यागाय तत्पर ॥८९॥ अस्याय –अद्भुतगगान्त – स्याद् राद्धे परेभ्य स्यादिभ्योऽप्यन्त–ण्यन्तस्य परस्य कृतो नो पून स्यादिति ॥९०॥ देश इति किम् ? अन्तर्यणम्, अन्तर्हण्यत ॥९१॥ कथमत्र तु सर्पिष्केणेत्यादि ॥९२॥ अनाङीति किम् ? प्राणद्धम, अतद्धित इति किम् ? आर्द्रगोमयेण ॥९३॥ स्पष्टम् ॥९४॥

नृतेर्यङि ॥२॥३॥९५॥

नृतेर्धातोर्नकारस्य, णत्वं यङ्विषये न वै ॥
वर्षासु व्याकुलं बर्हीं, नर्नंति न शरत्स्थितौ ॥९५॥

क्षुभ्नादीनाम् ॥२॥३॥९६॥

क्षुभ्नादीना नकारस्य, णत्वं नैव प्रजायते ॥
आचार्य्यानी सुशिष्याणा-मपि पूज्या यथा गुरुः ॥९६॥

पाठे धात्वादेर्णो नः ॥२॥३॥९७॥

पाठस्य विषये धातो-राद्यस्य णस्य नो भवेत् ॥
बुधा नयन्ति सत्कार्य-मात्मानं नतु दुष्कृतौ ॥९७॥

षः सोऽष्ट्यैष्ठिवष्वष्कः ॥२॥३॥९८॥

धात्वादेनु षकारस्या-ष्ट्यैष्ठिवष्वष्कयोगिनः ॥
सत्य सिञ्चत भो लोकाः, पीयूषवचसा सदा ॥९८॥

ऋर लृलं कृपोऽकृपीटादिषु ॥२॥३॥९९॥

कृप्धातोरकृपीटादौ, ऋतो रस्य च लृच लः ॥
धर्मेणाऽध्ययनं क्लृप्तं, भक्तिर्ज्ञानाय कल्पते ॥९९॥

उपसर्गस्यायौ ॥२॥३॥१००॥

उपसर्गस्य लो रस्य, धातावयि गतौ परे ॥

क्लीबः पलायते युद्धा–न्न शूरः क्षतविक्षतः ॥१००॥

ग्रो यङि ॥२॥३॥१०१॥

गिरते रस्य लत्वं स्यात्, प्रत्यये यङि नित्यशः ॥
किं निजेगिल्यते नासन्, स निगिरति गर्हितम् ॥१०१

नवा स्वरे ॥२॥३॥१०२॥

गिरते रस्य लत्व वा, स्वरादौ प्रत्यये परे ॥
गिरेद् गिलेद् महामत्स्यो, मत्स्यान् पापेन जन्मना ॥१०२

परेर्घाङ्कयोगे ॥२॥३॥१०३॥

परे रेफस्य वा लत्व–मङ्के घे च परे भवेत् ॥
पलिघोऽत्र न पल्यङ्कः, पर्यङ्कोऽङ्कस्तथामनम् ॥१०३॥

ऋफिडादीनां डश्च लः ॥२॥३॥१०४॥

ऋफिडेत्यादिशब्दाना–मृरो लृलौ विभाषया ॥
डकारस्य च लत्वं स्याद्, लृफिडः ऋफिलः समौ ॥१०४

जपादीनां पो वः ॥२॥३॥१०५॥

जपादीना पकारस्य, वकार स्याद्विभाषया ॥
कपाटः स्यात् कवाटोऽपि, त्रिविष्टप त्रिविष्टवम ॥

॥ इति तृतीयः पादः ॥

प्लायत, पल्ययत प्रमुखमन्यमेयम् ॥१००॥ स्पष्टम् ॥१०१॥ उदाहरणं गमा
यणीयश्लोकमनुदृष्य दर्शयति–तथाहि–' अग्निं मत्स्यनिमिनाम, तथान्यामि
तिमिङ्गिल । तिमिङ्गिलगिलोऽप्यस्ति, तद्गिलगिलोऽप्यस्ति राघव ॥१॥१०२॥
निगद्यते परिघ । पलिघः, परिघः इति नामागदाहरणम् ॥१०३॥
ऋफिडादयः जपादयः गणपाठे ज्ञेयाः ॥१०४॥१०५॥

॥ इति तृतीयः पादः ॥

स्त्रियां नृतोऽस्वस्रादेर्डीः ॥२॥४॥१॥

नाम्नो नान्ताद्ऋदन्ताच्च, स्वस्रादिवर्जितात् स्त्रियाम् ॥
प्रत्ययो ङीर्भवेद्राज्ञी, छत्रिणी नतु दण्डिनी ॥१॥

अधातूदृदितः ॥२॥४॥२॥

प्रत्ययोऽप्रत्ययो वोदि-दृदिच्च धातुवर्जितः ॥
ङीस्तदन्तान् स्त्रिया नाम्नो, भवती विदुषी ध्रुवम् ॥२॥

अञ्चः ॥२॥४॥३॥

अञ्चन्तान्नामतः स्त्रीत्वे, प्रत्ययो ङीर्तु जायते ॥
विपरीता प्रतीचीनो, ज्ञेया प्राची सदा त्वया ॥३॥

णस्वराघोषाद् वनो रश्च ॥२॥४॥४॥

णान्तात् स्वरान्ततोऽघोष-मान्ताद्यो वन् तदन्ततः ॥
स्त्रिया ङी रो वनोऽन्तस्य, धीवरी पापपीवरी ॥४॥

वा बहुव्रीहेः ॥२॥४॥५॥

णस्वराघोषतो यो वन्, बहुव्रीहिस्तदन्ततः ॥
स्त्रिया ङीर्वा भवेद्रोऽन्तः, स्ववावा स्त्री स्ववावरी ॥५॥

वा पादः ॥२॥४॥६॥

बहुव्रीहिनिमित्ताद्धि, पादान्ताद् डीः स्त्रिया भवेत् ॥
स्याद् द्विपदी द्विपाद्युक्तो, द्विपदोऽपि चतुष्पदः ॥६॥

ऊध्नः ॥२॥४॥७॥

ऊधस ऊधनन्ताद् डी-र्बहुव्रीहेः स्त्रिया भवेत् ॥
कुण्डोध्न्यः पीवरोध्न्यश्च, गावोऽभूवन् नु भारते ॥७॥

अशिशोः ॥२॥४॥८॥

अशिशोस्तु बहुव्रीहेः, स्त्रिया डीः प्रत्ययो भवेत् ॥
न विद्यते शिशुर्यस्याः साऽशिश्वी वनिता मता ॥८॥

सङ्ख्यादेर्हायनाद् वयसि ॥२॥४॥९॥

सङ्ख्यादेर्हायनान्ताद् डी-र्बहुव्रीहेः स्त्रिया भवेत् ॥
वयोगम्ये प्रसूते सद्-गवी शायस्त्रिहायणी ॥९॥

दाम्नः ॥२॥४॥१०॥

सङ्ख्यादेर्दामनन्ताद् डी-र्बहुव्रीहेर्भवेत् स्त्रियाम् ॥
कण्ठे द्वे दामनी यस्या, द्विदाम्नी श्रीमती मता ॥१०॥

अनो वा ॥२॥४॥११॥

डीर्वाऽनन्ताद् बहुव्रीहेः, स्त्रियामुपान्त्यलोपिनः ॥

पक्षे द्विपात्, द्विपदी नारी तस्या द्विपादौ [illegible] युक्ता द्विपदा नरोऽपि चतुष्पद पशु [illegible], [illegible] ॥६॥ [illegible] ॥७॥८॥ [illegible] ॥९॥ [illegible] ॥१०॥ [illegible] ॥११॥१२॥

बहुराज्ञी प्रजा दुःख, बहुराजतयाऽऽप्नुयात् ॥११॥

नाम्नि ॥२॥४॥१२॥

डीरन्नन्ताद्बहुव्रीहेः, संज्ञाया नित्यशः स्त्रियाम् ॥
अधिराज्ञी सुराज्ञी च, ग्रामस्तन्नामकः श्रुतः ॥१२॥

नोपान्त्यवतः ॥२॥४॥१३॥

डीर्नोपान्त्यवतोऽन्नन्ताद्, बहुव्रीहेः स्त्रियां भवेत् ॥
सुपर्वा च सुशर्मा स्या-त्तपस्विनी सदात्मिका ॥१३॥

मनः ॥२॥४॥१४॥

स्त्रिया डीप्रत्ययो नाम्नो, मन्नन्तान्नैव जायते ॥
यः सीमानमतिक्रान्तः, पामा तस्य तु जायते ॥१४॥

ताभ्यां वाऽऽप् डित् ॥२॥४॥१५॥

मन्नन्तान्नामतोऽन्नन्ताद्, बहुव्रीहेर्डिदाप् स्त्रियाम् ॥
निरूपेन सुपर्वे ये, सुपर्वाणौ भविष्यतः ॥१५॥

अजादेः ॥२॥४॥१६॥

स्त्रियामजादिशब्देभ्य, आप्प्रत्ययो विधीयते ॥
मुग्धा बाला भवेन्मन्दा, मध्या लोलविलोचना ॥१६॥

ऋचि पादः पात् पदे ॥२॥४॥१७॥

दनपाद्वानपाच्छब्द-स्यानन्तस्य ऋचि ध्रुवम् ॥

पात् पदे द्व निपात्येते, गायत्री त्रिपदा त्रिपात् ॥१७॥

आत् ॥२॥४॥१८॥

अकारान्तात् स्त्रिया नाम्नः, आप्प्रत्ययो विधीयते ॥
विप्रयुक्ता सती या सा, माध्वी खट्वां न सेवते ॥१८॥

गौरादिभ्यो मुख्यान् ङीः ॥२॥४॥१९॥

गौरादिगणनिक्षिप्ताद् , ङीः स्त्रिया मुख्यनामतः ॥
परत्र बन्धकी नारी दासी चेटी च भिक्षुकी ॥१९॥

अणञेयेकण्नञ्स्नञ्टिताम् ॥२॥४॥२०॥

अणादिप्रत्ययाना योऽकारो नाम्नस्तदन्ततः ॥
ङीस्तेषामेव वाच्यायां, स्त्रिया शस्ता नु तापसी ॥२०॥

वयस्यनन्त्ये ॥२॥४॥२१॥

वयोऽदन्तात् स्त्रिया नाम्नो, ङीस्त्यक्त्वा चरमं वयः ॥
वृद्धा स्यात्तरुणी नित्य–चञ्चलं ननु यौवनम् ॥२१॥

द्विगोः समाहारात् ॥२॥४॥२२॥

समाहारद्विगोर्नाम्नोऽकारान्ताद् ङीः स्त्रिया भवेत् ॥

द्विपाद् , द्विपदी ॥१७॥ आदिति, सामपा स्त्री, दृषद्, समिदित्यादि । आ दित्यकाराऽग्रेऽपि यथासम्भव योजनीय ॥१८॥ मुख्यान्नित्यधिकार । गौरादिभ्य इति बहुवचनमाकृतिगणार्थम ॥१९॥ अण्–नदी, एयण्–सौपर्णेयी, ण्–आक्षिकी, नञ् स्त्रैणी, स्नञ्–पौंस्नी, टित्–कानुरुगी ॥२०॥ अयान्त-यासालङ्कृत्यलङ्कृतमुदाहरणम ॥२१॥ वा स्यद्वयात्मकमुदाहरणम् , तत्र यदि

त्रिलोकी गणयेन्नालं, सङ्ख्यातुमर्हतो गुणान् ॥२२॥

परिमाणात्तद्धितलुक्यबिस्ताचितकम्बल्यात्
॥२॥४॥२३॥

प्रस्थादिपरिमाणान्ताद्-दन्ताद् ङीः स्त्रियां द्विगोः ॥
तद्धिते लुक्यबिस्तादे-र्द्व्याढकी त्र्याढकीं नय ॥२३॥

काण्डात् प्रमाणादक्षेत्रे ॥२॥४॥२४॥

प्रमाणवाचिनः काण्ड-श दान्ताद् ङीः स्त्रियां द्विगाः ॥
तद्धिते लुकि न क्षेत्रे, त्रिकाण्डीं रज्जुमानय ॥२४॥

पुरुषाद्वा ॥२॥४॥२५॥

पूर्ववद्व स्त्रिया ङीः स्यात्, पुरुषान्ताद्विभाषया ॥
इयं द्विपुरुषी वापी, त्रिपुरुषा नु खन्यताम् ॥२५॥

रेवतरोहिणाद्भे ॥२॥४॥२६॥

रेवतरोहिणाभ्यां ङी नक्षत्रेऽर्थे स्त्रिया भवेत् ॥
शुभः स्याद् रेवती मन्दे, रोहिण्यमृतसिद्धिदा ॥२६॥

नीलात् प्राण्यौषध्योः ॥२॥४॥२७॥

प्राण्यौषध्योः स्त्रियां नील–शब्दाद् ङीप्रत्ययो भवेत् ॥
नीली गौः शाटिका नीला, नीली स्यान्मधुपर्णिका ॥२७॥

क्ताच्च नाम्नि वा ॥२॥४॥२८॥

क्तान्ताच्च नीलशब्दाच्च, संज्ञायां ङीः स्त्रिया नवा ॥
स्यात् प्रवृद्धविलूनी वै, नीली नीलाऽभिधाऽबला ॥२८

केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजात् ॥२॥४॥२९॥

केवलादिनवभ्यः स्याद्, ङीः सञ्ज्ञाया तु नित्यशः ॥
केवली ज्योतिषो नाम, मामकी मातुली मता ॥२९॥

भाज-गोण-नाग-स्थल-कुण्ड-काल-कुश-कामुक-कट-कबरात् पक्वाऽवपन-स्थूलाऽकृत्रिमा-मत्र-कृष्णाऽऽयसी-रिरंसु-श्रोणिकेशपाशे ॥२॥४॥३०॥

भाजादिभ्यो दशभ्यो ङीः, पक्वाद्यर्थे यथाक्रमम् ॥
स्त्रिया काली घनश्यामा, कबरी केशपाशकः ॥३०॥

मधुपर्णिकाऽमृतौषधि (गलो इति भाषायाम) ॥२७॥ प्रवृद्धविलूना विकल्पपक्षे ओषधिविशेषवाचकोऽयमखण्डशब्द ॥२८॥ भागधेयी–वलि, पापपर्या–ओषध्यौ, समानी–छन्द, आर्यकृती–क्रियाविशेष, सुमङ्गली–छन्द ओषधिर्वा, भेषजी–ओषधिरिति ॥२९॥ एव भाजीप्रमुख तत्तदर्थं बोध्यम, तथाभावे तु भाजेत्यादि ॥३०॥

नवा शोणादेः ॥२॥४॥३१॥

शोणादिगणतः स्त्रीत्वे, ङीर्विकल्पेन जायते ॥
शोणी स्यादरुणा शोणा, चण्डी चण्डातिकोपना ॥३१॥

इतोऽक्त्यर्थात् ॥२॥४॥३२॥

इदन्तानामतः स्त्रीत्वे-ऽक्त्यर्थान्तात् ङीर्विभाषया ॥
अरणी चारणिर्दारु, सरणी सरणिः सृतिः॥३२॥

पद्धतेः ॥२॥४॥३३॥

स्त्रिया पद्धतिशब्दाद् ङी-र्विकल्पेनैव जायते ॥
पद्धती या मुनीशाना, तामनुस्मर पद्धतिम् ॥३३॥

शक्तेः शस्त्रे ॥२॥४॥३४॥

शस्त्रेऽर्थे शक्तिशब्दाद् ङी-र्विकल्पेन स्त्रिया भवेत् ॥
शक्तिः शक्ती करे यस्य, तस्य शक्तिर्जगज्जये ॥३४॥

स्वराद्‌तो गुणादखरोः ॥२॥४॥३५॥

स्वरादूर्ध्वमुकारो यो, गुणवाचान्तगस्ततः ॥

गुणादस्वरुनाम्नो ङीः, स्त्रियां तन्वी तनुर्वरा ॥३५॥

श्येतैतहरितभरतरोहिताद् वर्णात्तो नश्च ॥२॥४॥३६॥

एभ्यः स्याद्वर्णवाचिभ्यः, स्त्रियां ङीस्तस्य नो नना ॥
वर्षासु नूतनैः शस्यै–र्हरिणी हरिता हरित् ॥३६॥

क्नः पलितासितात् ॥२॥४॥३७॥

स्यात् पलितासिताभ्यां ङीः, क्नस्तकारस्य वा स्त्रियाम् ॥
पलिक्नी पलिता वृद्धा–ऽसिक्न्यन्तःपुरचारिणी ॥३७॥

असहनञ्विद्यमानपूर्वपदात् स्वाङ्गादक्रोडादिभ्यः ॥२॥४॥३८॥

सहनञ्विद्यमानेभ्यो, भिन्नात् पूर्वपदात् स्त्रियाम् ॥
वाऽक्रोडादेरदन्ताद् ङीः, स्वाङ्गात् पीनस्तनी नरी ॥३८॥

नासिकोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्गगात्रकण्ठात् ॥२॥४॥३९॥

ङीर्वा स्यान्नासिकादिभ्यः, स्वाङ्गेभ्यः पूर्ववत् स्त्रियाम् ॥
नियमार्थमिदं बोध्यं, कृशोदरी कृशोदरा ॥३९॥

॥१॥ इति, प्रत्युदाहरणसूत्रम् ॥३५॥ वर्णादिति–श्वेतेत्यादि ॥३६॥ विकल्पपक्षेऽसिता ॥३७॥ सहनञ्विद्यमानवर्जनात्, सकेशा, अकेशा, विद्यमानकेशेत्यादि । स्वाङ्गादिति–बहुयवा । क्रोडादिराकृतिगण, तत यथाप्रयोगं साधनीयम् । स्वाङ्गलक्षणं चेदम् 'अविकारोऽद्रवं मूर्तं, प्राणिस्थं स्वाङ्गमुच्यते । च्युतं च प्राणिनस्तत्तन्निभं च प्रतिमादिषु ॥१॥', बहुशफा बहुशफा, कुज्ञाना, दीर्घजङ्घा शाला इत्यादौ तत्तद्विशेषणाभावान्न ङीरिति ॥३८॥ एवं सिद्धे नियमार्थमिदम्, तेनास्मातिरिक्तबहुस्वरसंयोगोपान्त्यस्वाङ्गान्न ङीः ॥३९॥

नखमुखादनाम्नि ॥२॥४॥४०॥

स्वाङ्गनखमुखाभ्यां ङी–र्वाऽनाम्नि पूर्ववत् स्त्रियाम् ॥
शूर्पनखी भवेच्चन्द्र–मुखी शूर्पणखा नु किम् ॥४०॥

पुच्छात् ॥२॥४॥४१॥

पूर्ववत् स्वाङ्गतः पुच्छात्, स्त्रिया ङीः स्याद्विभाषया ॥
वडवा दीर्घपुच्छीयं, दीर्घपुच्छा च वानरी ॥४१॥

कबरमणिविषशरादेः ॥२॥४॥४२॥

नित्यमेव स्त्रिया पुच्छाद्, ङीः कबरादिपूर्वकात् ॥
मणिपुच्छी भवेत् काचिद्, विषपुच्छी च वृश्चिकी ॥४२॥

पक्षाच्चोपमानादेः ॥२॥४॥४३॥

स्यादुमानपूर्वाद् ङीः, स्त्रिया पक्षाच पुच्छतः ॥
इयमुलूकपक्षी चो–लूकपुच्छी च शाटिका ॥४३॥

क्रीतात् करणादेः ॥२॥४॥४४॥

क्रीतान्तान्नामतोऽदन्तात्, करणादेः स्त्रिया नु ङीः ॥
अश्वक्रीनी धनक्रीती, सुक्रीता स्यादृगरीयमी ॥४४॥

क्तादल्पे ॥२॥४॥४५॥

करणादेः स्त्रिया ङीः स्या–दल्पेऽर्थे क्तान्तनामतः ॥
इयमभ्रविलिप्ती द्यौः, मर्पद्गारि जातुचित् ॥४५॥

स्वाङ्गादेरकृतमितजातप्रतिपन्नाद्बहुव्रीहेः ॥२॥४॥४६॥

कृतादिवर्जितात् क्तान्ताद्–बहुव्रीहेः स्त्रियां नु ङीः ॥
स्वाङ्गादेः शङ्खभिन्नीय–मूरुभिन्नी च कामिनी ॥४६॥

अनाच्छादजात्यादेर्नवा ॥२॥४॥४७॥

आच्छादभिन्नजात्यादेः, स्त्रिया ङीर्वा नु पूर्ववत् ॥
पलाण्डुभक्षिती नारी, पापा पलाण्डुभक्षिता ॥४७॥

पत्युर्नः ॥२॥४॥४८॥

पत्यन्तात् स्याद् बहुव्रीहेः, स्त्रियां ङीर्वा तथाच नः ॥
अन्त्यस्य स्थिरपत्नीय, स्थिरपतिः सदासुखा ॥४८॥

सादेः ॥२॥४॥४९॥

सपूर्वात् पतिशब्दात् ङीः, स्त्रिया वाऽन्त्यस्य नो भवेत् ॥
भूपत्नी भूपती राज्ञी, भाग्येनैव भवेत् क्वचित् ॥४९॥

सपत्न्यादौ ॥२॥४॥५०॥

सपत्नीप्रमुखाः शब्दा, ङ्यन्ता नान्ताश्च नित्यशः ॥
समानः स्यात् पतिर्यासां, सपत्न्यस्ताः परस्परम् ॥५०॥

दन्तकृता, दन्तमिता, दन्तजाता, दन्तप्रतिपन्नत्यादौ न ङी कृतादि-वर्जनात् ॥४६॥ सूत्रवदिति–कृतादिवर्जितात् क्तान्ताद् बहुव्रीहेरिति। आच्छाद-वर्जनात्–वस्त्रच्छन्ना । जात्यादिरिति सामयाता ॥४७॥ सुगम ॥४८॥ सादे-रिति पतिनियम, ग्रामस्य पतिर्ग्रामपतिरेव न तु पत्नी ॥४९॥ गाम सपत्नीप्रभृति ॥५०॥

ऊढायाम् ॥१॥४॥५१॥

ऊढाया केवलात् पत्यु-र्ङीः स्यादन्त्यस्य नः स्त्रियाम् ॥
पत्न्यस्तु भ्रातृवर्गस्य, भवेयुर्यातरो मिथः ॥५१॥

पाणिगृहीतीति ॥१॥४॥५२॥

स्युरूढाया स्त्रिया पाणि-गृहीत्याद्या निपातनात् ॥
इयन्ताः पाणिगृहीतीय, सौभाग्येन विशिष्यते ॥५२॥

पतिवत्न्यन्तर्वत्न्यौ भार्यागर्भिण्योः ॥१॥४॥५३॥

भार्या चेत् पतिवत्नी स्या-दन्तर्वत्नी च गर्भिणी ॥
निपात्येते उभौ शब्दौ, पृथ्वी पतिमती मता ॥५३॥

जातेरयान्तनित्यस्त्रीशूद्रात् ॥१॥४॥५४॥

स्याज्जातिवाचिनोऽदन्ता-न्नाम्नोऽयान्तात्स्त्रियां नु ङीः ॥
नित्यस्त्रीशूद्रभिन्नाच्च, नखरी ब्राह्मणी कठी ॥५४॥

पाककर्णपर्णवालान्तात् ॥१॥४॥५५॥

नामतो ङीः स्त्रिया नित्य, पाकादेर्जातिवाचिनः ॥
क्षणपाकी तथा शङ्कु-कर्ण्याद्या लोपधिर्मता ॥५५॥

असत्काण्डप्रान्तशतैकाञ्चः पुष्पात् ॥१॥४

ङीर्जातिवाचिनः पुष्पात्, सदादिभिन्नपूर्वकात् ॥

स्त्रियां सुवर्णपुष्पी सत्-पुष्पाद्याः कानने लताः ।।५६।।

असंभस्त्राजिनैकशणपिण्डात् फलात् ।।२।।४।।५७।।

असंभस्त्रादिपूर्वाद् वै, फलान्ताज्जातिवाचिनः ।।
स्त्रियां ङीर्जायते दासी-फली पूगफली लता ।।५७।।

अनञो मूलात ।।२।।४।।५८।।

नञ्भिन्नपूर्वतो मूलात्, स्त्रियां ङीर्जातिवाचिनः ।।
अमूला दर्भमूली च, शीर्षमूली लता क्वचित् ।।५८।।

धवाद्योगादपालकान्तात् ।।२।।४।।५९।।

अकारान्ताद् धवाद् योगात्, पालकान्तान्यनामतः ।।
स्त्रिया ङीः प्रवरी प्रष्ठी, कौमारी पशुपालिका ।।५९।।

पूतक्रतुवृषाकप्यग्नि कुसित कुसिदादै च ।।२।।४।।६०।।

पूतक्रत्वादिनामभ्यो, धवार्थेभ्यः स्त्रिया तु ङीः ।।
ऐश्चान्तस्य भवेत् पूत-क्रतायीय वृषाकपिः ।।६०।।

मनोरौ च वा ।।२।।४।।६१।।

धवाद् योगात् मनोः शब्दात्, स्त्रिया ङीर्वा तथा च औत् ।।
ऐच्चान्त्य मानवी ज्ञेया-मनायी स्त्री मनोर्मनुः ।।६१।।

वरुणेन्द्ररुद्रभवशर्वमृडादान् चान्तः ।।२।।४।।६२।।

धवनामभ्य एभ्यो ङी-स्तथा चानन्त आगमः ।।

समादिर्जगत् मङ्खल्यादि ।।५७।। मात्र सूत्रद्वयम् ।। ५८।।५९।। इत्यादि रिति धात्वागमेन स्वतन्त्र नाम। 'इन्द्राणी आग्नायी' इत्यत्र त्याग्नायी नाम निरुक्तेति ।।६०।। सप्तम् ।।६१।। यथा वरुणानी, रुद्राणी, भवानी,

स्त्रियामिन्द्रस्य भार्येय-मिन्द्राणी दिवि राजते ॥६२॥

मातुलाचार्योपाध्यायाद्वा ॥२॥४॥६३॥

मातुलादेथवान्नाम्नो, ङीश्चानन्तो विभाषया ॥
आचार्यान्यथवाऽऽचार्यी, मातुलानी च मातुली ॥६३॥

सूर्याद्देवतायां वा ॥२॥४॥६४॥

देवताया धनात् सूर्यात्, ङीर्वाऽऽनन्तः स्त्रियां भवेत् ॥
सूर्याणी सूर्यभार्येयं सूर्या रत्नाभिधा श्रुता ॥६४॥

यवयवनारण्यहिमाद्दोषलिप्युरुमहत्त्वे ॥२॥४॥६५॥

दोषाद्यर्थे यवादिभ्यो, ङीश्चानन्तः स्त्रिया क्रमात् ॥
दुष्टो यवो यवानी स्यात्-दरण्यानी महावनम् ॥६५॥

अर्यक्षत्रियाद्वा ॥२॥४॥६६॥

अर्यक्षत्रियशब्दाभ्या, ङीरानन्तश्च वा स्त्रियाम् ॥
अर्याण्यर्या च भार्याऽर्यी, क्षत्रियाणी च क्षत्रिया ॥६६॥

यञो डायन् च वा ॥२॥४॥६७॥

यञ्प्रत्ययान्ततो ङीः स्यात्, डायन् चान्तः स्त्रियां नवा ॥
गार्गी गार्ग्यायणी नारी, वात्सी वात्स्यायनी तथा ॥६७॥

लोहितादिशकलान्तात ॥२॥४॥६८॥

लोहितादिशकलान्ताद्, यञन्ताद् ङीः स्त्रियां ध्रुवम् ॥
डायनन्तश्च लौहित्या–यनी कात्यायनी भवेत् ॥६८॥

पावटाद्वा ॥२॥४॥६९॥

पान्तादवटशब्दाच्च, यञन्ताद् ङीः स्त्रिया नवा ॥
डायन् चान्तस्तथावट्या–यन्यवट्याऽनला वला ॥६९॥

कौरव्यमाण्डूकासुरेः ॥२॥४॥७०॥

कौरव्यादेः स्त्रिया ङीः स्याद्, डायन् चान्तस्तथा सति ॥
स्त्री कौरव्यायणी माण्डू-कायनी चासुरायणी ॥७०॥

इञ इतः ॥२॥४॥७१॥

इकारान्तादिञन्ताद् ङी–प्रत्ययो जायते स्त्रियाम् ॥
मौनिचित्ती तथा सौत–ङ्गमी तद्धितमीक्षते ॥७१॥

नुर्जातेः ॥२॥४॥७२॥

इकारान्तान्नृजातेर्ङी–प्रत्ययो जायते स्त्रियाम् ॥
कुन्त्यवन्ती तथा दाक्षी प्लाक्षी च म्लुचुकायनी ॥७२॥

उतोऽप्राणिनश्चायुरज्ज्वादिभ्य ऊङ् ॥२॥४॥७३॥

नृजात्यप्राणिजातिभ्य, उदन्तेभ्यः स्त्रिया ननूङ् ॥

ग्नत्तरज्ज्वादिकेभ्यो नो–ऽलावूः कुरूर्बवूः पङ्गुः ॥७३॥

वाह्वन्तकद्रुकमण्डलोर्नाम्नि ॥२॥४॥७४

कद्रुकमण्डलुभ्या च, वाहुशब्दान्ततः स्त्रियाम् ॥
ऊङ् नाम्नि भवेद् भद्र–वाहूः कद्रूः कमण्डलूः ॥७४॥

उपमानसहितसंहितसहशफवामलक्ष्मणाद्यूरोः ॥२॥४॥७५॥

ऊरुशब्दात् स्त्रियामूङ् स्या–दुपमानादिपूर्वकात् ॥
वीतरागं न वामोरू, रंभोरूरपि कंपति ॥७५॥

नारी–सखी–पङ्गू–श्वश्रू ॥२॥४॥७६॥

श्वश्रू पङ्गू सखी नारी ङ्यन्तोऽन्ताश्च साधवः ॥
नारी वै नरकद्वारं, या सखीवाऽवभासते ॥७६॥

यूनस्तिः ॥२॥४॥७७॥

युवन्शब्दात् स्त्रियां तिः स्यात्, ङीमत्ययं स वाधते ॥
युवतिर्युवती गंगा नामा प्रतीपदर्शनी ॥७७॥

अनार्षे वृद्धेऽणिञो बहुस्वरगुरूपान्त्यस्यान्तस्य ष्यः ॥२॥४॥७८॥

वृद्धेऽनार्षेऽणिञो यौ स्त–स्तदन्त चेद् बहुस्वरम् ॥
गुरूपान्त्यं च तन्नाम्नो–ऽन्त्यस्य ष्यो देवदत्त्यका ॥७८॥

कुलाख्यानाम् ॥२॥४॥७९॥

वृद्धेऽनार्षे कुलाख्यस्या-ऽणिञन्तस्य स्त्रिया भवेत् ॥
ष्यादेशोऽन्त्यस्य पौणिक्यां, भौणिक्यां नय गौतमीम् ॥७९॥

क्रौड्यादीनाम् ॥२॥४॥८०॥

क्रौड्यादीनामणन्ताना–मिञन्तानामनन्तरे ॥
स्त्रियां ष्योऽन्त्यस्य विज्ञेयः, क्रौड्यालाड्या दयोमताः ॥८०॥

भोजसूतयोः क्षत्रियायुवत्योः ॥२॥४॥८१॥

ष्यः क्षत्रियायुवत्योः स्या–दन्त्यस्य भोजसूतयोः
भोज्या स्याद् भोजवंशीया, सूत्या सम्प्राप्तयौवना ॥८१॥

दैवयज्ञिशौचवृक्षिसात्यमुग्रिकाण्ठेविद्धेर्वा ॥२॥४॥८२॥

एषामिञन्तशब्दाना, ष्यादेशोऽन्त्यस्य वा स्त्रियाम् ॥
दैवयज्ञ्या भवे दैव–यज्ञ्यपि देवयज्ञसुता ॥८२॥

अनार्ष इति वर्जनात्, वृद्ध इति नागरा प्रथमापत्यम् ॥७८॥ गौत मादि प्रत्युदाहरणमपि तेनान्न ष्यो ऽत्र ॥७९॥ क्रौड्यादिगणः इति गण ॥८०॥ उक्ता-र्थाभावे तु भोजा सुता ॥८१॥ शेषस्य स्यान्नन्तासेयम् ॥८२॥

ष्या पुत्रपत्योः केवलयोरीच् तत्पुरुषे ॥२॥४॥८३॥

आनन्तः ष्यः प्रधाने स्या-दीच् पुत्रपतिशब्दयोः ॥
तत्पुरुषे नु कारीष-गन्धीपतिरयं भवेत् ॥८३॥

बन्धौ बहुव्रीहौ ॥२॥४॥८४॥

बन्धुशब्दे बहुव्रीहौ, ष्यान्त ईच् भवेद् ध्रुवम् ॥
मुख्येऽर्थे ननु कारीष-गन्धीबन्धुरुदाहृतः ॥८४॥

मातमातृमातृके वा ॥२॥४॥८५॥

आनन्तः ष्यो बहुव्रीहौ, वा मातमातृमातृके ॥
मुख्यश्चेदीच् नु कारीष-गन्धीमातः समौरभः ॥८५॥

अस्य ड्यां लुक् ॥२॥४॥८६॥

लुग् अकारस्य पूर्वस्य, भवेद् ङीप्रत्यये परे ॥
कुरुचरी तथा मद्रचरी कर्त्री च दण्डिनी ॥८६॥

मत्स्यस्य यः ॥२॥४॥८७॥

मत्स्यमत्स्यन्तिनो यस्य, लुप् स्याद् ङीप्रत्यये परे॥
महामत्सी मत्स्यमत्सी, स्याद्दशशतयोजना ॥८७॥

व्यञ्जनात् तद्धितस्य ॥२॥४॥८८॥

व्यञ्जनात् तद्धितस्य ङया, यकारस्य तु लुक् भवेत ॥
गार्गी च मनुषी मौमी, तथौचिनी च चातुरी ॥८८॥

सूर्यागस्त्ययोरीये च ॥२॥४॥८९॥

अनयोर्यस्य लुग नित्य, ङया तथैवेयमत्यये ॥
सूर्यभार्या नगे सूरी, प्रभा सौरी तमोऽपहा ॥८९॥

तिष्यपुष्ययोर्भाणि ॥२॥४॥९०॥

नक्षत्रेऽण्यनयोर्यस्य, सर्वदा लुग विधीयते ॥
पुष्येण संयुता राका, पौषी तपस्तदन्वितः ॥९०॥

आपत्यस्य क्यच्व्योः ॥२॥४॥९१॥

यस्याऽऽपत्यस्य लुक् क्यच्वौ, व्यञ्जनात् परवर्तिनः ॥
गार्गीभूना तथा गार्गी–यतीय गार्ग्यमिच्छति ॥९१॥

तद्धितयस्वरेऽनाति ॥२॥४॥९२॥

लुग् यस्य व्यञ्जनादाप–त्यस्य यादौ च तद्धिते ॥
अनात् स्वरादिके गार्ग्यो, गार्गीयोऽय कमण्डलुः ॥९२॥

बिल्वकीयादेरीयस्य ॥२॥४॥९३॥

बिल्वकीयादिशब्दाना, लुक् स्यात् तद्धितस्वरे ॥

इमस्य चन्द्रकायाः स्यु-र्मिन्नादयो नदादिषु ॥१.३॥

न राजन्यमनुष्ययोरके ॥२॥४॥१.४॥

नाके परे यकारस्य, लुक् राजन्यमनुष्ययोः ॥
राजन्यकं समूहः स्यात्, मानुष्यकं तथैव हि ॥१.४॥

ङ्यादेर्गौणस्याक्विपस्तद्धितलुक्यगोणीसूच्योः ॥२॥४॥१.५॥

अक्विबन्तस्य गौणस्य, ङ्यादेर्लुक् तद्धिते लुकि ॥
गौणी सूच्योर्न नालीद्यं, पञ्चेन्द्रः पञ्चकुमारकः ॥१.५॥

गोश्चान्ते ह्रस्वोऽनंशिसमासेयोबहुव्रीहौ ।२॥४॥१.६॥

स्यादन्तस्य च गौणस्या-क्विपो गोर्ह्रस्वता भवेत् ॥
नाम्नोऽनंशिसमासेयो-बहुव्रीहौ न चित्रगुः ॥१.६॥

क्लीबे ॥२॥४॥१.७॥

ह्रस्वता आयन नाम्नः, स्वरान्तस्य नपुंसके ॥
ह कीलालपं सख्ख, ग्रामण्यर्नियतिस्तु ना ॥१.७॥

वेदूतोऽनव्ययवृदीदूत्प्रश्नः पदे ॥२॥४॥१.८॥

स्यादनव्ययस्थो, वेदूतोस्तो न चाव्ययो ॥

ईऊरूपौ ग्वृत् च ङीरूपा–वियुवृस्थानौ च लङिमकः ॥९८॥

ङ्यापो बहुलं नाम्नि ॥२॥४॥९९॥

ह्रस्वो ङ्यावन्तयोर्नाम्नि, बहुलमुत्तरे पदे ॥
महिदत्तो महिदत्तः क्वचिन्नित्यं क्वचिन्नवा ॥९९॥

त्वे ॥२॥४॥१००॥

स्याद् ङ्यन्तावन्तयोर्ह्रस्वो, बहुलं त्वे नु प्रत्यये ॥
रोहिणित्वमजत्वं वा, भावोऽजाया न नश्वरः ॥१००॥

भ्रुवोऽच्च कुंसकुट्योः ॥२॥४॥१०१॥

कुंसकुट्योर्भवेद्ध्रस्वो–ऽकारश्चापि भ्रुवो ध्रुवम् ॥
भ्रकुंसश्च भ्रकुसश्च, भ्रकुटिर्भ्रकुटिस्तथा ॥१०१॥

मालेषीकेष्टकस्यान्तेऽपि भारितूलचिते ॥२॥४॥१०२॥

मालादीना यथासङ्ख्यं, तदन्तानाञ्च ह्रस्वता ॥
भारितूलचितेषु स्या–दुत्पलमालभारिणी ॥१०२॥

गोण्या मेये ॥२॥४॥१०३॥

स्यान्मेये वर्तमानस्य, गोणीशब्दस्य ह्रस्वता ॥
गोण्यामितो भवेद्गोणि–र्गोणी सा ननु केवला ॥१०३॥

सं न यदि ॥९८॥ बहुलमिति क्वचिन्नित्यं इत्यादि ॥९९॥ बहुलमिति अजा- वत्वमित्यपि ॥१००॥ स्पष्टम् ॥१०१॥ एवमिषीकातूलेष्टकचितमित्यादि ॥१०२॥ स्पष्टम् ॥१०३॥

ङ्यादीदूतः के ॥२॥४॥१०४॥

कप्रत्यये परे ह्रस्वो, ङ्यादीदूतां नु नित्यशः ॥
लक्ष्मिका वधुका विष्णोः, पट्विका सुकुमारिका ॥१०४॥

न कचि ॥२॥१०५॥

ङ्यादीदूतां भवेन्नैव, ह्रस्वता कचि प्रत्यये ॥
अधत्ते बहुलक्ष्मीका, मनुजा मानभाजनम् ॥१०५॥

न वाऽऽपः ॥२॥४॥१०६॥

आनन्तस्य कचि ज्ञेया, ह्रस्वता नु विभाषया ॥
विजयी बहुमालाको जायते बहुमालकः ॥१०६॥

इच्चापुंसोऽनित्क्याप्परे ॥२॥४॥१०७॥

अपुंलिङ्गार्थशब्दाद्धि स्यादनित्क्याप्परे नवै ॥
आपो ह्रस्व इकारश्च, खट्विका खट्वविकादयः ॥१०७॥

स्वज्ञाजभस्त्राधातुत्ययकात् ॥२॥४॥१०८॥

भवेत् स्वज्ञाजभस्त्रेभ्यो, धातुत्यभिन्नतो यकात् ॥
आपः स्थाने इकारो वा-ऽनित्के आप्परतः स्विका ॥१०८

[illegible] [illegible] [illegible] पट्विका, सुकुमारिका चेत्यन्वय ॥१०४॥
[illegible], [illegible], [illegible] इत्यादि ज्ञेयम् ॥१०५॥
[illegible] ॥१०६॥ [illegible] [illegible], अनित्किति दुर्गका, आपर इति प्रिय-
[illegible], [illegible] [illegible] [illegible] ॥१०७॥ [illegible] [illegible] । एव [illegible] [illegible]-
[illegible] । [illegible] [illegible] [illegible] ॥१०८॥

द्वयेषसूतपुत्रवृन्दारकस्य ॥२॥४॥१०९॥

द्वयेषसूतादिशब्दाना, स्यादनित्क्याप्परे नवा ॥
इकारः सूतिका वृन्दा-रिका वृन्दारकादयः ॥१०९॥

वौ वर्तिका ॥२॥४॥११०॥

विहायस्यभिधेये वा, वर्तिकेत्वेन जायते ॥
वर्तिका वर्तकश्चोभौ, इयेते तौ विहायसि ॥११०॥

अस्याययत्क्षिपकादीनाम् ॥२॥४॥१११॥

अयत्तत्क्षिपकादेरि-दस्यानित् क्याप्परे भवेत् ॥
कारिका वाचिका नौका नन्दका वहुभद्रका ॥१११॥

नरिकामामिका ॥२॥४॥११२॥

ककारे प्रत्ययस्थे वै, आप्परे नरकस्य च ॥
मामकस्य भवेदित्व, नरिका मामिका तथा ॥११२॥

तारकावर्णकाऽष्टका ज्योतिस्तान्तवपितृदेवत्ये ॥२॥४॥११३॥

तारकाद्या निनेकार, क्रमशो ज्योतिरादिषु ॥
निपात्यास्तारका ज्योति-स्तारा चेन्ननु नारिका ॥११३॥

॥ इति चतुर्थःपादः ॥ द्वितीयोऽध्यायः समाप्तः ॥

एत द्विके, द्रक, एषिका, एषका, सूतका, पुत्रिका, पुत्रका इत्यादि ॥१०९॥ विहायसि—अभिधानार्थे । विहायसि गगन इत्यर्थ । पक्ष्यभावे तु वर्तिका भागुरि ॥११०॥ उदाहरणपञ्चके द्वयमुदाहरण तत्र प्रत्युदाहरणम् । यदादिवर्जनात् यका, सका क्षिपकेत्यादि ॥१११॥ स्पष्टम् ॥११२॥ तारका नान्तामिति प्रावरणविशेष, अष्टका पितृदेवत्य कर्म ॥११३॥

इति चतुर्थे पाद ॥ द्वितीयाऽध्याय समाप्त ॥

॥ अथ तृतीयोऽध्यायः

धातोः पूजार्थस्वतिगतार्थाधिपर्यतिक्रमार्थातिवर्जः प्रादिरुपसर्गः प्राक् च ॥३॥१॥१॥

धातोः प्रयुज्यते प्रादिः, प्रागुपसर्गसंज्ञकः ॥
स्तौ अधिपरी चाति, त्यक्त्वोक्तार्थान् निपिश्चिनि ॥१॥

ऊर्याद्यनुकरणच्विडाचश्च गतिः ॥३॥१॥२॥

ऊर्याद्यनुकृतिच्व्यन्त–डाजन्ता गतिसंज्ञकाः ॥
भवेयुरुपसर्गश्च, धातोः प्रागुदीरिताः ॥२॥

कारिका स्थित्यादौ ॥३॥१॥३॥

गतिः स्यात् कारिकाशब्दः, स्थितियत्नक्रियार्थकः ॥
प्राग् धातोः कारिकाकृत्या–ऽन्यार्थं कृत्वा नु कारिकाम् ॥३॥

भूषादरक्षेपेऽलमदसत् ॥३॥१॥४॥

अलंसदसतो भूषा–दरक्षेपार्थकाः क्रमात् ॥
गतिसंज्ञा अलंकृत्य, सत्कृत्य फलमादिशेत् ॥४॥

अग्रहानुपदेशेऽन्तरदः ॥३॥१॥५॥

गती अन्तरदः शब्दा–वग्रहानुपदेशयोः ॥
अन्तर्हत्या गतान् शत्रून्, अदःकृत्य करिष्यति ॥५॥

कणेमनस्तृप्तौ ॥३॥१॥६॥

स्यात्तृप्तौ गम्यमानाया, गत्यव्यय कणे मनः ॥
द्राक्षामद्धि कणेहत्य, मनोहत्वौपधं पिब ॥६॥

पुरोऽस्तमव्ययम् ॥३॥१॥७॥

पुरोऽस्तमव्यये स्याता, धातोः सम्बन्धिनी ध्रुवम् ॥
गतिसंज्ञे पुरस्कृत्य, गत्वाऽस्तं भाति भास्करः ॥७॥

गत्यर्थवदोऽच्छः ॥३॥१॥८॥

गत्यर्थवदसम्बन्धि, स्यादच्छेत्यव्ययं गतिः ॥
अभ्यर्थे च दृढार्थे चे-दच्छोद्य स्थापयेन्मतम् ॥८॥

तिरोऽन्तर्धौ ॥३॥१॥९॥

तिरः स्याद्व्यवधाने चे-दव्यय गतिसंज्ञकम् ॥
तिरोभूय तिरोधाय, तिरोभूत्वा गतो दिनम् ॥९॥

कृगो नवा ॥३॥१॥१०॥

कृगो युक्त तिरोऽन्तर्धौ, गतिसंज्ञं विभाषया ॥
तिरस्कृत्य तिरस्कृत्वा, मोहं मुक्तिमितो मुनिः ॥१०॥

मध्येपदेनिवचनेमनस्युरस्यनत्याधाने ॥३॥१॥११॥

वैते पञ्च कृगो योगे, सप्तमीप्रतिरूपकाः ॥
अनुपश्लेषणे मध्ये-कृत्यात्मानं सुखी भव ॥११॥

मनो हत्वेति प्रत्युदाहरणम् ॥६॥ गत्वाऽस्तमिति प्रत्युदाहरणम् ॥७॥ [illegible]-दृढ्युक्तेरर्थे ॥८॥ तिरोभूय [illegible], अन्तर्धानाभा-वे गतिसंज्ञा ॥९॥ [illegible] ॥१०॥ [illegible] कृत्वात्मनेपदम् ॥११॥

उपाजेऽन्वाजे ॥३॥१॥१२॥

वाऽबलस्य बलाधाने, गतिसंज्ञे इमे कृगा ॥
उपाजेकृत्य वोपाजे–कृत्वा कीर्तिमुपार्जय ॥१२॥

स्वाम्येऽधिः ॥३॥१॥१३॥

स्वामित्वेऽर्थे कृगो योगे, वाऽधीत्येतद्गतिर्भवेत् ॥
ग्राम ग्रामेऽधिकृत्याधिकृत्वा वा सुखमाप्नुत ॥१३॥

साक्षादादिश्च्व्यर्थे ॥३॥१॥१४॥

स्युः साक्षादादयः शब्दा–श्च्व्यर्थे कृग्योगिनो नवा ॥
गतिसंज्ञाः परं साक्षात्–कृत्यात्मानं शिवं व्रज ॥१४॥

नित्यं हस्तेपाणावुद्वाहे ॥३॥१॥१५॥

हस्तेपाणाविमौ शब्दौ, गती स्तो दारकर्मणि ॥
गम्यमाने कृगा योगे, पाणौकृत्य व्रत चर ॥१५॥

प्राध्वं बन्धे ॥३॥१॥१६॥

प्राध्वंशब्दः कृगो धातोः, सम्बन्धी गतिसंज्ञकः ॥
चेदनुकूलबन्धार्थे, प्राध्वंकृत्य गृहीकृताः ॥१६॥

जीविकोपनिषदावौपम्ये ॥३॥१॥१७॥

जीविकोपनिषच्छब्दौ, भवेतां गतिसंज्ञकौ ॥

औपम्येऽर्थे कृगा धर्मं, जीविकाकृत्य रक्ष्यताम् ॥१७॥

नाम नाम्नैकार्थ्ये समासो बहुलम् ॥३॥१॥१८॥

नाम नाम्ना सहैकार्थ्ये, समाससंज्ञकं भवेत् ॥
ना विविक्तकषायश्चेद् , भवेन्निपुणपण्डितः॥१८॥

सुज्वार्थे संख्या संख्येये संख्यया बहुव्रीहिः ॥३॥१॥१९॥

स्यात् सङ्ख्यावाचिना सङ्ख्या–वाचि सुज्वार्थनाम चेत् ॥
ऐकार्थ्य वै बहुव्रीहिः, समासाः सन्ति पञ्चपाः ॥१९॥

आसन्नादूराधिकाध्यर्धार्धादिपूरणं द्वितीयाद्यन्यार्थे ॥३॥१॥२०॥

स्यादासन्नादिकं नाम, समस्तं सङ्ख्यया समम् ॥
नाम्नैकार्थ्ये द्वितीयाद्य–न्यार्थेऽदूरदशा इमे ॥२०॥

अव्ययम् ॥३॥१॥२१॥

अव्ययं नाम सङ्ख्याया, वाचकेन समस्यते ॥
अन्यच्च पूर्ववद् ज्ञेय–मुपदिशा अनेकशः ॥२१॥

एकार्थं चानेकं च ॥३॥१॥२२॥

अनेकं पुनरेकं च-कार्थं नामाव्ययं तथा ॥
नाम्ना समस्यते त्वन्यत्, पूर्ववत् प्राप्तमङ्गलः ॥२२॥

उष्ट्रमुखादयः ॥३॥१॥२३॥

उष्ट्रमुखादयः शब्दा, बहुव्रीहिसमासकाः ॥
बाहुल्येन निपात्यन्ते, हरिणाक्षी स्थिरा क्वचित् ॥२३॥

सहस्तेन ॥३॥१॥२४॥

तुल्ययोगे तथा विद्य-मानार्थे तु सहाव्ययम् ॥
तृतीयान्तेन प्राग्वत् तद्, बहुव्रीहिः सपक्षकः ॥२४॥

दिशो रूढ्यान्तराले ॥३॥१॥२५॥

अन्तराले दिशो नाम, रूढ्या दिग्वाचि यद्भवेत् ॥
दिशो नाम्ना समस्त दिग्, आग्नेयी पूर्वदक्षिणा ॥२५॥

तत्रादाय मिथस्तेन प्रहृत्येति सरूपेण युद्धेऽव्ययीभावः ॥३॥१॥२६॥

नाम्ना समानरूपेण, सप्तम्यन्तं रणे सति ॥
समस्यते प्रहृत्येत्य-व्ययीभावः कचाकचि ॥२६॥

नदीभिर्नाम्नि ॥३॥१॥२७॥

नाम समस्यते नाम्नि, नदीवाचकनामभिः ॥
अव्ययीभावसञ्ज्ञं तत्, तूष्णींगङ्ग तु पूर्ववत् ॥२७॥

संख्या समाहारे ॥३॥१॥२८॥

सङ्ख्यावाचि समस्तं स्यान्नदीवाचकनामभिः ॥
समाहारेऽव्ययीभाव-संज्ञं पञ्चनदं वरम् ॥२८॥

वंश्येन पूर्वार्थे ॥३॥१॥२९॥

सङ्ख्यावाचि समस्तं स्यान्नाम्ना वंश्याभिधायिना ॥
पूर्वस्यार्थेऽव्ययीभावो, द्विमुनि त्रिमुनि श्रुतम् ॥२९॥

पारेमध्येऽग्रेऽन्तः षष्ठ्या वा ॥३॥१॥३०॥

पारेमध्येऽन्तरग्रे वा, षष्ठ्यन्तेन समस्यते ॥
स समासोऽव्ययीभावः, पारेभव गङ्गादम् ॥३०॥

यावदियत्त्वे ॥३॥१॥३१॥

समस्यते सम नाम्ना, यावदित्यवधारणे ॥
स समासोऽव्ययीभावो, भोजय यावदोऽन्नम् ॥३१॥

पर्यपाङ्बहिरच् पञ्चम्या ॥२॥१॥३२॥

पर्यादीनि समं नाम्ना, पञ्चम्यन्तेन सर्वदा ॥
समस्यन्तेऽव्ययीभाव, आग्रामं वारि वर्षति ॥३२॥

लक्षणेनाभिप्रत्याभिमुख्ये ॥२॥१॥३३॥

अभिप्रती समस्येते, साम्मुख्ये चिह्नवाचिना ॥
स समासोऽव्ययीभावः, प्रत्यग्नि शलभा गताः ॥३३॥

दैर्घ्येऽनु. ॥२॥१॥३४॥

लक्षणवाचिना नाम्ना, दैर्घ्येऽन्विति समस्यते ॥
समासः सोऽव्ययीभावः, काननमनुनर्मदम् ॥३४॥

समीपे ॥२॥१॥३५॥

अनुनाम समीपेऽर्थे, नाम्ना सामीप्यवाचिना ॥
समस्यतेऽव्ययीभावो–ऽनुवनमशनिर्गता ॥३५॥

तिष्ठद्गुप्रभृतीनि च ॥२॥१॥३६॥

तिष्ठद्गुप्रभृताः शब्दा, अव्ययीभावसंज्ञकाः ॥
निपात्यन्ते समासे यद्, वहद्गु चायतीगवम् ॥३६॥

नित्यं प्रतिनाऽल्पे ॥२॥१॥३७॥

अल्पेऽर्थे प्रतिना नाम्ना, नाम नित्यं समस्यते ॥

स समासोऽव्ययीभावो, जनप्रति जनाल्पता ॥३७॥

संख्याक्षशलाकं परिणा द्यूतेऽन्यथावृत्तौ ॥३।१।३८॥

परिणा हि समस्यन्ते, शब्दाः सङ्ख्यादयस्त्रयः ॥
अव्ययीभावता द्यूते-ऽन्यथावृत्तौ चतुष्परि ॥३८॥

विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययाऽसंप्रति-
पश्चात्क्रमख्यातियुगपत्सदृक्संपत्साकल्यान्तेऽ
व्ययम् ॥३।१।३९॥

समस्यते विभक्त्याद्या-वर्थे नाम्ना सहाव्ययम् ॥
स समासोऽव्ययीभावो, ह्यधिस्त्रि वर्तते गृहम् ॥३९॥

योग्यतावीप्सार्थानतिवृत्तिसादृश्ये ॥३।१।४०॥

योग्यतायां च वीप्सार्थे, सादृश्येऽनतिवृत्तिके ॥

समस्यतेऽव्यय नाम्ना–ऽव्ययीभावो यथाबलम् ॥४०॥

यथाऽथा ॥३॥१॥४१॥

समस्यते समं नाम्ना, थान्तभिन्नं यथाव्ययम् ॥
स समासोऽव्ययीभावो, यथारूपं विचेष्टते ॥४१॥

गतिक्वन्यस्तत्पुरुषः ॥३॥१॥४२॥

नित्यं नाम्ना समस्यन्ते, क्वव्ययं गतिसञ्ज्ञकाः ॥
अन्यलक्षणहीनोऽय, तत्पुरुषः कदुष्णकम् ॥४२॥

दुर्निन्दाकृच्छ्रे ॥३॥१॥४३॥

निन्दायामथ कृच्छ्रेऽर्थे समम्यते दुरव्ययम् ॥
तत्पुरुषः समासोऽयं, दुष्पुरुषेण दुष्कृतम् ॥४३॥

सुः पूजायाम् ॥३॥१॥४४॥

अव्यय स्विति पूजाया नित्य नाम्ना समस्यते ॥
तत्पुरुषः समासोऽयं, सुराजा शास्ति सत्प्रजाः ॥४४॥

अतिरतिक्रमे च ॥३॥१॥४५॥

अतिक्रमे च पूजाया–मत्यव्ययं समस्यते ॥
तत्पुरुषः समासोऽयं, नातिस्नतमतीकृतं ॥४५॥

आङल्पे ॥३॥१॥४६॥

आङित्यव्ययमल्पेऽर्थे, नाम्ना नित्यं समस्यते ॥
तत्पुरुषः समासोऽय-मापिङ्गलोऽल्पपिङ्गलः ॥४६॥

प्रात्यवपरिनिरादयो गतक्रान्तक्रुष्टग्लानक्रान्ता-
द्यर्थाः प्रथमाद्यन्तैः ॥३॥१॥४७॥

प्रादयः प्रथमाद्यन्ते-र्गताद्यर्थेष्वनुक्रमम् ॥
नामभिस्तैः समस्यन्ते, प्राचार्यश्चावकोकिलः ॥४७॥

अव्ययं प्रवृद्धादिभिः ॥३॥१॥४८॥

समस्यतेऽव्ययं नाम, प्रवृद्धादिकनामभिः ॥
तत्पुरुषः समासः स, पुनरुक्तं वचोऽनचः ॥ ४८ ॥

ङस्युक्तं कृता ॥३॥१॥४९॥

ङस्युक्तं तु कृदन्तेन, नाम्ना नित्यं समस्यते ॥
यथा योऽकरोत् कुम्भं, कुम्भकार इतीरितः ॥४९॥

तृतीयोक्तं वा ॥३॥१॥५०॥

तृतीयोक्तं समस्तं स्या-न्नाम नाम्ना कृता सदा ॥
तत्पुरुषः स पार्श्वोप-पीडं शेते निगमयः ॥५०॥

नञ् ॥३॥१॥५१॥

समस्यते नञित्येत-न्नाम नाम्ना समं ध्रुवम् ॥
अनुच्चैरुच्यता लोको, वचो न स्याद्यतोऽसुखः ॥५१॥

पूर्वापराधरोत्तरमभिन्नेनांशिना ॥३॥१॥५२॥

अभिन्नेनांशिना पूर्वा-दयः शब्दा नु पूर्ववत् ॥
समस्यन्तेऽपरो नाभे-रधरनाभिरुच्यते ॥५२॥

सायाह्नादयः ॥३॥१॥५३॥

सायाह्नप्रमुखाः शब्दा-स्तत्पुरुषेण चांशिना ॥
जायन्ते साधवः साय-मह्नः सायाह्न उच्यते ॥५३॥

समेंऽशेऽर्धं नवा ॥३॥१॥५४॥

अभिन्नेनांशिना नाम्ना, वार्धं समांशवाचकम् ॥
समस्यते हि पिप्पल्या, अर्धं स्यादर्धपिप्पली ॥५४॥

जरत्यादिभिः ॥३॥१॥५५॥

अर्धशब्दो जरत्याद्य-रभिन्नैरंशिभिनना ॥
समस्यतेऽर्धो मध्याया, अर्धमध्याऽर्धलोकितम् ॥५५॥

अभिन्नेनाशिना ना स्युः, समस्तास्तुर्यभिक्षणम् ॥५६॥

काले द्विगौ च मेयैः ॥३॥१॥५७॥

नामैकवचनान्तं नु, कालवाचि द्विगौ पुनः ॥
मेयनाम्ना समस्तं स्या-न्मासजातो हरिर्हरिः ॥५७॥

स्वयंसामी क्तेन ॥३॥१॥५८॥

समस्येते स्वयंसामी, नाम्ना क्तान्तेन नित्यशः ॥
पूर्ववत्तु सामिधौतिः, स्वायक्रूनिर्भनेनया ॥५८॥

द्वितीया खट्वा क्षेपे ॥३॥१॥५९॥

खट्वानाम द्वितीयान्त, नाम्ना क्तान्तेन नित्यशः ॥
क्षेपे समस्यते खट्वा-रूढो जाल्मश्चलन्नपि ॥५९॥

कालः ॥३॥१॥६०॥

कालवाचि द्वितीयान्तं, नाम्ना सह समस्यते ॥
यो मास श्रमितो मास-प्रमित. प्रतिपद्विधुः ॥६०॥

व्याप्तौ ॥३॥१॥६१॥

भवेद् व्याप्तिद्वितीयान्तं, कालार्थं नाम पूर्ववत् ॥
व्यापकवाचिना नाम्ना, समस्त स्यान्मुहूर्तगम ॥६१॥

श्रितादिभि ॥३॥१॥६२॥

समस्यते द्वितीयान्त, नाम नामश्रितादिभि ॥

धर्मश्रितः स संसारा-तीतोऽभवदसंशयम् ॥६२॥

प्राप्तापन्नौ तयाच्च ॥३॥१॥६३॥

प्रथमान्ताविमौ शब्दौ, समस्येते द्वितीयया ॥
अत्वमन्तेऽनयोः स्यादा-पन्नसत्त्वा नु सीदति ॥६३॥

ईषद् गुणवचनैः ॥३॥१॥६४॥

समस्यते गुणाख्यैर्य-दीषदित्येतदव्ययम् ॥
कोपेपत्लोहितेऽपीशे, किङ्करा ननु बिभ्यति ॥६४॥

तृतीया तत्कृतैः ॥३॥१॥६५॥

तृतीयान्त गुणाख्यैस्तत्-कृतैः सह समस्यते ॥
अन्तर्भूतकृतार्थोऽयं, शिशुः शास्त्रपटुः पटुः ॥६५॥

चतस्रार्धम् ॥३॥१॥६६॥

समं चतसृशब्देन, समासोऽर्धस्य पूर्ववत् ॥
मात्राऽर्धचतस्रोऽर्थ-चतस्रः शाटिकाः कृताः ॥६६॥

ऊनार्थपूर्वाद्यैः ॥३॥१॥६७॥

पूर्वादिभिस्तथोनार्थ-स्तृतीयान्तं समस्यते ॥
माषाधिक च माषोन, मालोऽय वत्सराचरः ॥६७॥

कारकं कृता ॥३॥१॥६८॥

समस्यते तृतीयान्तं, कर्तृ सा करण कृता ॥

परकृत फलेन्नात्म-कृन स्यात् कृतमात्मना ॥६८॥

नविंशत्यादिनैकोऽच्चान्तः ॥३॥१॥६९॥

तृतीयान्तैकशब्दस्य, नविंशत्यादिनामभिः ॥
समासोऽन्ते तथैकस्या-दिति चैकान्नविंशतिः ॥६९॥

चतुर्थी प्रकृत्या ॥३॥१॥७०॥

विकृत्यर्थं चतुर्थ्यन्तं, नाम्ना प्रकृतिवाचिना ॥
समस्यते नु यूपाय, दारु स्याद्यूपदारुकम् ॥७०॥

हितादिभिः ॥३॥१॥७१॥

हितादिभिश्चतुर्थ्यन्तं, तत्पुरुषे समस्यते ॥
गोहित गोसुख सिद्ध, नाट्यशालाऽश्मनेपदम् ॥७१

तदर्थार्थेन ॥३॥१॥७२॥

तुर्यार्थेनार्थशब्देन, चतुर्थ्यन्तं समस्यते ॥
तपः कर्मक्षयार्थं स्या-न्मोक्षार्थः कर्मसंक्षयः ॥७२॥

पञ्चमी भयाद्यैः ॥३॥१॥७३॥

भयाद्यैर्नामभिः साक, पञ्चम्यन्तं समस्यते ॥
स्थानभ्रष्टा वने बाला, जयभीता नु वेपते ॥७३॥

क्तेनाऽसत्त्वे ॥३॥१॥७४॥

नाम्ना क्तान्तेन सार्धं नु, पञ्चम्यन्तं समस्यते ॥

असत्त्वे पञ्चमीयं चेत्, स्तोकान्मुक्तोऽपि भाग्यवान् ॥७४॥

परःशतादिः ॥३॥१॥७५॥

पञ्चम्यन्तसमासास्तत्-पुरुषाः स्युर्निपातिताः ॥
परःशतादयः शब्दाः, परोलक्षाः परःशताः ॥७५॥

षष्ठ्ययत्नाच्छेषे ॥३॥१॥७६॥

'शेषे' 'षष्ठी' तदन्तं नु, नाम नाम्ना समस्यते ॥
शेषोऽयत्नकृतो ग्राह्य-श्चिरसुग्व मातुर्गीशितम् ॥७६॥

कृति ॥३॥१॥७७॥

कृन्निमित्तकषष्ठ्यन्तं, नाम नित्यं समस्यते ॥
नाम्ना गणधरोक्तिः स्यात्, सर्वदा पापशातना ॥७७॥

याजकादिभिः ॥३॥१॥७८॥

समस्यतं सम नाम, षष्ठ्यन्त याजकादिभिः ॥
भवेद् गुरुसमः सोऽपि, यो नित्यं गुरुपूजकः ॥७८॥

पत्तिरथौ गणकेन ॥३॥१॥७९॥

पत्तिरथौ समस्येते, षष्ठ्यन्तौ गणकेन वै ॥
स्याद्रथगणकः सेना-पत्ती रथस्य दर्शकः ॥७९॥

सर्वपश्चादादयः ॥३।१।८०॥

षष्ठीतत्पुरुषाः सर्व–पश्चादित्येवमादयः ॥
साधवो लक्षणे सर्व–पश्चात् सर्वचिरादयः ॥८०॥

अकेन क्रीडाऽऽजीवे ॥३।१।८१॥

नाम्नाऽकप्रत्ययान्तेन, षष्ठ्यन्तं तु समस्यते ॥
चेत् क्रीडाजीवयोः शाल–भञ्जिका नखलेखकः ॥८१॥

न कर्तरि ॥३।१।८२॥

कर्तृविहितषष्ठ्यन्तं, नाम नैव समस्यते ॥
नाम्नाऽकप्रत्ययान्तेन भवतः शायिका शुभा ॥८२॥

कर्मजा तृचा च ॥३।१।८३॥

कर्मविहितषष्ठ्यन्तं, कर्त्रर्थाऽक–तृचा समम् ॥
नाम्ना समस्यते नैव, सक्तूनां पायको नरः ॥८३॥

तृतीयायाम् ॥३।१।८४॥

कर्तरि या तृतीयाऽस्मिन्, तस्या षष्ठी तु कर्मजा ॥
न च समस्यतेऽगोपै–र्गवां दोहो नु चित्रकृत् ॥८४॥

तृप्तार्थपूरणाव्ययाऽतृशशत्रानशा ॥३।१।८५॥

तृप्तार्थपूरणे शत्रा–नशन्तव्ययतृशा ॥

न समासोऽव्ययशब्दैश्च, षष्ठ्यन्तस्यान्तिमोऽर्हताम् ॥८५॥

ज्ञानेच्छार्चार्थाधारक्तेन ॥३॥१॥८६॥

ज्ञानेच्छार्चार्थधातोर्य, आधारे क्तस्तदन्तकैः ॥
नामभिर्नैव षष्ठ्यन्त, समस्यते न सतां मतः ॥८६॥

अस्वस्थगुणैः ॥३॥१॥८७॥

समस्यते न षष्ठ्यन्त-मनात्मगुणनामभिः ॥
सौरभं शतपत्राणां, गन्धवाहेन नीयते ॥८७॥

सप्तमी शौण्डाद्यैः ॥३॥१॥८८॥

सप्तम्यन्तं समस्तं स्यात्, शौण्डाद्यैर्नामभिः समम् ॥
वेदान्तपण्डितः पान-शौण्डो ह्यचपलो जनः ॥८८॥

सिंहाद्यैः पूजायाम् ॥३॥१॥८९॥

सिंहाद्यैर्नामभिर्नाम, सप्तम्यन्त समस्यते ॥
पूजाया कालिकाचार्यो, नून कलियुधिष्ठिरः ॥८९॥

काकाद्यैः क्षेपे ॥३॥१॥९०॥

काकाद्यैर्नामभिर्नाम, सप्तम्यन्तं समस्यते ॥
क्षेपे गर्ते कलौ काले, तीर्थकाकाः पदे पदे ॥९०॥

पात्रेसमितेत्यादयः ॥३॥१॥९१॥

सप्तम्यन्ताः समासेन, स्युः पात्रेसमितादयः ॥
निपातिता नु निन्दायां, गेहेशूरो भयद्रुतः ॥९१॥

क्तेन ॥३॥१॥९२॥

क्षेपे क्तान्तेन नाम्ना नु, सप्तम्यन्तं समस्यते ॥
चेद् भस्मनिहुत तेन, प्रवाहेमूत्रित त्वया ॥९२॥

तत्राहोरात्रांशम् ॥३॥१॥९३॥

सप्तम्यन्ताः समस्यन्ते-ऽहोरात्राशाश्च तत्र च ॥
क्तान्तेन सह पूर्वाह्ण-भुक्त तत्रकृत वरम् ॥९३॥

नाम्नि ॥३॥१॥९४॥

सप्तम्यन्तं नु संज्ञायां, नाम नाम्ना समस्यते ॥
अरण्येतिलकाः स्तूपे-शाणः कूपेपिशाचिकाः ॥९४

कृत्येनावश्यके ॥३॥१॥९५॥

अर्थे आवश्यके गम्ये, सप्तम्यन्तं समस्यते ॥
कृत्यान्तेन सदा प्रात-रध्येय पठता हितम् ॥९५॥

विशेषणं विशेष्येणैकार्थं कर्मधारयश्च ॥३॥१॥९६॥

समस्यते विशेष्येण, नामैकार्थं विशेषणम् ॥

स्पष्टे ॥९१॥९२॥ घट कृतम्, शुक्लपक्षे कृतम्, अह्नि भुक्तम्, निशि नृत्तमित्यादौ तत्राहोरात्राशाभावान समास ॥९३॥ अरण्येतिलकादयो नामविशेषा इति ॥९४॥ कृदिति मासे पित्र्यम् ॥९५॥ एकार्थमिति द्वद

तत्पुरुषः स नीलाब्द-स्तथैव कर्मधारयः ॥९६॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलम् ॥३॥१॥९७॥

पूर्वकालार्थकं नाम-कादीन्येकार्थगानि च ॥
नाम्ना सार्धं समस्यन्ते, पार्थ एकधनुर्धरः ॥९७॥

दिगधिकं संज्ञातद्धितोत्तरपदे ॥३॥१॥९८॥

दिगन्यधिकमित्येतत्, संज्ञायामुत्तरे पदे ॥
तद्धिते च समस्तं स्या-द्दो दक्षिणकोशलाः ॥९८॥

संख्या समाहारे च द्विगुश्चानाम्न्ययम् ॥३॥१॥९९॥

संख्यानाम्नि समस्तं स्यात्, समाहारे तु पूर्ववत् ॥
अनाम्नां द्विगुश्चाय, द्वैमातुरो विनायकः ॥९९॥

निन्द्यं कुत्सनैरपापाद्यैः ॥३॥१॥१००॥

निन्द्यवाचकशब्दा-सपापाद्यैस्तु कुत्सनैः ॥
समस्यते गुणीमूर्खो, नृजाल्मः कवितस्करः ॥१००॥

उपमानं सामान्यैः ॥३॥१॥१०१॥

उपमान शब्दसार्धं, सामान्यवाचिनासिः ॥

समस्तं ऊखुदश्येनी, काकवन्ध्यालपशोभना॥१०१॥

उपमेयं व्याघ्राद्यैः साम्यानुक्तौ ॥३॥१॥१०२॥

एकार्थमुपमेयं चेद्, व्याघ्रादिभिः समस्यते॥
सामानस्याप्रयोगे तु, राजलक्ष्मीर्नरर्षभः ॥१०२॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ॥३॥१॥१०३॥

पूर्वादीनि समस्यन्ते, नाम्नैकार्थानि लक्ष्यताम् ॥
दीनाना पालको वीर-पुरुषो न तु पीडकः ॥१०३॥

श्रेण्यादि कृताद्यैश्च्व्यर्थे ॥३॥१॥१०४॥

श्रेण्यादयः समस्यन्ते, कृताद्यैर्नामभिः समम् ॥
च्व्यर्थे गम्ये सदेकार्था, इन्द्रकृताः पट्टकृताः ॥१०४॥

क्तं नञादिभिन्नैः ॥३॥१॥१०५॥

क्तान्तं समस्यते नाम, तैरेव संयुतैर्नञा ॥
भुक्तं च तदभुक्तं च, भुक्ताभुक्तं कृताकृतम् ॥१०५॥

सेड्नाऽनिटा ॥३॥१॥१०६॥

पूर्वं चेन्नाम सेट् क्तान्तं, नानिट्केन समस्यते ॥

इत्यादौ क्रमश उपमानसामान्याभावान्न समास ॥१०१॥ साम्यानुक्ताविति किं? पुरुषव्याघ्र शूर इति मा भूत् ॥१०२॥ एव पूर्वपुरुष इत्यादयो बोध्या ॥१०३॥ इन्द्रकृता इत्यादौ समासेनैव च्व्यर्थो लक्ष्यते । पट्टकृता इत्यादयश्च्व्यन्ता एव ॥१०४॥ क्त इति-कृतं्यमकृतंच । नञादिभिन्नैरिति-कृत प्रकृतम्, कृत चाविहितञ्च ॥१०५॥ सेटम् ॥१०६॥

तेन क्लिशितमक्लिष्टं, क्लिष्टाक्लिशितमात्मना ॥१०६

सन्महत्परमोत्तमोत्कृष्टं पूजायाम् ॥३॥१॥१०७॥

सदादीनि समस्यन्ते, पूजाया नामभिः समम् ॥
एकार्थानि महामान्यो, जगत्या सज्जनो जनः ॥१०७॥

वृन्दारकनागकुञ्जरैः ॥३॥१॥१०८॥

पूज्यं समस्यते वृन्दा-रकनागककुञ्जरैः ॥
वृषवृन्दारको हस्ति-नागस्तुरगकुञ्जरः ॥१०८॥

कतरकतमौ जातिप्रश्ने ॥३॥१॥१०९॥

जातिप्रश्ने समस्येते, कतरकतमौ समम् ॥
जात्या कनमकालापः, कतरः कतमः सितः ॥१०९॥

किं क्षेपे ॥३॥१॥११०॥

निन्दाया नु किमित्येत-न्नामकार्थं समस्यते ॥
क्षिप्यमाणार्थशब्देन, किराजा यो न रक्षति ॥११०॥

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणी
प्रवक्तृश्रोत्रियाध्यापकधूर्तप्रशंसारूढैर्जातिः

प्रशसारूढशब्दैश्च, महेभ्ययुवती रमा ॥१११॥

चतुष्पाद् गर्भिण्या ॥३॥१॥११२॥

समस्त नाम गर्भिण्या, चतुष्पाज्जातिवाचकम् ॥
शार्दूलगर्भिणी वाजि–गर्भिणी गजगर्भिणी ॥११२॥

युवाखलतिपलितजरद्वलिनैः ॥३॥१॥११३॥

युवन्नित्येतदेकार्थं, खलत्याद्यैः समस्यते ॥
पादपमातपातप्तो, युवखलतिराश्रितः ॥११३॥

कृत्यतुल्याख्यमजात्या ॥३॥१॥११४॥

कृत्यान्तं तुल्यपर्याय–मजातिवाचिना समम् ॥
समस्तं जायते भोज्य–तिक्त पानीयशीतलम् ॥११४॥

कुमारः श्रमणादिना ॥३॥१॥११५॥

भवेत् कुमार इत्येतत्, समस्त श्रमणादिना ॥
कुमारश्रमणा नूनं, धर्मकार्येषु तत्पराः ॥११५॥

मयूरव्यंसकेत्यादयः ॥३॥१॥११६॥

तत्पुरुषे निपात्यन्ते, मयूरव्यंसकादयः ॥
मयूरव्यंसको वाग्मी, निश्चप्रचं नृवञ्चकः ॥११६॥

गोमतल्लिका, गोप्रकाण्डम् ॥१११॥–जातिरित्येव कालाक्षी–गर्भिणी ॥११२॥ एव युवपलित., युवजरन्, युववलिन., इत्यादि ॥११३॥ अजात्येति भोज्य ओदन॰ ॥११४॥ स्पष्टम् ॥११५॥ आकृतिगणोऽयम् । शाकपार्थिवाद-योऽप्यत्र ॥११६॥

चार्थे द्वन्द्वः सहोक्तौ ॥३॥१॥११७॥

सहोक्तिविषये चार्थे, नाम नाम्ना समस्यते ॥
द्वन्द्वसंज्ञः समासोऽयं, वन्देऽहं वृषभाजितौ ॥११७॥

समानामर्थेनैकः शेषः ॥३॥१॥११८॥

समानार्थकशब्दाना, मध्ये एकश्च शिष्यते ॥
सहोक्तौ गम्यमानाया, वक्रदण्डौ सितास्तथा ॥११८॥

स्यादावसङ्ख्येयः ॥३॥१॥११९॥

शब्दाना तुल्यरूपाणा, स्यादावेकश्च शिष्यते ॥
असङ्ख्येयः सहोक्तिश्चे-दक्षाः पादाः नरा द्विजाः ॥११९॥

त्यदादिः ॥३॥१॥१२०॥

त्यदादिना तथाऽन्येन, त्यदादिः शिष्यते ततः ॥
एक एव स चान्यस्तौ, भवन्तौ कुरुता हितम् ॥१२०॥

भ्रातृपुत्राः स्वसृदुहितृभिः ॥३॥१॥१२१॥

दुहित्रर्थेन पुत्रार्थः, स्वस्रर्थेन सहोदरः ॥
सहोक्तौ शिष्यते ह्येकः स्वसा भ्राता च भ्रातरौ ॥१२१॥

पिता मात्रा वा ॥३॥१॥१२२॥

पितृशब्दः सहोक्तौ वा, मातृशब्देन शिष्यते ॥
पितरौ स्तः पिता माता–ऽमू मातापितराविमौ ॥१२२॥

श्वशुरः श्वश्र्वा वा ॥३॥१॥१२३॥

श्वशुरः शिष्यते श्वश्रू–नाम्ना वा चेत् सहोक्तता ॥
तौ श्वश्रूश्वशुरौ तस्यास्तस्येमौ श्वशुरौ मतौ ॥१२३॥

वृद्धो यूना तन्मात्रभेदे ॥३॥१॥१२४॥

वृद्धो यूना सहैकोक्तौ, वृद्धवाचि न शिष्यते ॥
यदि तन्मात्रभेदः स्या–द्गार्ग्यौ गार्ग्यश्च तत्सुतः ॥१२४॥

स्त्री पुंवच्च ॥३॥१॥१२५॥

वृद्धस्त्रीवाचिशब्दस्तु, शिष्यते युववाचिना ॥
पुंवच्च स च तन्मात्र–भेदे गार्ग्यौ सुतः सुता ॥१२५॥

पुरुषः स्त्रिया ॥३॥१॥१२६॥

स्त्रीवाचिना सहोक्तौ पुं–शब्द एकश्च शिष्यते ॥
चेत् स्यात् तन्मात्रभेदोऽत्र, नरौ पुरुषयोषितौ ॥१२६॥

ग्राम्याशिशुद्विशफसङ्घे स्त्री प्रायः ॥३॥१॥१२७॥

ग्राम्याणामशिशूना द्वि–शफाना पशुप्राणिनाम् ॥

स्पष्टे ॥१२२॥१२३॥ गर्गगार्ग्यायणौ, गार्ग्यगर्गौ, गार्ग्यवात्स्यायना-वित्यादौ वृद्धयुवतन्मात्रभेदाभावान्नैकशेप । तत्सुत –गार्ग्यायण ॥१२४॥ गार्गी च गार्ग्यायणश्च गार्ग्यौ ॥१२५॥ पुरुषाभावे तु तीर नदनदीपते । तन्मात्रभेदाभावे तु स्त्रीपुंसौ ॥१२६॥ अजाश्च स्त्रिय , अजाश्च नरा इति इमा

दधिघृतं प्रियं चेत्ते, गोमहिषं प्रपाल्यताम् ॥१३२॥

तरुतृणधान्यमृगपक्षिणां बहुत्वे ॥३॥१॥१३३॥

तर्वादीनां बहुत्वे स्वै–द्वन्द्वैकार्थौ विभाषया ॥
तिलमाषं तथा हंस–चक्रवाक पुरः स्थितम् ॥१३३॥

सेनाङ्गक्षुद्रजन्तूनाम् ॥३॥१॥१३४॥

सेनाङ्गक्षुद्रजन्तूनां, द्वन्द्वैकार्थो वहौ ध्रुवम् ॥
हस्त्यश्वरथपादात, पश्य कीटपिपीलिकम् ॥१३४॥

फलस्य जातौ ॥३॥१॥१३५॥

बहुत्वे वर्तमानाना, शब्दाना फलवाचिनाम् ॥
जातौ स्वैर्द्वन्द्व एकार्थो, बदरामलकं चिनु ॥१३५॥

अप्राणिपश्वादेः ॥३॥१॥१३६॥

भवेदप्राणिपश्वादेः, शब्दस्य जातिवाचिनः ॥
द्वन्द्व एकार्थवद्भावो, नारोह तरुपर्वतम् ॥१३६॥

प्राणितूर्याङ्गाणाम् ॥३॥१॥१३७॥

प्राणितूर्याङ्गशब्दाना, द्वन्द्वैकार्थः प्रजायते ॥
दन्तोष्ठं वाद्यता भेरी,–मृदङ्ग रङ्गमण्डपे ॥१३७॥

गोमहिषावित्यादि ॥१३२॥ पक्षे तिलमाषा इत्यादि ॥१३३॥ स्पष्टम् ॥१३४॥ जाताविति एतानि बदरामलकानि सन्ति ॥१३५॥ पश्वादेरिति–पशुव्यञ्जनानाम् ।३।१।१३२। इत्यत आरभ्य सूत्रचतुष्कोक्तशब्दानाम् ॥१३६॥ स्वैरिति शेष, तथा च पाणिगृह्यावित्यादौ न ॥१३७॥

चरणस्य स्थेणोऽद्यतन्यामनुवादे ॥३॥१॥१३८॥

अद्यतनीपरस्थेणो-र्योगेऽनुकथने भवेद् ॥
एकार्थश्चरणार्थस्य, प्रत्यष्ठात् कठकौथुमम् ॥१३८॥

अक्लीबेऽध्वर्युक्रतोः ॥३॥१॥१३९॥

अनपुंसकवृत्तीनाम-ध्वर्युक्रतुवाचिनाम् ॥
भवेत् स्वैर्द्वन्द्व एकार्थः, पौण्डरिकातिरात्रकम् ॥१३९॥

निकटपाठस्य ॥३॥१॥१४०॥

एकार्थः स्वैर्भवेद्द्वन्द्वे, समीपपाठवाचिनाम् ॥
पदकक्रमकं चैव, भवेत् क्रमकवार्तिकम् ॥१४०॥

नित्यवैरस्य ॥३॥१॥१४१॥

स्वाभाविकविरोधाना, शब्दाना द्वन्द्व एकता ॥
मार्जारमूषिक नाग-नकुल देवदानवम् ॥१४१॥

नदीदेशपुरां विलिङ्गानाम् ॥३॥१॥१४२॥

विभिन्नलिङ्गशब्दाना, नदीदेशपुरा भवेत् ॥
एकार्थो द्वन्द्व उद्धेरा-चति सौराष्ट्रमालवम् ॥१४२॥

पात्र्यशूद्रस्य ॥३॥१॥१४३॥

पात्र सम्कारमासाद्य, यभुंक्ते शुद्रता व्रजेत् ॥

तच्छूद्रवाचिनां द्वन्द्वे–कार्थः किष्किन्धगन्धकम् ॥१४३॥

गवाश्वादिः ॥३॥१॥१४४॥

एकार्थो जायते द्वन्द्वे, गवाश्वप्रभृतिः सदा ॥
कुब्जकैरातक तद्वत्. गवाश्वं कुब्जवामनम् ॥१४४॥

न दधिपयआदिः ॥३॥१॥१४५॥

दधिपयःप्रमुख्याणा–मेकार्थो नैव जायते ॥
सूर्याचन्द्रमसौ राम–लक्ष्मणौ हरिवासवौ ॥१४५॥

सङ्ख्याने ॥३॥१॥१४६॥

इयत्तायाः परिच्छेदे, शब्दानां वर्तिवाचिनाम् ॥
एकार्थो न भवेद् द्वन्द्व, दश गोमहिषाः गृहे ॥१४६॥

वान्तिके ॥३॥१॥१४७॥

सङ्ख्यानस्य तु सामीप्ये, एकार्थः स्याद्विभाषया ॥
द्वन्द्वे उपदशं दन्तो–ष्ठं तथोपदशाश्च ते ॥१४७॥

प्रथमोक्तं प्राक् ॥३॥१॥१४८॥

समासे प्रथमान्तेन, निर्दिष्ट प्राक् प्रयुज्यते ॥
यूपदारु मषीपात्रं, ससगङ्ग सुखश्रितः ॥१४८॥

राजदन्तादिषु ॥३॥१॥१४९॥

राजदन्तादिशब्देषु, शब्दाः पूर्वनिपातनम् ॥

-जनङ्गमबुक्कसा ॥१४३॥ सूत्रपञ्चकमतिरोहितार्थकम् ॥१४४॥१४५॥१४६॥
॥१४७॥१४८॥ दन्ताना राजा राजदन्त एवमन्यत्रापि, अनुप्रयोगार्हा

भजन्तेऽनुप्रयोगार्हो, राजदन्तो भवेन्महान् ॥१४९॥

विशेषणसर्वादिसंख्यं बहुव्रीहौ ॥३॥१॥१५०॥

सङ्ख्यावाचि च सर्वादि, तथा नाम विशेषणम् ॥
पतेत् पूर्वं बहुव्रीहौ, चित्रगुः स्वधनो द्विकः ॥१५०॥

क्ताः ॥३॥१॥१५१॥

सर्वं पूर्वं बहुव्रीहौ, क्तान्त नाम पतेद् ध्रुवम् ॥
भिक्षुर्भिक्षितभिक्षोऽयं, सम्यगधीतलक्षणः ॥१५१॥

जातिकालसुखादेर्नवा ॥३॥१॥१५२॥

जातिकालसुखादिभ्यो, बहुव्रीहौ क्तप्रत्ययम् ॥
पूर्वं शार्ङ्गरजग्धी वा, कुमारी जग्धशार्ङ्गरा ॥१५२॥

आहिताग्न्यादिषु ॥३॥१॥१५३॥

आहिताग्न्यादिषु क्तान्त, बहुव्रीहिषु वा पतेत् ॥
पूर्वं स जात दन्तोऽय,दन्तजातश्च गार्पिकः ॥१५३॥

प्रहरणात् ॥३॥१॥१५४॥

प्रहरणार्थशब्देभ्यो बहुव्रीहौ क्तप्रत्ययम् ॥
पूर्वं वा शूनधन्वाऽसौ, रणे शूने धनुर्धुनः ॥१५४॥

न सप्तमीन्द्वादिभ्यश्च ॥३॥१॥१५५॥

सप्तम्यन्तं बहुव्रीहा-विन्द्वादेश्चाम्बरावाचिनः ॥
पूर्वं न स्याद् धनुष्पाणि-चक्रपाणीन्दुशेखरः ॥१५५॥

[illegible] ॥१४९॥ [illegible] ॥१५०॥१५१॥१५२॥१५३॥ ॥१५०॥१००।

गड्वादिभ्यः ॥३॥१॥१५६॥

सप्तम्यन्तं बहुव्रीहौ, गड्वादिभ्यो विभाषया ॥
पूर्वं पतति गुर्वन्त-श्चान्तेगुरुर्वहेगडुः ॥१५६॥

प्रियः ॥३॥१॥१५७॥

प्रियशब्दो बहुव्रीहौ, पतेत् पूर्वं विभाषया ॥
श्रेयःप्रियः प्रियश्रेयाः, प्रियचत्वाश्चतुष्प्रियः ॥१५७॥

कडारादयः कर्मधारये ॥३॥१॥१५८॥

वा कडारादयः शब्दाः पूर्वं स्युः कर्मधारये ॥
यो जैमिनिकडारः स्यात्, स स्यात्कडारजैमिनिः ॥१५८॥

धर्मार्थादिषु द्वन्द्वे ॥३॥१॥१५९॥

धर्मार्थादिषु पूर्वं वा, द्वन्द्वे यत् मासपूर्वकम् ॥
धर्मार्थावर्थधर्मौ वा, चन्द्रार्कावर्कचन्द्रकौ ॥१५९॥

लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वरार्च्यमेकम् ॥३॥१॥१६०॥

लघ्वक्षरं सखिं त्यक्त्वे-दुदन्त च स्वराल्पकम् ॥
स्वराद्यदन्तमर्च्यं च, द्वन्द्व पूर्वं वधूवरौ ॥१६०॥

पक्षे गडुवह ॥१५६॥ व्यक्त सूत्रत्रयम् ॥१५७॥१५८॥१५९॥

शरशीर्षम्, अग्नीषोमौ, वायुतोयम्, अश्वशस्त्रम्, प्लक्षन्यग्रोधौ, श्रद्धामेधे इत्युदाहरणतया, सुतसखायौ, कुक्कुटमयूरौ-मयूरकुक्कुटौ, शङ्खदुन्दुभिवीणा, विस्पष्टपटुरिति प्रत्युदाहरणत्वेनावसेयम् ॥१६०॥

मासवर्णभ्रात्रनुपूर्वम् ॥३॥१॥१६१॥

मासनाचि तथावर्ण–र्वाचि च भ्रातृवाचिकम् ॥
द्वन्द्वे पूर्वं यथापूर्वं, ज्येष्ठाषाढौ बलाच्युतो ॥१६१॥

भर्तुतुल्यस्वरम् ॥३॥१॥१६२॥

तुल्यस्वर यथापूर्वं, भनाचि ऋतुवाचिकम् ॥
द्वन्द्वे पूर्वं भवेच्चित्रा–स्वाती च ग्रीष्मप्रावृषौ ॥१६२॥

संख्या समासे ॥३॥१॥१६३॥

पूर्वं समासमात्रे स्यात्, सङ्ख्यावाचि यथाक्रमम् ॥
पञ्चषाः द्विशती द्वित्राः, त्रयोदश चतुर्दश ॥१६३॥

॥ इति प्रथमः पादः ॥

गड्वादिभ्यः ॥३॥१॥१५६॥

सप्तम्यन्तं बहुव्रीहौ, गड्वादिभ्यो विभाषया ॥
पूर्वं पतति गुर्वन्त-श्चान्तेगुरुर्वहेगडुः ॥१५६॥

प्रियः ॥३॥१॥१५७॥

प्रियशब्दो बहुव्रीहौ, पतेत् पूर्वं विभाषया ॥
श्रेयःप्रियः प्रियश्रेयाः, प्रियचत्वाश्चतुष्प्रियः ॥१५७॥

कडारादयः कर्मधारये ॥३॥१॥१५८॥

वा कडारादयः शब्दाः पूर्वं स्युः कर्मधारये ॥
यो जैमिनिकडारः स्यात्, स स्यात्कडारजैमिनिः ॥१५८

धर्मार्थादिषु द्वन्द्वे ॥३॥१॥१५९॥

धर्मार्थादिषु पूर्वं वा, द्वन्द्वे यत् प्राप्तपूर्वकम् ॥
धर्मार्थावर्थधर्मौ वा, चन्द्रार्कावर्कचन्द्रकौ ॥१५९॥

लघ्वक्षरासखीदुत्स्वराद्यदल्पस्वराच्र्यमेकम् ॥३॥१॥१६०॥

लघ्वक्षरं सखिं त्यक्त्वे-दुदन्त च स्वराल्पकम् ॥
स्वराद्यदन्तमर्च्यं च, द्वन्द्व पूर्वं वधूवरौ ॥१६०॥

पक्षे गडुवह ॥१५६॥ व्यक्त सूत्रत्रयम् ॥१५७॥१५८॥१५९॥
शरशीर्षम्, अग्नीषोमौ, वायुतायम्, अश्वशस्त्रम्, प्लक्षन्यग्रोधौ, श्रद्धामेधे इत्युदाहरणतया, सुतसखायौ, कुक्कुटमयूरौ–मयूरकुक्कुटौ, शङ्खदुन्दुभिवीणा, विस्पष्टपटुरिति प्रत्युदाहरणत्वेनावसेयम् ॥१६०॥

मासवर्णभ्रात्रनुपूर्वम् ॥३॥१॥१६१॥

मासवाचि तथावर्ण-वाचि च भ्रातृवाचिकम् ॥
द्वन्द्वे पूर्वं यथापूर्वं, ज्येष्ठाषाढौ बलाच्युतौ ॥१६१॥

भर्तुतुल्यस्वरम् ॥३॥१॥१६२॥

तुल्यस्वरं यथापूर्वं, भर्त्वाचि ऋतुवाचिकम् ॥
द्वन्द्वे पूर्वं भवेच्चित्रा-स्वाती च ग्रीष्मप्रावृषौ ॥१६२॥

संख्या समासे ॥३॥१॥१६३॥

पूर्वं समासमात्रे स्यात्, सङ्ख्यावाचि यथाक्रमम् ॥
पञ्चषाः द्विशती द्वित्राः, त्रयोदश चतुर्दश ॥१६३॥

॥ इति प्रथमः पादः ॥

परस्परान्योऽन्येतरेतरस्याम् स्यादेर्वाऽपुंसि ॥३॥२॥२॥

स्यादेः परस्परादीना-माम् स्यात् क्लीबे स्त्रिया नवा ॥
भोजयतः कुले सख्यौ, परस्परां परस्परम् ॥१॥

अमव्ययीभावस्यातोऽपञ्चम्याः ॥३॥२॥२॥

स्याददन्ताव्ययीभाव-समासयोगिनो ध्रुवम् ॥
स्यादेरम् पञ्चमीभिन्न-स्योपकुम्भं विलोकय ॥२॥

वा तृतीयायाः ॥३॥२॥३॥

स्याददन्ताव्ययीभाव-तृतीयाया नवाऽम् भवेत् ॥
उपकुम्भेन किन्ते स्या-दुपकुम्भ प्रयोजनम् ॥३॥

सप्तम्या वा ॥३॥२॥४॥

स्याददन्ताव्ययीभाव-सप्तम्या अम् विभाषया ॥
उपकुम्भे निधेहीदम्, उपकुम्भमिदं नय ॥४॥

ऋद्धनदी वंश्यस्य ॥३॥२॥५॥

अदन्तर्द्धनदीवंश्या-न्ताव्ययीभावतः परम् ॥
सप्तम्याः स्यादमुन्मत्त-गङ्गं सुमगध वस ॥५॥

अनतो लुप् ॥३॥२॥६॥

अनदन्ताव्ययीभाव-स्यादेर्लुब् जायते ध्रुवम् ॥
सामर्थ्यमपकर्तुं स्या-दधस्त्रि साहसादिकम् ॥६॥

एवम् अन्याऽन्यामन्योऽन्यमित्यादि । पुंसि तु इमे नरा. परस्पर भोजयन्तीत्यव ॥ ॥ अत इति अधिस्त्रि । पञ्चम्या तु उपकुम्भादिति ॥२॥ प्रियोपकुम्भेन त्य दादव्ययीभावाभावादमाभाव ॥३॥ स्पष्टम् ॥४॥ एकविंशतिभारद्वाजमिति वस्यादाहरणम् ॥५॥ स्पष्टम् ॥६॥

अव्ययस्य ॥३॥२॥७॥

स्याल्लुब् अव्ययसम्बन्धि-स्यादेः शब्दानुशासने ॥
प्रातरुच्चैः पठन्नैव, ध्यात्वाऽर्हं मङ्गलं स्मर ॥७॥

ऐकार्थ्ये ॥३॥२॥८॥

ऐक्यपद्यनिमित्तस्य, स्यादेर्लुब् वै विधीयते ॥
राजराजोऽप्यसद्भाग्या-दपुत्रः पुत्रकाम्यति ॥८॥

न नाम्येकस्वरात् खित्युत्तरपदेऽमः ॥३॥२॥९॥

नाम्यन्तैकस्वरात् पूर्व-पदादमो न लुब् भवेत् ॥
खित्युत्तरपदे मित्रं, श्रियमन्यं न मार्गय ॥९॥

असत्त्वे ङसेः ॥३॥२॥१०॥

असत्त्वे यो ङसिस्तस्य, लुब् भवेन्नोत्तरे पदे ॥
अभ्याशादागतोऽरीणा, स्तोकान्मुक्तो नु मोदते ॥१०॥

ब्राह्मणाच्छंसी ॥३॥२॥११॥

लुब् न स्याद् ब्राह्मणाच्छंसीत्यत्र ङसेर्निपातनात् ॥
आदाय ब्राह्मणाच्छंसी, ब्राह्मणाद् य. प्रशंसति ॥११॥

ओजोऽञ्जः सहोऽम्भस्तमस्तपसष्टः ॥३॥२॥१२॥

एभ्यः पर तृतीयैक-वचनस्योत्तरे पदे ॥
लुब् न स्यात्तपसा[illegible]त, बलं किञ्चिद्विलक्षणम् ॥१२॥

[illegible] न [illegible]दवानाद् ॥७॥ [illegible]नय [illegible]म् ॥८॥९॥
॥१०॥ [illegible] तदभावे तु लुब् यथा ब्राह्मणशंसिनी स्त्री
॥११॥ [illegible] वाप्यम् ॥१२॥

पुंजनुषोऽनुजान्धे ॥३॥२॥१३॥

आभ्यां परं क्रमाट्टाया, अनुजान्धोत्तरे पदे ॥
लुब् न पुंसानुजोऽपि स्याज्जनुषान्धः स्वकर्मणा ॥१३॥

आत्मनः पूरणे ॥३॥२॥१४॥

नात्मनस्तु परं टायाः, पूरणान्तोत्तरे पदे ॥
लुब् आत्मनाद्वितीयोऽय, पाण्डवानां वृकोदरः ॥१५॥

मनसश्चाज्ञायिनि ॥३॥२॥१५॥

मनःशब्दात्मशब्दाभ्या-माज्ञायिन्युत्तरे पदे ॥
टाया लुब् नात्मनाज्ञायि-मनसाज्ञायिनो बुधाः ॥१५॥

नाम्नि ॥३॥२॥१६॥

संज्ञायां मनसष्टाया, लुब् न स्यादुत्तरे पदे ॥
मनसासङ्गता काचि-द्देवी दिवि विराजते ॥१६॥

परमात्मभ्यां ङेः ॥३॥२॥१७॥

परशब्दात्मशब्दाभ्यां, ङेर्न लुब् नाम्नि संभवेत् ॥
परस्मैपदमिच्छद्भि,-रात्मनेपदमीक्ष्यते ॥१७॥

अद्व्यञ्जनात् सप्तम्या बहुलम् ॥३॥२॥१८॥

अदन्ताद् व्यञ्जनान्ताच्च, सप्तम्या बहुलं न लुप् ॥
अरण्येतिलका नाम्नि, त्वचिसारो युधिष्ठिरः ॥१८॥

स्पष्टम् ॥१३॥ वृकोदर–भीम ॥१४॥ स्पष्टम् ॥१५॥ नामाभावे तु मनोदत्ता इत्यादौ लुबेव ॥१६॥ स्पष्टम् ॥१७॥ अद्व्यञ्जनादिति भूमिपाशः शम्नीति तीर्थंकाक ॥१८॥

प्राकारस्य व्यञ्जने ॥३॥२॥१९॥

प्राचां कारस्य संज्ञायां, व्यञ्जनाद्युत्तरे पदे ॥
अद्व्यञ्जनान्न सप्तम्या, लुप् स्याद् दृषदिमाषकः ॥१९॥

तत्पुरुषे कृति ॥३॥२॥२०॥

अद्व्यञ्जनान्न सप्तम्या, लुप् कृदन्ते पदोत्तरे ॥
तत्पुरुषे खलः कर्णे-जपः स्तम्बेरमो गजः ॥२०॥

मध्यान्ताद् गुरौ ॥३॥२॥२१॥

मध्यान्तशब्दतो लुप् न, स्यात् सप्तम्या गुरौ पदे ॥
जगणो जायते मध्ये-गुरुरन्तेगुरुश्च सः ॥२१॥

अमूर्धमस्तकात् स्वाङ्गादकामे ॥३॥२॥२२॥

अमूर्धमस्तकान् स्वाङ्गा-ददन्तव्यञ्जनान्ततः ॥
कामभिन्ने परे नो लुप्, राजते उदरेमणी ॥२२॥

बन्धे घञि नवा ॥३॥२॥२३॥

अद्व्यञ्जनान्तु सप्तम्या, स्याद् बन्धे घञि लुप् नवा ॥
हस्तेबन्धा इमे चौग-श्चक्रेबन्धाः शिरोरुहाः ॥२३॥

पुंजनुषोऽनुजान्धे ॥३॥२॥१३॥

आभ्या परं क्रमाट्टाया, अनुजान्धोत्तरे पदे ॥
लुप् न पुंसानुजोऽपि स्याज्जनुपान्धः स्वकर्मणा ॥१३॥

आत्मनः पूरणे ॥३॥२॥१४॥

नात्मनस्तु परं टायाः, पूरणान्तोत्तरे पदे ॥
लुप् आत्मनाद्वितीयोऽय, पाण्डवाना वृकोदरः ॥१५॥

मनसश्चाज्ञायिनि ॥३॥२॥१५॥

मनःशब्दात्मशब्दाभ्या–माज्ञायिन्युत्तरे पदे ॥
टाया लुप् नात्मनाज्ञायि–मनसाज्ञायिनो बुधाः ॥१५॥

नाम्नि ॥३॥२॥१६॥

संज्ञायां मनसष्टाया, लुप् न स्यादुत्तरे पदे ॥
मनसासज्ञना काचि–द्देवी दिवि विराजते ॥१६॥

परमात्मभ्यां ङेः ॥३॥२॥१७॥

परशब्दात्मशब्दाभ्यां, ङेर्न लुप् नाम्नि संभवेत् ॥
परस्मैपदमिच्छद्भि,–रात्मनेपदमीक्ष्यते ॥१७॥

अद्व्यञ्जनात् सप्तम्या बहुलम् ॥३॥२॥१८॥

अदन्ताद् व्यञ्जनान्ताच्च, सप्तम्या बहुलं न लुप् ॥
अरण्येतिलका नाम्नि, त्वचिसारो युधिष्ठिरः ॥१८॥

स्पष्टम् ॥१३॥ वृकोदर–भीम ॥१४॥ स्पष्टम् ॥१५॥ नामाभावे तु मनोदत्ता इत्यादौ लुपेव ॥१६॥ स्पष्टम् ॥१७॥ अद्व्यञ्जनादिति भूमिपाश' बोम्नीति तीर्थकाक ॥१८॥

प्राकारस्य व्यञ्जने ॥३॥२॥१९॥

प्राचां कारस्य संज्ञायां, व्यञ्जनाद्युत्तरे पदे ॥
अद्व्यञ्जनान्न सप्तम्या, लुप् स्याद् दृषदिमाषकः ॥१९॥

तत्पुरुषे कृति ॥३॥२॥२०॥

अद्व्यञ्जनान्न सप्तम्या, लुप् कृदन्ते पदोत्तरे ॥
तत्पुरुषे खलः कर्णे-जपः स्तम्बेरमो गजः ॥२०॥

मध्यान्ताद् गुरौ ॥३॥२॥२१॥

मध्यान्तशब्दतो लुप् न, स्यात् सप्तम्या गुरौ पदे ॥
जगणो जायते मध्ये-गुरुरन्तेगुरुश्च सः ॥२१॥

अमूर्धमस्तकात् स्वाङ्गादकामे ॥३॥२॥२२॥

अमूर्धमस्तकात् स्वाङ्गा-ददन्तव्यञ्जनान्ततः ॥
कामभिन्ने परे नो लुब्, राजते उदरेमणी ॥२२॥

बन्धे घञि नवा ॥३॥२॥२३॥

अद्व्यञ्जनान्नु सप्तम्या, स्याद् बन्धे घञि लुब् नवा ॥
हस्तेबन्धा इमे चौग-श्चक्रेबन्धाः शिरोरुहाः ॥२३॥

राजलक्ष्म्यां रक्षानिर्वेश कार । प्रागिति किम् ? यूथपशु नाय प्राचामपि नृदीचाम् ॥१९॥ स्पष्टम् ॥२०॥ स.-सगण, 'मस्त्रिगुरुस्त्रिलघुश्च नकारो, भादिगुरु पुनरादिलघुर्न । जो गुरुमध्यगतो रलमध्य, सोऽन्तगुरुः कथितोऽन्तलगुल. ' ॥२१॥ इति श्लोकोऽनुसंधेयो गणज्ञानार्थम् ॥२१॥ मूर्द्धशिखः, [illegible], [illegible] इत्यादि प्रत्युदाहरणतया बोध्यम् ॥२२॥ विकल्पपक्षे हस्तबन्धश्चक्रबन्ध इत्यादि ॥२३॥

कालात्तनतरतमकाले ॥३।२।२४॥

कालार्थाद्व्यञ्जनान्तान्नु, काले तने तरे तमे ॥
सप्तम्या लुब् न पूर्वाह्णे-तने काले सदाचरेत् ॥२४॥

शयवासिवासेष्वकालात् ॥३।२।२५॥

स्याच्छयवासिवासेषु, कालान्याद्व्यञ्जनान्ततः ॥
सप्तम्या लुब् नवा कष्टं, ग्रामेवासी बिलेशयः ॥२५॥

वर्षक्षरशराप्सरःशरोरोमनसो जे ॥३।२।२६॥

वर्षादिभ्यो नवा लुप् स्यात्, सप्तम्या जे परोत्तरे
अप्सुजम-जमादित्यो-दये शतदलं भवेत् ॥२६॥

द्युप्रावृड्वर्षाशरत्कालात् ॥३।२।२७॥

लुब् न दिवप्रभृतिभ्यो जे, सप्तम्या उत्तरे पदे ॥
दुग्ध शरदिज हन्ति, ज्वरं प्रावृषिज कटुः ॥२७॥

अपो ययोनिमतिचरे ॥३।२।२८॥

अपो लुप् नैव सप्तम्याः, स्याद् ये योनौ मतौ चरे ॥
अप्सुचरा मता मत्स्या, अप्सुयोनिः क्षमापतिः ॥२८॥

नेन् सिद्धस्थे ॥३॥२॥२९॥

इनि सिद्धे स्थशब्दे च, सप्तम्या न भवेदलुप् ॥
हृम्र्यवर्ती समस्थश्चेत्, कर्मसिद्धः सदा भवेत् ॥२९॥

षष्ठ्याः क्षेपे ॥३॥२॥३०॥

क्षेपे गम्ये न षष्ठ्या लुप्, स्यादुत्तरपदे परे ॥
इयं दासस्यभार्याऽयं, वृषल्याःपतिरुद्धतः ॥३०॥

पुत्रे वा ॥३॥२॥३१॥

क्षेपे गम्ये न वा लुप् स्यात्, षष्ठ्याः पुत्रे पदे परे ॥
दास्याः पुत्रो भवे दासी–पुत्रो दासः सदातनः ॥३१॥

पश्यद्वाग्दिशो हरयुक्तिदण्डे ॥३॥२॥३२॥

लुब् हरयुक्तिदण्डेषु, न पश्यद्वाग्दिशां परम् ॥
षष्ठ्या भवेद् दिशोदण्डः, कालादः पश्यतोहरः ॥३२॥

अदसोऽकञायनणोः ॥३॥२॥३३॥

अदसो लुब् न षष्ठ्याः स्या–दकञायनणोः सतोः ॥
स आमुष्यायणश्चारु–र्भवेदामुष्यपुत्रिका ॥३३॥

देवानांप्रियः ॥३॥२॥३४॥

देवानामिय इत्यत्र, षष्ठ्या न लुप् निपात्यते ॥
स देवानांप्रियो मूर्खो, बोधितोऽपि न बुध्यते ॥३४॥

स्पष्टम् ॥२९॥ क्षेपाभावे तु ब्राह्मणकुलमित्यादि । इद चौरकुलकम्, इय दासभार्या अत्र इत्रीपति इत्येव यथावत्कथनप्रसङ्गे क्षेपाभावोऽवसेय इति ॥३०॥ विकल्पार्थं पृथग् वचनम् ॥३१॥ एव वाचोयुक्ति.॥३२॥ स्पष्टे॥३३॥३४॥

शेपपुच्छलाङ्गूलेषु नाम्नि शुन ॥३॥२॥३५॥

श्वनूशब्दात् परं षष्ठ्याः, शेपादौ नाम्नि नैव लुप् ॥
शुनःपुच्छश्शुनश्शेप-श्शुनो-लाङ्गूलकः क्वचित्॥३५॥

वाचस्पतिवास्तोष्पतिदिवस्पतिदिवोदासम् ॥३॥२॥३६॥

निपात्यते न लुप् षष्ठ्या, वाचस्पत्यादिनामसु ॥
वाचस्पतिर्दिवोदासो, वास्तोष्पतिर्दिवस्पतिः ॥३६॥

ऋतां विद्यायोनिसम्बन्धे ॥३॥२॥३७॥

स्याद्विद्यायोनिसम्बन्धे, षष्ठ्या लुप् नो ऋता परे ॥
पितुःपुत्रेण वै होतु-रन्तेवासी समादृतः ॥३७॥

स्वसृपत्योर्वा ॥३॥२॥३८॥

लुप् विद्यायोनिसम्बन्धे, स्वसृपत्योर्ऋता नवा ॥
षष्ठ्या होतुःस्वसा धन्या, स्वसृपतिः स्वसुःपतिः॥३८॥

आ द्वन्द्वे ॥३॥२॥३९॥

भवेदादन्त आदेशः, ऋता द्वन्द्वे तु पूर्ववत् ॥
मातादुहितरौ होता-पोतारौ स्वसृपातरौ ॥३९॥

पुत्रे ॥३॥२॥४०॥

पुत्रोत्तरपदे द्वन्द्वे, आदन्तः पूर्ववद्भवेत् ॥
मातापुत्रौ पितापुत्रौ होतापुत्रौ पदे पदे ॥४०॥

वेदसहश्रुतावायुदेवतानाम् ॥३॥२॥४१॥

वेदे सहश्रुतानां स्या-द्वायुभिन्नसुपर्वणाम् ॥
द्वन्द्व आदन्त आदेशः सूर्याचन्द्रमसौ ध्रुवौ ॥४१॥

ईः पोमवरुणोऽग्नेः ॥३॥२॥४२॥

ईर्भवेदग्निशब्दस्य, पोमे च वरुणे परे ॥
प्राग्वद् द्वन्द्व इमावग्नीषोमौ वह्निनिशाकरौ ॥४२॥

इर्वृद्धिमत्यविष्णौ ॥३॥२॥४३॥

द्वन्द्वेऽविष्णाविदन्तोऽग्ने-र्वृद्धिमत्युत्तरे पदे ॥
आग्निसौम चरेत्कर्माऽऽ-लभेत चाग्निवारुणीम् ॥४३॥

दिवो द्यावा ॥३॥२॥४४॥

द्यावा स्याद् देवताद्वन्द्वे, दिवः पूर्वपदस्य वै ॥
स्वर्लोक मर्त्यलोकञ्च, द्यावाभूमी प्रचक्षते ॥४४॥

दिवसूदिवः पृथिव्यां वा ॥३॥२॥४५॥

दिव्-शब्दस्य पृथिव्या स्याद्, विकल्पेन दिवसूदिवः ॥
धर्म्ये दिवःपृथिव्यौ द्या-वा पृथिव्यौ सतां स्थितौ ॥४५॥

उषासोषसः ॥३॥२॥४६॥

उषासा देवताद्वन्द्व, उषसः पूर्वसंस्थितेः ॥
उषासासूर्यमालोक्य, लोकं लोकोऽभिनन्दति ॥४६॥

वायुरर्जनात् अग्निवायू, वाय्वग्नी इति ॥४१॥ स्पष्टम् ॥४२॥ विष्णुवर्जनात्, आग्नावैष्णवमिति ॥४३॥ एव द्यावानक्ते इत्यादि नक्तशब्दोऽकारान्तोऽनव्ययम् ॥४४॥ दिवस्पृथिव्यावित्यपि ॥४५॥ स्पष्टम् ॥४६॥

मातरपितरं वा ॥३॥२॥४७॥

मातरपितरं वा स्या–न्मातृपित्रोर्निपातनात् ॥
मातरपितरौ वन्द्यौ, स्तो मातापितरौ सताम् ॥४७॥

वर्चस्कादिष्ववस्करादय. ॥३॥२॥४८॥

वर्चस्काद्यर्थवन्तः स्युः, साधवोऽवस्करादयः ॥
अवस्करश्च वर्चस्के, रथाङ्गे स्यादपस्कर ॥४८॥

परतः स्त्री पुंवत् स्त्र्येकार्थेऽनूङ् ॥३॥२॥४९॥

परतः स्त्री नचोङन्तः, स्त्र्येकार्थे स्यात्तु पुंसमः ॥
एतभार्यस्तथा श्येन–भार्यः कल्याणपञ्चमी ॥४९॥

क्यङ्मानिपित्तद्धिते ॥३॥२॥५०॥

परतः स्त्री भवेत् पुंवत्, क्यङि मानिनि तद्धिते ॥
पिति चानूङ् इय श्येना–यते पटुचरी नरी ॥५०॥

जातिश्च णितद्धितयस्वरे ॥३॥२॥५१॥

परतः स्त्री तथा जातिः, स्याण्णितद्धितयस्वरे ॥
अनूङ् पुंवत्तु भावत्कः, पापिष्ठा च पटीयसी ॥५१॥

एयेऽग्नायी ॥३॥२॥५२॥

अग्नाय्येन भवेत पुंवत. तद्धित एय प्रत्यये ॥

अग्नायी देवता यस्य, आग्नेयो रोहिणीयकः ॥५२॥

नाप्रियादौ ॥३॥२॥५३॥

पूरण्यप्रत्ययान्ते स्त्री-कार्थे स्त्रीपरतो यदि ॥
प्रियादौ न भवेत् पुंवत्, कल्याणीपञ्चमा निशा ॥५३॥

तद्धिताकोपान्त्य पूरणाख्याः ॥३॥२॥५४॥

न तद्धिताककोपान्त्याः, संज्ञाश्च पूरणान्तकाः ॥
परतः स्युः स्त्रियः पुंवत्, वृजिकामानिनी यथा ॥५४॥

तद्धितः स्वरवृद्धिहेतुररक्तविकारे ॥३॥२॥५५॥

स्यात् स्वरवृद्धिहेतुर्योऽरक्तविकारतद्धितः ॥
तदन्तस्त्री न पुंवत् स्यात्, वैदर्भीमानिनी स्वयम् ॥५५॥

स्वाङ्गान् ङीर्जातिश्चामानिनी ॥३॥२॥५६॥

स्वाङ्गाद् ङ्यन्तस्तथा जाति-र्नाची शूद्राऽप्यमानिनी ॥
परतः स्त्री न पुंवत् स्या-दियं चन्द्रमुखीयते ॥५६॥

पुंवत् कर्मधारये ॥३॥२॥५७॥

परतः स्त्री भवेत् पुंव-दुत्तरे कर्मधारये ॥
कर्मकार्थिका महामान्या, वृन्दारिकाऽभवत् ॥५७॥

रिति ॥३॥२॥५८॥

परतः स्त्री भवेत् पुंवत्, अनूङ् चेद् रितिप्रत्यये ॥
इयं मद्रकदेशीयो, पटुजातीयमानिनी ॥५८॥

त्वते गुणः ॥३॥२॥५९॥

गुणवाची स्त्र्यनूङ्शब्दः, परतस्त्वतयोः पुमान् ॥
अस्याः पटुत्वमालोक्य, पटुतां का न वाञ्छति ॥५९॥

च्वौ क्वचित् ॥३॥२॥६०॥

च्वावनूङ् स्त्री भवेत् पुंवत्, क्वचिल्लक्ष्यानुरोधतः ॥
महद्भूता बृहद्भूता, कन्येयं महतीभूता ॥६०॥

सर्वादयोऽस्यादौ ॥३॥२॥६१॥

सर्वादिः स्त्री भवेत् पुंवत्, परतः स्यादिवर्जिते ॥
एकक्षीर भवत्पुत्र, पोषिष्यति सदात्मजे ॥६१॥

मृगक्षीरादिषु वा ॥३॥२॥६२॥

एषु समासशब्देषु, स्त्र्यर्थभिन्नोत्तरे पदे ॥
वा स्त्री पुंवदनेकार्थे, मृगक्षीरादयो मताः ॥६२॥

ऋदुदित्तरतमरूपकल्पब्रुवचेलड्गोत्रमतहते वा-
ह्रस्वश्च ॥३॥२॥६३॥

ऋदिदुदिन्ह्रस्वान्तः, पुनश्च वा तरादिषु ॥

स्त्रियाम् ॥३॥२॥६९॥

स्त्रीवर्तिनो महन्नाम्नो, नित्यं डान्तः करादिषु ॥
चेन्महत्या विशिष्टः स्या-न्महाविशिष्ट उच्यते ॥६९॥

जातीयैकार्थेऽच्वेः ॥३॥२॥७०॥

जातीये च तथैकार्थे महतोऽच्व्यन्तवर्तिनः ॥
डान्तादेशो महाकीर्ति-र्महाजातीय उच्यते ॥७०॥

न पुंवन्निषेधे ॥३॥२॥७१॥

पुंवत्त्वस्य निषेधश्चेद्, महत उत्तरे पदे ॥
डान्तादेशो भवेन्नैव, भाग्यवान् महतीप्रियः ॥७१॥

इच्यस्वरे दीर्घ आच्च ॥३॥२॥७२॥

पूर्वस्य दीर्घ आकार-श्चान्त इच्प्रत्ययेऽस्वरे ।
मुष्टामुष्टि तथा मुष्टी-मुष्टी नैव महात्मनाम् ॥७२॥

हविष्यष्टन कपाले ॥३॥२॥७३॥

हविष्यर्थेऽष्टनो दीर्घो-ऽन्तः कपाले परे भवेत् ॥
हविरष्टाकपाल तत्, कपालाष्टसु सम्कृतम् ॥७३॥

गवि युक्ते ॥३॥२॥७४॥

युक्तेऽर्थे गवि दीर्घोऽन्ता-देशोऽष्टनो विधीयते ॥
अष्टौ गावो युता यत्र, लोकस्त्वाष्टागवं त्वयम् ॥७४॥

नाम्नि ॥३॥२॥७५॥

नाम्नि दीर्घोऽन्त आदेशो-ऽष्टनः स्यादुत्तरे पदे ॥
स्वर्णमष्टापद चाष्टा-पदः कलासपर्वतः ॥७५॥

कोटरमिश्रकसिध्रकपुरगसारिकस्य वणे ॥३॥२॥७६॥

कोटरमिश्रकादीना, कृतणत्ववने पदे ॥
परे दीर्घोऽन्त आदेशः, स्युः कोटरावणादयः ॥७६॥

अञ्जनादीनां गिरौ ॥३॥२॥७७॥

स्याद् दीर्घोऽन्तोऽञ्जनादीना, गिरिशब्दे पदोत्तरे ॥
किंशुलकागिरिः साल्वा-गिरिः स्यादञ्जनागिरिः ॥७७॥

अनजिरादिबहुस्वरशरादीनां मतौ ॥३॥२॥७८॥

अजिरादीतरानेक-स्वराणा प्रत्यये मतौ ॥
शरादीनाञ्च दीर्घत्व, शरावत्यमरावती ॥७८॥

ऋषौ विश्वस्य मित्रे ॥३॥२॥७९॥

विश्वशब्दस्य सज्ञाया, मित्रोत्तरपदे ऋषौ ॥
दीर्घोऽन्तः सभवेद्विश्वा मित्रो राजऋषिः श्रुतः ॥७९॥

नरे ॥३॥२॥८०॥

विश्वशब्दस्य दीर्घत्वं, नाम्नि नरे पदे भवेत् ॥
विश्वानराऽभवत् कश्चित्, तज्जो वैश्वानरोऽनलः ॥८०॥

नाम्नीति अष्टाष्ट ॥७५॥ स्पष्ट सूत्रपट्कम् ॥७६॥७७॥७८॥
॥७९॥८०॥८१॥

वसुराटोः ॥३॥२॥८१॥

परयोर्वसुराटोः स्या-द्विश्वशब्दस्य दीर्घता ॥
विश्वावसुस्तथा विश्वा--राट् सर्वत्र विराजते ॥८१॥

वलच्यपित्रादेः ॥३॥२॥८२॥

पित्राद्यन्यस्वरान्ताना, दीर्घोऽन्तो वलचि क्रमम् ॥
स्यादासुतीवलो दन्ता-वलः पुत्रावलस्तथा ॥८२॥

चितेः कचि ॥३॥२॥८३॥

चितिशब्दस्य दीर्घोऽन्तो, जायते कचि प्रत्यये ॥
चितिश्चिता भवेदेका, सैकचितीक उच्यते ॥८३॥

स्वामिचिह्नस्याविष्टाष्टपञ्चभिन्नछिन्नच्छिद्रस्रुव-स्वस्तिकस्य कर्णे ॥३॥२॥८४॥

स्वामिचिह्नस्य विष्टादि-वर्जितस्योत्तरे पदे ॥
कर्णे दीर्घोऽन्त आदेशो, दात्राकर्णः पशुर्भवेत् ॥८४॥

गतिकारकस्य नहिवृतिवृषिव्यधिरुचिसहितनौ क्वौ ॥३॥२॥८५॥

नह्यादिषु क्विबन्तेषु, गतेः कारकनाम्निः ॥
दीर्घोऽन्त स्यादुपानच्च, नीवृत् प्रावृट् जलासहः ॥८५

घञ्युपसर्गस्य बहुलम् ॥३॥२॥८६॥

उपसर्गस्य दीर्घोऽन्तो, घञन्तो बहुलं भवेत् ॥
झटित्येव प्रतीकारो-ऽतिसारस्य विधीयताम् ॥८६॥

नामिनः काशे ॥३॥२॥८७॥

नाम्यन्तस्योपसर्गस्य, काशे परे नु दीर्घता ॥
अनूकाशप्रतीकाश-नीकाशप्रमुखा मताः ॥८७॥

दस्ति ॥३॥२॥८८॥

स्यात्ताद्यादेशदाधाता-वुपसर्गस्य नामिनः ॥
दीर्घोऽन्तो नीत्तावीत्ते च, परीत्तवान् प्रणीत्त्रिमम् ॥८८॥

अपील्वादेर्वहे ॥३॥२॥८९॥

पील्वादिभिन्ननाम्यन्त-शब्दस्यापि वहे परे ॥
भवेद्दीर्घोऽन्त आदेशः, कपीवह मुनीवहम् ॥८९॥

शुनः ॥३॥२॥९०॥

शुनो दीर्घोऽन्त आदेशो, बहुलं स्यात्पदे परे ॥
श्वादन्तः श्वावराहश्च, श्वापद श्वमुखं तथा ॥९०॥

एकादश षोडश षोडन् षोढा षड्ढा ॥३॥२॥९१॥

एकादशादयः पञ्च, निपात्यन्ते दशादिषु ॥
षोडन् षोडश षोढा च, षड्ढैकादश सर्वदा ॥९१॥

बाहुल्यात् क्वचिद्वा किंचिन्न यथा प्रतीवेशः, प्रतिवेशः, विपाद, निषाद इत्यादि ॥८६॥ नामिन इति प्रकाश ॥८७॥ द इति-वितीर्णम्, नीति उदत्तम् ॥८८॥ पील्वादिवर्जनात् पीलुवहम्, दारुवहमित्यादि ॥८९॥ शुनामित्यादि बाहुल्यात् ॥९०॥ स्पष्टम् ॥९१॥

द्वित्र्यष्टानां द्वात्रयोष्टाः प्राक् शतादनशीति-
बहुव्रीहौ ॥३॥२॥९२॥

द्वित्र्यष्टाना च सङ्ख्याया, द्वात्रयोऽष्टा नु प्राक् शतात् ॥
त्यक्त्वाऽशीतिबहुव्रीही, द्वाविंशतिः त्रयोदश ॥९२॥

चत्वारिंशदादौ वा ॥३॥२॥९३॥

स्युश्चत्वारिंशदादौ वा, द्वात्रयोऽष्टा नु पूर्ववत् ॥
अष्टषष्टिस्त्रिषष्टिश्च, द्वासप्ततिर्द्विसप्ततिः ॥९३॥

हृदयस्य हृल्लासलेखाण्ये ॥३॥२॥९४॥

हृदयस्य हृदादेशो, ये चाणि लासलेखयोः ॥
हृल्लासो हृद्यसौहार्दे, हृल्लेख्यः प्रियदर्शने ॥९४॥

पद्. पादस्याज्यातिगोपहते ॥३॥२॥९५॥

पद इत्ययमादेशः, पादशब्दस्य जायते ॥
आज्यादिषु परेष्विज्ज्व, पदातिः पदगो गणे ॥९५॥

हिमहतिकाषिये पत् ॥३॥२॥९६॥

पदेत् पादशब्दस्य, हिमादिषु यप्रत्यये ॥

ऋचः श्शसि ॥३॥२॥९७॥

शादौ शस्प्रत्यये नूनं, ऋचः पादस्य पद्भवेत् ॥
पच्छः शंसति गायत्री, श्लोकं ग्रथ्नाति पादशः ॥९७॥

शब्दनिष्कघोषमिश्रे वा ॥३॥२॥९८॥

शब्दादिषु पदादेशः, पादस्य वा विधीयते ॥
पच्छब्दः पादशब्दो वा, पन्मिश्रेण विधीयते ॥९८॥

नस् नासिकायास्तःक्षुद्रे ॥३॥२॥९९॥

नासिकाया नसादेशः, क्षुद्रे च तसि प्रत्यये ॥
नासिकाया भवेन्नस्तो, नःक्षुद्रः क्षुद्रनासिकः ॥९९॥

येऽवर्णे ॥३॥२॥१००॥

अवर्णे नासिकाया नस्, भवेद् ये प्रत्यये परे ॥
नासिकाय हितं नस्य, नासिक्यश्चानुनासिकः ॥१००॥

शिरसः शीर्षन् ॥३॥२॥१०१॥

ये प्रत्यये परे शीर्ष-न्नादेशः शिरसो भवेत् ॥
आशीतल नु शीर्षण्य, शीर्षण्यं टादिपञ्चकम् ॥१०१॥

केशे वा ॥३॥२॥१०२॥

केशे वा शिरसः शीर्ष-न्निति ये प्रत्यये परे ॥
स्त्रीणा शिरस्सु शीर्षण्याः, शिरस्याः कबरीहिताः ॥१०२॥

द्वि शपाठात् स्यादिशसि न स्यात्—ऋच. पादान् पस्य ॥९७॥
निः शब्दपक्षे पादमिश्रेणेत्यादि ॥९८॥ स्पष्टे ॥९९॥१००॥ य इत्येव शिरस्तः शिरस्यति ॥१०१॥ स्पष्टे ॥१०२॥१०३॥

शीर्षः स्वरे तद्धिते ॥३॥२॥१०३॥

स्वरादौ तद्धिते शीर्षः, शिरस्शब्दस्य जायते ॥
हास्तिशीर्षिः वलिष्ठः, स्या-न्मार्गशिर्षी च पूर्णिमा ॥१०३॥

उदकस्योदः पेषंधिवासवाहने ॥३॥२॥१०४॥

उदकस्य ह्युदादेशः, पेषमादिषु जायते ॥
उदपेषं पिनष्टीदं, जलवानुदधिघटः ॥१०४॥

वैकव्यञ्जने पूर्ये ॥३॥२॥१०५॥

अयुक्तव्यञ्जनादौ वा, पूर्ये स्यादुदको ह्युदः ॥
उदपात्रोदकामत्रो-दकपात्राणि पूर्यताम् ॥१०५॥

मन्थौदनसक्तुविन्दुवज्रभारहारवीवधगाहे वा ॥३॥२॥१०६॥

उदकस्य ह्युदादेशो, वा मन्थादिषु जायते ॥
स्याद् उदविन्दुना पूर्यो, घटो ह्युदकविन्दुना ॥१०६॥

नाम्न्युत्तरपदस्य च ॥३॥२॥१०७॥

पूर्वोत्तरपदस्थस्यो-दकस्यानाम्न्युदो भवेत् ॥
क्षीरोदलवणोदाख्या, उदधयो महार्णवाः ॥१०७॥

ते लुग्वा ॥३॥२॥१०८॥

स्यादुत्तरपदं पूर्व-पदं नाम्नि नु लुग नवा ॥

द्व्यन्तरनवर्णोपसर्गादप ईप् ॥३॥२॥१०९॥

अनवर्णोपसर्गेभ्यो द्व्यन्तभ्यां चाप ईप् भवेत् ॥
द्वीपं स्यादन्तरीप च, प्रतीप वा समीपकम् ॥१०९॥

अनोर्देश उप् ॥३॥२॥११०॥

देशे वाच्ये परस्यानो-रप उप् जायते ततः ॥
देशोऽनूपो भवेत् कच्छः, कूपादयः पृषोदराः ॥११०॥

खित्यनव्ययारुषो मोन्तो ह्रस्वश्च ॥३॥२॥१११॥

अनव्ययस्वरान्तस्या-रुपश्च खिति प्रत्यये ॥
परे मोऽन्तश्च ह्रस्वश्चा-न्तादेशः स्याद्विहङ्गमः ॥१११॥

सत्यागदास्तोः कारे ॥३॥२॥११२॥

कारे सत्यागदास्तूना, मोऽन्तः स्यादुत्तरे पदे ॥
सत्यङ्कारागदङ्कारा-स्तुङ्काराः सूत्रसम्मता ॥११२॥

लोकम्पृणमध्यन्दिनानभ्याशमित्यम्॥३॥२॥११३॥

कृतमान्ता अमी शब्दा, साधवः स्युर्निपातनात् ॥
लोकम्पृण वचो मध्य-न्दिनेऽनभ्याशमित्यकम्॥११३॥

भ्राष्ट्राग्नेरिन्धे ॥३॥२॥११४॥

भ्राष्ट्राग्निभ्या भवेन्मोऽन्त, इन्धशब्द पदोत्तरे ॥
भ्राष्ट्रमिन्धस्तथैवाग्नि-मिन्धः सूत्रेण साध्यते ॥११४॥

उपसर्गादिति-स्वाप । अनवर्णेति-प्राप्म्, परापम् ॥१०९॥ देश इति अनोप वनम् ॥११०॥ खितीति-ज्ञमानी, अनव्ययस्येति-दोपामन्यमह ॥१११॥ सूनय सत्म् ॥११२॥११३॥११४॥

अगिलाद् गिलगिलगिलयोः ॥३॥२॥११५॥

पूर्वपदाद् गिलान्तान्या-न्मोऽन्तो गिलगिले गिले ॥
तिमिङ्गिलगिलो मत्स्यो, बालङ्गिलश्च राक्षसः ॥११५॥

भद्रोष्णात् करणे ॥३॥२॥११६॥

भद्रोष्णाभ्यां भवेन्मोऽन्तः, करणे उत्तरे पदे ॥
स्याद्भद्रंकरणं भद्र-मुष्णंकरणमुष्णकम् ॥११६॥

नवाऽखित्कृदन्ते रात्रेः ॥३॥२॥११७॥

रात्रिशब्दस्य मोऽन्तो वा, कृदन्ते खिद्विवर्जिते ॥
रात्र्याटो रात्रिमाटश्च, रात्रिंचरश्च रात्र्यटः ॥११७॥

धेनोर्भव्यायाम् ॥३॥२॥११८॥

भव्याशब्दे परे धेनो-र्भवेन्मोऽन्तो विभाषया ॥
धेनुंभव्या तथा धेनु-भव्या भव्यातिदुग्धदा ॥११८॥

अषष्ठीतृतीयादन्याद् दोऽर्थे ॥३॥२॥११९॥

स्यादषष्ठीतृतीयान्ताद, दोऽन्तोऽर्थे चान्यशब्दतः ॥
अन्यदर्थं वचोऽन्यार्थं, वचोक्तिः स्यान्नियोजनात् ॥११९॥

आशीराशास्थितास्थोत्सुकोतिरागे ॥३॥२॥१२०॥

आशीराद्युत्तरेष्वन्ते, दो भवेदन्यशब्दतः ॥

अन्यदाशाऽन्यदास्थाऽन्य-दुत्सुकश्चान्यदास्थितः॥१२०

ईयकारके ॥३॥२॥१२१॥

अन्यशब्दाद्भवेद् दोऽन्तः, कारके चेयप्रत्यये ॥
अन्यत्कारकमन्यस्या-यमन्यदीय उच्यते ॥१२१॥

सर्वादिविष्वग्देवाड्डद्रिः क्व्यञ्चौ ॥३॥२॥१२२॥

स्याद् विष्वग्देवशब्दाभ्यां, सर्वादिश्चाञ्चतौ क्विपि ॥
डद्रिरन्तस्त्वदद्रीचा, देवद्र्यञ्चो विशेषिताः ॥१२२॥

सहसमः सध्रिसमि ॥३॥२॥१२३॥

क्व्यञ्चौ परे यथासङ्ख्यं, सहसमोः सध्रिः समिः ॥
सध्र्यङ्ङर्थं भवेत्सम्यङ्, समीचीन तदुच्यते ॥१२३॥

तिरसस्तिर्यति ॥३॥२॥१२४॥

अकारादौ क्विबन्तेऽञ्चौ, परे स्यात्तिरसस्तिरिः ॥
तिर्यञ्चस्तिरसाऽञ्चन्ति, तिरश्चीनं तिरोगतम् ॥१२४॥

नञत् ॥३॥२॥१२५॥

नञ्शब्दः स्यादकारो वा, उत्तरस्मिन् पदे परे ॥
अहिंसनामृपास्तेयामैथुनामूर्च्छना व्रताः ॥१२५॥

अन्यदाशी, अन्यदूति, अन्यदाग । षष्ठ्यादिवर्जनमत्रापि तन अन्यस्यान्येन वा आशी. अन्याशीरित्यादि ॥१२०॥ स्पष्टम् ॥१२१॥ क्वीति विष्वगञ्चनम् ॥१२२॥ क्व्यगादित्येव सहाञ्चनम् ॥१२३॥ स्पष्टम् ॥१२४॥ न भुङ्क्ते त्वादावुत्तरपदत्वाभावादत्वाभाव ॥१२५॥

त्यादौ क्षेपे ॥३॥२॥१२६॥

क्षेपे गम्ये भवेदद् नञ्, त्याद्यन्त उत्तरे पदे ॥
रे ? अपचसि जाल्म ? त्व-मकरोपि त्वमुन्मद ? ॥१२६॥

नगोऽप्राणिनि वा ॥३॥२॥१२७॥

अप्राणिन्यभिधेये वा, नगशब्दो निपात्यते ॥
अगो नगश्च भूमिध्रः, पादपाः स्युर्नगा अगाः ॥१२७॥

नखादयः ॥३॥२॥१२८॥

शब्दा एतेऽकृताकारा, निपात्यन्ते नखादयः ॥
नखो नभ्राट् नपान्नागो, नक्षत्र नान्तरीयकम॥१२८

अन् स्वरे ॥३॥२॥१२९॥

नञोऽनित्ययमादेशः, स्वरादावुत्तरे पदे ॥
अनाद्यनन्तससाराद-नन्तोऽर्हन मदाऽनतात् ॥१२९॥

कोः कत्तत्पुरुषे ॥३॥२॥१३०॥

तत्पुरुषे समासे स्यात्, स्वरादौ कोः कदित्ययम ॥
आदेशः कुत्सितोऽश्वः स, कदश्व, कन्नानपः ॥१३०॥

रथवदे ॥३॥२॥१३१॥

कुशब्दस्य कदादेशः, स्यादुत्तरे रथे वदे ॥
उचितं कद्रथोऽनेन, कद्वदाय समर्पितः ॥१३१॥

तृणे जातौ ॥३॥२॥१३२॥

कदादेशस्तृणे जातौ, वाच्यायां कोर्विधीयते ॥
कत्तृणा रौहिषाख्या स्या-दन्यथा कुतृणानि वै ॥१३२॥

कत्त्रिः ॥३॥२॥१३३॥

कि़शब्दस्य कुशब्दस्य, त्रिशब्दे कद् निपात्यते ॥
कुत्सिताः के त्रयो वा स्युः,कुत्त्रयो वाऽस्य कत्त्रिकः॥१३३॥

काक्षपथोः ॥३॥२॥१३४॥

कोः का इत्ययमादेशः, पथिन्यक्षे पदोत्तरे ॥
कापथेन न गन्तव्यं, काक्षैर्द्रव्यं न जातुचित् ॥१३४॥

पुरुषे वा ॥३॥२॥१३५॥

विकल्पेन कुशब्दस्य, कादेशः पुरुषोत्तरः ॥
कापुरुषैर्न योद्धव्यं, कुपुरुषाः सदा खलाः ॥१३५॥

अल्पे ॥३॥२॥१३६॥

ईषदर्थे कुशब्दस्य, कादेशः स्यात् पदे सदा ॥
मिष्ट कामधुरं काच्छ, क्षुधा यस्य न विद्यते ॥१३६।

एनाट्मन्तितोहितार्थम् ॥१२१॥ ॥१३२॥ ॥१३३॥ ॥१३४।
१३५॥ ॥१२७॥

काकवौ वोष्णे ॥३॥२॥१३७॥

उष्णशब्दे कुशब्दस्य, काकवौ स्तो विभाषया ॥
कोष्णं कवोष्णमुष्णं यत्, कदुष्णमीषदुष्णकम् ॥१३७॥

कृत्येऽवश्यमो लुक् ॥३॥२॥१३८॥

लुक् कृत्यप्रत्ययान्ते स्यान्, मस्यावश्यंविवर्तिनः ॥
अवश्यकरणीयं तद्, निर्वाहो नैव यद्विना ॥१३८॥

समस्ततहिते वा ॥३॥२॥१३९॥

समूशब्दस्य लुगन्तो वा, तते हिते पदे परे ॥
सहितं संहितं धर्मः सततं तस्य सन्ततम् ॥१३९॥

तुमश्च मनःकामे ॥३॥२॥१४०॥

मम्शब्दस्य तुमश्चान्ते, कामे मनसि लुग् भवेत् ॥
गन्तुकामः सकामोऽन्तु-मना स ममना सुधीः ॥१४०

मांसस्यानड्घञि पचि नवा ॥३॥२॥१४१॥

पच्यनड्घजि मांसस्य, लुगन्तः स्याद्विभाषया ॥
मांसपचन च मांसपाको, नरकायैव जायते ॥१४१॥

दिक्शब्दात्तीरस्य तारः ॥३॥२॥१४२॥

तीरशब्दस्य दिक्शब्दा-त्तारादेशो विभाषया ॥
पूर्वतार तथा पूर्व-तीरं देशस्य सुन्दरम् ॥१४२॥

सहस्य सोऽन्यार्थे ॥३॥२॥१४३॥

समासे स्याद् बहुव्रीहौ, सः सहस्य पदे नवा ॥
सपुत्रः सहपुत्रोऽयं, सशिष्यः सहशिष्यः ॥१४३॥

नाम्नि ॥३॥२॥१४४॥

सहशब्दस्य सादेशोऽ–न्यार्थे नाम्नि पदे परे ॥
सरसा नाम दूर्वा स्यात्, साश्वत्थं नाम काननम् ॥१४४॥

अदृश्याधिके ॥३॥२॥१४५॥

सोऽन्यार्थे सहशब्दस्य, त्वदृश्याधिकवाचिनोः ॥
कार्षापणः समाषः स्यात्, सानलश्च कपोतकः ॥१४५॥

अकालेऽव्ययीभावे ॥३॥२॥१४६॥

कालान्यार्थेऽव्ययीभावे, सहशब्दस्य सो भवेत् ॥
वृत्तं सब्रह्म साधूना, सचक्रं–धेहि सद्रथम् ॥१४६॥

ग्रन्थान्ते ॥३॥२॥१४७॥

स्याद् ग्रन्थान्तेऽव्ययीभावे, सहशब्दस्य सो ध्रुवम् ॥
सकलं ज्यौतिषं कृत्वा, सपादं लक्षणं श्रुतम् ॥१४७॥

नाशिष्यगोवत्सहले ॥३॥२॥१४८॥

आशिषि गम्यमानाया, परे गवादिवर्जिते ॥

अन्यार्थ इति सहज. ॥१४३॥ अन्यार्थ इति सहदेव कुरु ॥१४४॥ सक्ष ॥१४५॥ अकाल इति सपूर्वाह्णं शेते । अव्ययीभाव इति सहयुध्वा ॥१४६॥ सदृम् ॥१४७॥ आशिषीति सपुत्र । गवादि–वर्जनात् स्वस्ति

न सः सहस्य भद्रं स्तात्, सत्सद्भाय सूरिणे ॥१४८॥

समानस्य धर्मादिषु ॥३॥२॥१४९॥

स्यात् समानस्य सादेशो, धर्मादिषु परेषु वै ॥
सजातीयः सधर्मा वा, सगोत्रो भवति प्रियः ॥१४९॥

सब्रह्मचारी ॥३॥२॥१५०॥

शब्दः सब्रह्मचारीति, लक्षणेन निपात्यते ॥
समानव्रतशीलस्य, सब्रह्मचारिता मता ॥१५०॥

दृग्दृश्दृक्षे ॥३॥२॥१५१॥

सादेशः स्यात् समानस्य, दृशि दृक्षे तथा दृशे ॥
दृश्यते समरूपेण, सदृक्षः सदृशः सदृक् ॥१५१॥

अन्यत्यदादेरा ॥३॥२॥१५२॥

त्यदादेश्चान्यशब्दस्य, दृशि दृक्षे तथा दृशे ॥
स्यादाकारान्त आदेशो-ऽन्यादृशस्तादृशो न वै ॥१५२॥

इदंकिमीत्की ॥३॥२॥१५३॥

अनञः क्त्वो यप् ॥३॥२॥१५४॥

नञ्भिन्नादव्ययात्पूर्व-पदाद्यदुत्तरं पदम् ॥
तदंशस्य भवेत् क्त्वो यप्, मुक्ताः प्राप्य शिवं जिनाः॥१५४

पृषोदरादयः ॥३॥२॥१५५॥

शिष्टैः प्रयुज्यमानाश्चे-च्छब्दाः पृषोदरादयः ॥
लोपागमादिभिर्ज्ञेया, निपातिताः पृषोदराः ॥१५५॥

वाऽवाप्योस्तनिक्रीधाग्नहोर्वपी ॥३॥२॥१५६॥

तनिक्रीपरतोऽवस्य, वोऽपेः पिर्धाग्नहोर्नवा ॥
अवतंसो वतसोऽपि, पिधानमपिधानकम् ॥१५६॥

॥ इति द्वितीयः पादः ॥

इति सन्धि-नाम-कारक-समासात्मिका
प्रथमा वृत्तिः समाप्ता ॥

एतर्मादृक्ष कीदृक्ष इति ॥१५३॥ अनञ इति अहृत्वा परमकृत्वा । उत्तरपदस्येत्येव अलहृत्वा ॥१५४॥ एते शब्दा विहितलोपागमवर्णविकारा साधवः । भवेद्वर्णागमाद्धंस, सिंहो वर्णविपर्ययात् । गूढोत्मा वर्णविकृते-र्वर्णनाशात् पृषोदर ॥१॥ इति ॥१५५॥ एव वक्रय., अवक्रय', पिनद्धम् अपि नद्धमित्यादि । केचित्तु सर्वत्रेच्छन्ति । वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयो । आप चैव हलन्तानां, यथा वाचा निशा दिशा ॥१॥ इति ॥१५६॥
॥ इति द्वितीय पाद ॥

॥ अथ—आख्यातवृत्तिरारभ्यते ॥

वृद्धिरादैत् ॥३॥३॥१॥

आ—औरैकार औकारः, चत्वारो वृद्धिसंज्ञकाः ॥
साम्प्रत साम्प्रतं कार्य-मैन्द्रमौन्नत्यमिच्छता ॥१॥

गुणोऽरेदोत् ॥३॥३॥२॥

स्युररेदोच्च प्रत्येक, त्रयोऽपि गुणसंज्ञकाः ॥
यः करोति स्वकर्तव्य, स चेना धनविप्रयोः ॥२॥

क्रियार्थो धातुः ॥३॥३॥३॥

क्रिया कृतिः प्रवृत्तिर्वा, व्यापारः कथ्यते बुधैः ॥
धातुसंज्ञस्तदर्थः स्या—च्छब्दो जयति धातुमान ॥३॥

न प्रादिरप्रत्ययः ॥३॥३॥४॥

चाद्यभ्यन्तर्गतः प्रादि—र्धात्वंशो नैव जायते ॥
ततश्चेत् प्रत्ययो न स्यात्, प्राभवद्धीस्तुकायन ॥४॥

अवौ दाधौ दा ॥३॥३॥५॥

वर्तमाना तिव् तस् अन्ति सिव् थस् थ मिव् वस् मस्—ते आते अन्ते से आथे ध्वे ए वहे महे॥३॥३॥६॥

वर्तमाना भवन्त्येते, ह्यष्टादश तिवादयः ॥
वर्तमानेन योगेन, वर्तन्ते हि विचक्षणाः ॥६॥

सप्तमी यात् यातां युस् यास् यातं यात याम् याव याम—ईत ईयाताम् ईरन ईथास् ईयाथाम् ईध्वम् ईय ईवहि ईमहि ॥३॥३॥७॥

यात्यातामादयः साष्टा, सप्तमीसंज्ञका दश ॥
प्रसिद्ध्या सप्तमत्वेन, सप्तमीयं भवेत् स्फुटम् ॥७॥

पञ्चमी तुव् ताम् अन्तु हि तम् त आनिव् आवव् आमव्—ताम् आताम् अन्ताम् स्व आथाम् ध्वम् ऐव् आवहैव् आमहैव् ॥३॥३॥८॥

अष्टादश तुवाद्याः स्युः पञ्चमीसंज्ञका इमे ॥
लडादौ पञ्चमत्वेन, पञ्चमी जायतामियम् ॥८॥

स्पष्टम् ॥६॥ साष्टेति—अष्टा इति अष्टादशघटकोऽशस्तेन सहिता इति तथा चाष्टादशेत्यर्थं मन्तव्य । यद्वा पूर्वार्धे ' स्युरष्टादशयाताद्या, सप्तमी संज्ञका मता ' इति ॥७॥ १ लट्, २ लिट्, ३ लुट्, ४ लट्, ५ लोट् ६ लङ्, ७ लिङ्, ८ लुङ्, ९ लृट्, इति पाणिनीयप्रसिद्धा लकारास्तत्र लोट् इत्यस्य क्रमप्राप्तपञ्चमत्वेन पञ्चमीसंज्ञाऽन्वर्था । एवं पूर्वत्र सप्तमीसंज्ञाऽपि लिङ सप्तमत्वेन सार्थिका । न च लेट् इत्यस्य पञ्चमत्वमाशङ्क्यम्, तस्य छन्दोमात्रगोचरत्वेन प्रकृतेऽगणनात् ॥८॥

ह्यस्तनी दिव् ताम् अन् सिव् तम् त अम्व् व म-
त आताम् अन्त थास् आथाम् ध्वम् इ वहि महि
॥३॥३॥९॥

ह्यस्तनीसञ्ज्ञका एते, ह्यष्टादश दिवादयः ॥
ह्यस्तन्या हस्तिनी रात्रौ, प्रागच्छद्गजगामिनी ॥९॥

एताः शितः ॥३॥३॥१०॥

चतस्रो वर्तमानायाः, शानुबन्धा निदेलिमाः ॥
शित्त्वाच्च भवतीत्यादौ, गुणादिः स्याद् यथायथम् ॥१०॥

अद्यतनी दि ताम् अन् सि तम् त अम् व म त आताम्
अन्त थास् आथाम् ध्वम् इ वहि महि ॥३॥३॥११॥

दिमुख्या अद्यतन्यः स्यु-रष्टादशार्थसार्थकाः ॥
रजनिरजनि ग्लावाऽ-द्यतनी चन्द्रिकान्विता ॥११॥

परोक्षा णव् अतुस् उस् थव् अथुस् अ णव् व म-
आते इरे से आथे ध्वे ए वहे महे ॥३॥३॥१२॥

आशीः क्यात् क्यास्ताम् क्यासुस् क्यास् क्यास्तम्
क्यास्त क्यासम् क्यास्व क्यास्म—सीष्ट सीयास्ताम्
सीरन् सीष्ठास् सीयास्थाम् सीध्वम् सीय सीवहि
सीमहि ॥३॥३॥१३॥

स्युराशीःसंज्ञका अष्टा—दश क्यादादयः समे ॥
समेषां श्रेयसं भूया—दित्याशीः स्यान्महात्मनाम् ॥१३॥

श्वस्तनी ता तारौ तारस् तासि तास्थस् तास्थ तास्मि
तास्वस् तास्मस्—ता तारौ तारस् तासे तासाथे ताध्वे
ताहे तास्वहे तास्महे ॥३॥३॥१४॥

तादयः श्वस्तनीसंज्ञा, अष्टादश भवन्त्यमी ॥
श्वस्तन्या निशि सत्पर्षद्, भवितेति प्रयत्यताम् ॥१४॥

भविष्यन्ती स्यति स्यतस् स्यन्ति स्यसि स्यथस्
स्यथ स्यामि स्यावस् स्यामस्—स्यते स्येते स्यन्ते
स्यसे स्येथे स्यध्वे स्ये स्यावहे स्यामहे॥३॥३॥१५॥

स्यत्यादयो भविष्यन्ती-संज्ञा अष्टादश ध्रुवम् ॥
ज्ञात्वा प्राप्ति भविष्यन्तीं, हर्षितोऽद्य भविष्यति ॥१५॥

स्यथम् ॥१३॥ आगामिन्या तनस्विन्या सता सभा भविता इति—तस्माद्धेतो प्रयत्यताम्—क्रियतां यत्न. ॥१४॥ भविष्यन्तीं—भाविनीमिति ॥१५॥

क्रियातिपत्तिः स्यत् स्यताम् स्यन् स्यस् स्यतम् स्यत स्यम् स्याव स्याम—स्यत स्येताम् स्यन्त स्यथास् स्येथाम् स्यध्वम् स्ये स्यावहि स्यामहि ॥३॥३॥१६॥

क्रियातिपत्तिसंज्ञाः स्यु—रष्टादश स्यदादयः ॥
सैधिष्यत पयोऽपास्यन्, क्रियातिपत्तिभागपि ॥१६॥

त्रीणि त्रीण्यन्ययुष्मदस्मदि ॥३॥३॥१७॥

अन्यार्थे युष्मदर्थे चा—स्मदर्थेऽपि यथाक्रमम् ॥
सर्वाणि त्रीणि त्रीणि स्यु—र्वर्तेऽहं सोऽस्ति तं नय ॥१७॥

एकद्विबहुषु ॥३॥३॥१८॥

स्युरेकद्विबहुत्वार्थे—न्यादिषु त्रीण्यपि क्रमात् ॥
सोऽधीते तावधीयाते, श्रेयसे तेऽप्यधीयते ॥१८॥

नवाद्यानि शतृक्वसू च परस्मैपदम् ॥३॥३॥१९॥

परस्मैपदसंज्ञानि, नवाद्यानि शतृक्वसू ॥
सदा चिन्तनितं विद्वान्, मोहमपनयन्नगम् ॥१९॥

पराणि कानानशौ चात्मनेपदम् ॥३॥३॥२०॥

विभक्तीनां पराणि स्यु—र्नव कानानशौ तथा ॥
आत्मनेपदसंज्ञानि, कुर्वाणाः कार्यमामनन् ॥२०॥

तत् साप्यानाप्यात् कर्मभावे कृत्यक्तखलर्थाश्च ॥३॥३॥२१॥

कर्मणि साप्यतो धातो-स्तत् कृत्यक्तखलर्थकाः ॥
भावे चाकर्मकाज्ज्ञेया, भूयते शिवमाप्यते ॥२१॥

इङितः कर्तरि ॥३॥३॥२२॥

इकारेतो ङकारेतः, स्यात् कर्तर्यात्मनेपदम् ॥
स्यादिङ् अध्ययनेऽधीते, 'एधि' वृद्धौ सदैधते ॥२२॥

क्रियाव्यतिहारेऽगतिहिंसाशब्दार्थहसोहवहश्चानन्योऽन्यार्थे ॥३॥३॥२३॥

भवेत् क्रियाव्यतीहारेऽ-गत्यादेर्हरतेर्वहेः ॥
अन्योऽन्याद्यप्रयोगे चै, व्यतिस्ते आत्मनेपदम् ॥२३॥

निविशः ॥३॥३॥२४॥

निपूर्वाद्विशतेर्धातोः, कर्त्रर्थे आत्मनेपदम् ॥
निविशन्ते सदा सन्तः, सत्पथं नोत्पथं क्वचित् ॥२४॥

तदिति–आत्मनपदम् । उदाहरणसमूहः समूह्य ॥२१॥ स्पष्टम् ॥२२॥ अन्यचिकीर्षितायाः क्रियाया अन्येन हरणं करणम्–क्रियाव्यतिहारः। चैत्रस्य धान्यं व्यतिलुनन्ति अत्र व्यतिहारान्नात्मनेपदम् । गत्यर्थादिवर्जनात्–व्यतिगच्छन्तीत्यादि । अनन्योऽन्यार्थ इति परस्परस्य व्यतिलुनन्ति । कर्तरीति अनुवर्तनीयम्–तेन भावकर्मणोः पूर्वेणैव सर्वत्र ॥२३॥ स्पष्टम् ॥२४॥

उपसर्गादस्योहो वा ॥३॥३॥२५॥

वाऽस्यतेः सोपसर्गात् स्या-दूहतेश्चात्मनेपदम् ॥
समूहन्ति समूहन्ते, समस्यन्ति समस्यते ॥२५॥

उत्स्वराद्युजेरयज्ञतत्पात्रे ॥३॥३॥२६॥

उदः परं स्वरान्ताच्चो-पसर्गात् स्याद् युजेरपि ॥
कर्तर्ययज्ञतत्पात्रे, उद्युङ्क्त आत्मनेपदम् ॥२६॥

परिव्यवात् क्रियः ॥३॥३॥२७॥

परिव्यवोपसर्गेभ्यः, क्रीणातेरात्मनेपदम् ॥
विक्रीणीते जनः काच-मूल्येन मणिजीवनम् ॥२७॥

परावेर्जेः ॥३॥३॥२८॥

कर्त्रर्थे विपराभ्यां स्या-ज्जयतेरात्मनेपदम् ॥
धर्मो विजयतेऽधर्मो, स पराजयते सदा ॥२८॥

समः क्ष्णोः ॥३॥३॥२९॥

समः परात् क्ष्णुधातोः स्यात्, कर्त्रर्थे आत्मनेपदम् ॥
संक्ष्णुते क्षत्रियः शस्त्र-मायसं क्ष्णौति लोहकृत ॥२९॥

उदश्चरः साप्यात् ॥३॥३॥३१॥

उत्पूर्वाच्चरतेः साप्यात्, स्यात् कर्तर्यात्मनेपदम् ॥
मार्गमुच्चरते धूर्तः, सदोच्चरति सज्जनः ॥३१॥

समस्तृतीयया ॥३॥३॥३२॥

तृतीयान्तेन संपूर्वा-च्चरतेरात्मनेपदम् ॥
सञ्चरतेऽयमश्वेन, स सञ्चरति रथ्यया ॥३२॥

क्रीडोऽकूजने ॥३॥३॥३३॥

अकूजनार्थसम्पूर्व-क्रीडतेरात्मनेपदम् ॥
सक्रीडते समं सख्या, संक्रीडति रथोऽध्वनि ॥३३॥

अन्वाङ्परेः ॥३॥३॥३४॥

अन्वाङ्पर्युपसर्गेभ्यः, क्रीडतेरात्मनेपदम् ॥
बालाऽनुक्रीडते कामं, बालकाननु क्रीडति ॥३४॥

शप उपलम्भने ॥३॥३॥३५॥

उपलम्भनरूपेऽर्थे, शपतेरात्मनेपदम् ॥
शिष्याय शपते सूरिः, कुशिष्यं च शपत्यसौ ॥३५॥

आशिषि नाथः ॥३॥३॥३६॥

आशिष्येव स्थिताऽर्थेयं, नाथतेरात्मनेपदम् ॥

श्रेयसो नाथते भक्तो, बालको मधु नाथति ॥३६॥

भुनजोऽत्राणे ॥३॥३॥३७॥

अत्राणेऽर्थे भुनक्तेः स्यात्, कर्तर्य्यप्यात्मनेपदम् ॥
भुङ्क्ते ज्ञानामृतं योगी, भुनक्ति भूपतिर्भुवम् ॥३७॥

हृगो गतताच्छील्ये ॥३॥३॥३८॥

भवेत् प्रकारताच्छील्ये, हरतेरात्मनेपदम् ॥
नूनमनुहरन्तेऽश्वाः, पैतृकं मातृकं त्वजाः ॥३८॥

पूजाचार्यकभृत्युत्क्षेपज्ञानविगणनव्यये नियः ॥३॥३॥३९॥

पूजादौ गम्य उत्क्षेपा-दिषु वाच्येष्वनस्थितात् ॥
आत्मनेपदमुन्नेयं, नयतेर्नयते हितम् ॥३९॥

कर्तृस्थामूर्ताप्यात् ॥३॥३॥४०॥

नयतेः कर्तरि ज्ञेयं, कर्तृस्थामूर्तकर्मकात् ॥
आत्मनेपदमक्षान्ति, विनयस्व नयं नय ॥४०॥

शदेः शिति ॥३॥३॥४१॥

म्रियतेरद्यतन्याशिषि च ॥३॥३॥४२॥

अद्यतन्याशिषोः शित्त्वे, म्रियतेश्चात्मनेपदम् ॥
अमृत म्रियते मर्ता, मर्त्यो मृषीष्ट मारतः ॥४२॥

क्यङ्षो नवा ॥३॥३॥४३॥

षित्क्यङन्ताद्भवेद्धातोः, कर्तरि वाऽऽत्मनेपदम् ॥
बुभुक्षुः पथिको मूर्खो, निद्रायति निद्रायते ॥४३॥

द्युद्भ्योऽद्यतन्याम् ॥३॥३॥४४॥

अद्यतन्या द्युतादिभ्यः, कर्तरि वाऽऽत्मनेपदम् ॥
व्यद्योतिष्ट शरच्चन्द्रो, व्यद्युतद्धेमचन्द्रवत् ॥४४॥

वृद्भ्यः स्यसनोः ॥३॥३॥४५॥

स्यसनोर्विषये वृद्भ्यः, पञ्चभ्यो वाऽऽत्मनेपदम् ॥
वर्त्स्यन् वर्तिष्यमाणश्च, वर्तिष्यते विवृत्सति ॥४५॥

कृपः श्वस्तन्याम् ॥३॥३॥४६॥

श्वस्तन्या विषये धातोः, कृपेः स्याद्वात्मनेपदम् ॥
ज्ञानाय यदि कल्प्तासि, कल्पिता ते हिताय तत् ॥४६॥

क्रमोऽनुपसर्गात् ॥३॥३॥४७॥

उपसर्गोज्झिताद्वा स्यात्, क्रमतेरात्मनेपदम् ॥
त्रिविक्रमस्त्रिपद्योर्वी-मक्रामच्चक्रमे यतः ॥४७॥

मर्तेति श्वस्तन्यामात्मनेपदाभावोदाहरणम् ॥४२॥ स्पष्टम् ॥४३॥ अद्यतन्यामिति—द्योतत ॥४४॥ स्यसनोरिति वर्तते ॥४५॥ स्पष्टम् ॥४६॥ अनुपसर्गादिति—अनुक्रमति ॥४७॥

वृत्तिसर्गतायने ॥३॥३॥४८॥

वृत्तौ च तायने सर्गे, क्रमेः स्यादात्मनेपदम् ॥
शास्त्रेऽस्य क्रमते बुद्धिः, श्रेयसे क्रमते सुधीः ॥४८

परोपात् ॥३॥३॥४९॥

परापाभ्या नु वृत्त्यादौ, क्रमतेरात्मनेपदम् ॥
न पराक्रमते बुद्धि–र्यस्य किमुपक्रामति ॥४९॥

वेः स्वार्थे ॥३॥३॥५०॥

पादविक्षेपरूपेऽर्थे, वेः क्रमेरात्मनेपदम् ॥
साधु विक्रमते वाजी, विक्रामति भुवि स्मरः ॥५०

प्रोपादारम्भे ॥३॥३॥५१॥

आरम्भार्थक्रमेः प्रोप–संयुतादात्मनेपदम् ॥
शास्त्रं प्रक्रमते विद्वान्, सन्नुपक्रमते हितम् ॥५१॥

आङो ज्योतिरुद्गमे ॥३॥३॥५२॥

ज्योतिषामूर्ध्वगत्यर्थे, प्रधाने चोपसर्जने ॥
स्यादात्मनेपदं नूनं, क्रमेराक्रमते रविः ॥५२॥

दागोऽस्वास्यप्रसारविकासे॥३॥३॥५३॥

आङ्पूर्वकाद् ददातेः स्या–दात्मनेपदमन्यथाः ॥

विकासास्यप्रसारौ चे-न्नार्थावाददमहे धनम् ॥५३॥

नुप्रच्छः ॥३॥३॥५४॥

आङ्पूर्वनौतिप्रच्छिभ्या-मात्मनेपदप्रत्ययाः ॥
शिवाऽऽनुते समुत्कण्ठ-मापृच्छस्व प्रवासिनम् ॥५४॥

गमेः क्षान्तौ ॥३॥३॥५५॥

क्षान्तौ गमयतेर्धातो-राङ्पूर्वादात्मनेपदम् ॥
गामागमयते गोपः, शास्त्रमागमयेच्छिशुः ॥५५॥

ह्वः स्पर्धे ॥३॥३॥५६॥

पराभिभववाञ्छायां, गम्यायामात्मनेपदम् ॥
आङ्पूर्वाद् ह्वयतेर्मल्लो, मल्लमाह्वयतेऽञ्जसा ॥५६॥

संनिवेः ॥३॥३॥५७॥

स्यात् सं-नि-व्युपसर्गेभ्यो, ह्वयतेरात्मनेपदम् ॥
सह्वयते तथा निह्व-यते विह्वयते गमी ॥५७॥

उपात् ॥३॥३॥५८॥

ह्वयतेरुपपूर्वात् स्यु-रात्मनेपदप्रत्ययाः ॥
सन्नुपह्वयते सूरिः, शिष्यान् पाठयितुं श्रुतम् ॥५८॥

यमः स्वीकारे ॥३॥३॥५९॥

स्वीकारे तूपपूर्वात् स्याद्, यच्छतेरात्मनेपदम् ॥

वर्जनात्-उष्ट्रो मुख व्याददाति, कुल व्याददाति ॥५३॥ शिवा-सृगाली ॥५४॥ क्षान्ति-कालहरणम् । आगमयत-किञ्चित् काल प्रतीक्षते इत्यर्थ. ॥५५॥ स्पर्द्ध इति-नानाङ्गति ॥५६॥ स्पष्टे ॥५७॥५८॥ च्विनिर्देश-

रामः सीतामुपायंस्त, कालकूटं महेश्वरः ॥५९॥

देवार्चामैत्रीसङ्गमपथिकर्तृकमन्त्रकरणे स्थः ॥३।३॥

देवार्चाद्यर्थकाज्ज्ञेय–मुपात्स्थ आत्मनेपदम् ॥
गङ्गोपतिष्ठतेऽम्भोधिं, नार्हन्तमुपतिष्ठते ॥६०॥

वा लिप्सायाम् ॥३।३।६१॥

लिप्सायामुपपूर्वाद्वा, तिष्ठतेरात्मनेपदम् ॥
अर्थी 'धनं लभेये' ति, दातारमुपतिष्ठते ॥६१॥

उदोऽनूर्ध्वेहे ॥३।३।६२॥

स्यादूर्ध्वभिन्नचेष्टाया–मुदःस्थ आत्मनेपदम् ॥
मुक्तावुत्तिष्ठते योऽसौ, धन्यात्मा जगतीतले ॥६२॥

सविप्रावात् ॥३।३।६३॥

सविप्रावोपसर्गेभ्य–स्तिष्ठतेरात्मनेपदम् ॥
संतिष्ठते वितिष्ठस्व,प्रतिष्ठस्वावतिष्ठते ॥६३॥

ज्ञीप्सास्थेये ॥३।३।६४॥

ज्ञीप्सास्थेयक्रियार्थात् स्यात् तिष्ठतेरात्मनेपदम् ॥
वणिग्भ्यस्तिष्ठते वेश्या, मन्त्रिणि तिष्ठते नृप ॥६४॥

प्रतिज्ञायाम् ॥३॥३॥६५॥

तिष्ठतेः स्युः प्रतिज्ञाया–मात्मनेपदप्रत्ययाः ॥
शब्दमातिष्ठते नित्यं, शाब्दिको नतु तार्किकः ॥६५॥

समो गिरः ॥३॥३॥६६॥

प्रतिज्ञायां समः पूर्वा–द्गिरतेरात्मनेपदम् ॥
स्याद्वादं सङ्गिरन्ते ये, विश्वे स्युस्तेऽकुतोभयाः ॥६६॥

अवात् ॥३॥३॥६७॥

गिरतेरवपूर्वात् स्यु–रात्मनेपदप्रत्ययाः ॥
पक्त्वा स्वार्थं नु भुञ्जानो, जनोऽवगिरते वृथा ॥६७॥

निह्नवे ज्ञः ॥३॥३॥६८॥

जानातेरपलापेऽर्थे, संभवेदात्मनेपदम् ॥
स्वल्पमप्यपजानीते, तत्त्वं जानञ्जनः किमु ? ॥६८॥

संप्रतेरस्मृतौ ॥३॥३॥६९॥

जानातेः संप्रतिभ्या स्या–दस्मृतावात्मनेपदम् ॥
सहस्रं प्रतिजानीते, सञ्जानाति स मातरम् ॥६९॥

अननोः सनः ॥३॥३॥७०॥

अनुवर्जितजानातेः, सन्नन्तादात्मनेपदम् ॥
धर्मं जिज्ञासते लोके–नुजिज्ञासति कामितम् ॥७०॥

सप्तम् ॥६५॥ अकुतोभया –सर्वथा निर्भया ॥ सप्ते ॥६७॥६८॥ पर छद्मातिऽस्मरणे । स्मरणे प्रतिजानाति ॥६९॥ सप्तम् ॥७०॥

श्रुवोऽनाङ्प्रतेः ॥३॥३॥७१॥

श्रृणातेः कर्तरि ज्ञेयं, सन्नन्तादात्मनेपदम् ॥
आङ्प्रतिभ्या परस्मान्नो, शिष्यः शुश्रूषते गुरून् ॥७१॥

स्मृदृशः ॥३॥३॥७२॥

स्मरतेः पश्यतेश्चापि, सन्नन्तादात्मनेपदम् ॥
भव्यो दिदृक्षतेऽर्हन्त, सुस्मूर्षते पुराजनुः ॥७२॥

शको जिज्ञासायाम् ॥३॥३॥७३॥

जिज्ञासाया शकेर्धातो, सन्नन्तादात्मनेपदम् ॥
सद्विद्या शिक्षते योऽसौ, नूनं तामधिगच्छति ॥७३॥

प्राग्वत् ॥३॥३॥७४॥

सनः प्रकृतितुल्यं स्यात्, सन्नन्तादात्मनेपदम् ॥
कामं शिशयिषन्ते च–चक्रेरना योगनिद्रया॥७४॥

आमः कृगः ॥३॥३॥७५॥

प्रकृत्या तुल्यमामो वं, तत्परात् धातुतः कृगः ॥
स्यादात्मनेपदं तद्व–दीहाचक्रे शिवं पदम् ॥७५॥

गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथनोपयोगे
॥३॥३॥७६॥

उत्कुरुते सदैवासन्, सँश्चोपकुरुते न कम् ॥७६॥

अधेः प्रहसने ॥३॥३॥७७॥

प्रहसनेऽधिपूर्वात् स्यात्, करोतेरात्मनेपदम् ॥
अरातीनधिकुर्वाणं, नाधिकुर्वन्ति शत्रवः ॥७७॥

दीप्तिज्ञानयत्नविमत्युपसंभाषोपमन्त्रणे वदः ॥३॥३॥७८॥

दीप्त्याद्यर्थेषु गम्येषु, वदतेरात्मनेपदम् ॥
स्याद्वादे वदते विद्वान्, तत्त्वार्थे वदते सुधीः ॥७८॥

व्यक्तवाचां सहोक्तौ ॥३॥३॥७९॥

व्यक्तवाचां सहोक्तौ स्या-द्वदतेरात्मनेपदम् ॥
सन्तः सम्प्रवदन्ते नो, सम्प्रवदन्ति कुक्कुटाः ॥७९॥

विवादे वा ॥३॥३॥८०॥

व्यक्तवाचां विवादे वा, वदतेरात्मनेपदम्
वैद्या विप्रवदन्तेऽपि, विप्रवदन्ति तार्किकाः ॥८०॥

साहसम् । गुणान्तराऽऽधानम्-प्रतियत्न । प्रकथनम्-सूचनम् । धर्मादौ विनियोग -उपयोग ॥७६॥ प्रहसनम्-पराभिभव , परेणापराजयो वा ॥७७॥ विमति -नानामति. । उपसभाषा.-उपसान्त्वनम् । उपमन्त्रणम्-रहस्युपच्छन्दनम् । तपसि वदत, धर्म विवदन्ते, कर्मकरानुपवदते, कुलभार्यामुपवदते इत्यादि क्रमशो यत्नाद्युदाहरणतयाऽवसेयम् ॥७८॥ सहोक्ताविति-यैरैवोक्त मैवान्यवदति । व्यक्तवाचो-स्पष्टा मनुष्यादय तेषा सहोक्ति -सम्भूयोच्चारणम् ॥७९॥ विवाद इति सम्प्रवदन्त वैयाकरणा । सहोक्ताविति वैद्यो वैद्येन सार्द्धंप्रवदति ॥८०॥

अनोः कर्मण्यसति ॥३॥३॥८१॥

व्यक्तवाग्विषयाच्चानो-र्वदेरसति कर्मणि ॥
स्यादात्मनेपदं काम, पुत्राऽनुवदते पितुः ॥८१॥

ज्ञः ॥३॥३॥८२॥

कर्मण्यसति जानातेः, स्यात् कर्तर्यात्मनेपदम् ॥
जानीते सर्पिषः श्रीमाँ-स्तत्त्वं जानाति तत्त्ववित् ॥८२॥

उपात् स्थः ॥३॥३॥८३॥

कर्मण्यसति सोपात् स्यात्, तिष्ठतेरात्मनेपदम् ॥
आत्मोपतिष्ठते मुक्तौ, राजानमुपतिष्ठते ॥८३॥

समो गमृच्छिप्रच्छिश्रुवित्स्वरत्यर्तिदृशः ॥३॥३॥८४॥

सम्पूर्वकगमादिभ्यो-ऽकर्मभ्य आत्मनेपदम् ॥
सूक्तं मङ्गच्छते काले, सगृणोति हितं हितात् ॥८४॥

वेः कृगः शब्दे चानाशे ॥३॥३॥८५॥

अनाशेऽकर्मकाच्छब्द-कर्मकाद् वेः कृगो भवेत् ॥
आत्मनेपदमत्यन्तं, क्रोष्टा विकुरुते स्वरान् ॥८५॥

आङो यमहनः स्वेऽङ्गे च ॥३॥३॥८६॥

आङो यमिहनिभ्यां स्यु-रात्मनेपदमत्यया ॥

अकर्मस्वाङ्गकर्मभ्यां, पादमायच्छते स्वयम् ॥८६॥

व्युदस्तपः ॥३॥३॥८७॥

व्युद्भ्यां परात्तपेर्धातो-रकर्मस्वाङ्गकर्मणः ॥
आत्मनेपदमादित्यः, शरद्युत्तपते करैः ॥८७॥

अणिकर्मणिकर्तृकाण्णिगोऽस्मृतौ ॥३॥३॥८८॥

णिगन्तात् स्यादणिकर्म-णिकर्तृधातुतोऽस्मृतौ ॥
आत्मनेपदमुद्ग्रीवं, राजा दर्शयते प्रजाः ॥८८॥

प्रलम्भे गृधिवञ्चेः ॥३॥३॥८९॥

णिगन्तगृधिवञ्चिभ्या, वञ्चन आत्मनेपदम् ॥
वटुं गर्धयते गृध्नुः, पटुं वञ्चयते पटुः ॥८९॥

लीङ्लीनोऽर्चाभिभवे चाचाकर्तर्यपि ॥३॥३॥९०॥

लीङ्लीनाभ्यां णिगन्ताभ्या, लम्भार्चाभिभवेषु तत् ॥
चात्वं स्यात् कर्तृभिन्नेऽप्या-लापयते जटादिभिः ॥९०॥

स्मिङः प्रयोक्तुः स्वार्थे ॥३॥३॥९१॥

प्रयोक्तुः स्वार्थतो ण्यन्तात्, स्मयतेरात्मनेपदम् ॥
अन्त्यस्यात्वं च प्रागुक्त् स्याद्, व्यस्मापयत तापसः ॥९१॥

आय इति एन्तुम् ॥८६॥ एव वितपत इत्यादि ॥८७॥ तत्तद्विशेपफल वृह-दृष्टतरसंसरम् ॥८८॥ प्रलम्भ इति श्वान गर्द्धयति अभिकाङ्क्षामस्योत्पादयतीत्यर्थ । एवम् अहिं वञ्चयति-वञ्चयतीत्यर्थ ॥८९॥ तदिति—आत्मनेपदम् अभिभवे—श्येनो वर्तिकामपलापयत । प्रलम्भे—वस्त्वामुल्लापयत । अकर्तृपीति—जटाभिरालापयत जटिलम् ॥९०॥ प्रयोक्तु स्वार्थ इति स्येण विस्मापयति ॥९१॥

बिभेतेर्भीष् च ॥३॥३॥९२॥

प्रयोक्तुः स्वार्थतो ण्यन्ताद्, बिभेतेरात्मनेपदम् ॥
भियो भीष् स्यात्तथाऽऽत्वञ्च, प्राभीषयत भापनः ॥९२।

मिथ्याकृगोऽभ्यासे ॥३॥३॥९३॥

मिथ्याशब्दयुताण्ण्यन्तात्, करोतेरात्मनेपदम् ॥
अभ्यासेऽर्थे पदं मिथ्या–कारयते स्वरादिभिः ॥९३॥

परिमुहायमायसपाट्धेवदवसदमादरुचनृतः फलवति ॥३॥३॥९४॥

आङो यमियसिभ्याञ्च, पिबत्यादेः परेर्मुहः ॥
परिमोहयते चत्र, फलवत्यात्मनेपदम् ॥९४॥

ईगितः ॥३॥३॥९५॥

ईकारेतो गकारेतः, फलवत्यात्मनेपदम् ॥
पठते लक्षयते रूपं, शालीन् पचति पाचकः ॥९५॥

ज्ञोऽनुपसर्गात् ॥३॥३॥९६॥

अनुपसर्गजानातेः, फलवत्यात्मनेपदम् ॥
जानते साधवस्तत्त्वं, प्रजानाति शिवं सुधीः ॥९६॥

एव भापयत । प्रयोक्तु स्वार्थ इति कुञ्चिकया भाययति ॥९२॥ मिथ्येति-पद साधुकारयति । अभ्यास इति सकृत् पद मिथ्या कारयति ॥९३॥ आयामयत सर्पम्, आयामयत मैत्रम्, पाययत बटुम्, धापयत-शिशुम्, वादयत वटुम्, वासयत पान्थम्, दमयत अश्वम्, आदयत चैत्रेण, रोचयत मैत्रम्, नर्तयत नटम् ॥९४॥ स्पन्दे ॥९५॥९ ॥

वदोऽपात् ॥३॥३॥९७॥

अपपूर्ववदेर्धातोः, फलवत्यात्मनेपदम् ॥
'अपवदेत नो तथ्य' वदन्ति हितमुत्तमा ॥९७॥

समुदाङो यमेरग्रन्थे ॥३॥३॥९८॥

समुदाङ्भ्यो यमोऽग्रन्थे, फलवत्यात्मनेपदम् ॥
व्रीहीन् संयच्छते भार-मुद्यच्छते नियच्छति ॥९८॥

पदान्तरगम्ये वा ॥३॥३॥९९॥

फलस्य कर्तृगामित्वं, बोध्यते चेत् पदान्तरैः ॥
अग्रिमैः पञ्चभिः सूत्रै-स्तत्र स्याद्वाऽऽत्मनेपदम् ॥९९॥

शेषात् परस्मै ॥३॥३॥१००॥

येभ्यो येन विशेषेण, धातुभ्य आत्मनेपदम् ॥
उक्तं ततोऽन्यतो धातोः परस्मैपदप्रत्ययाः ॥१००॥

परानोः कृगः ॥३॥३॥१०१॥

परानुभ्यां करोतेः स्युः, परस्मैपदप्रत्ययाः ॥
पराकरोति पापं स, साधूननुकरोति यः ॥१०१॥

प्रत्यभ्यतेः क्षिपः ॥३॥३॥१०२॥

प्रत्यभ्यतेः क्षिपो धातोः, परस्मैपदप्रत्ययाः ॥
यदि वाञ्छसि कल्याणं, मा प्रतिक्षिप सज्जनम् ॥१०२॥

प्राद्वहः ॥३॥३॥१०३॥

प्रपूर्वाद् वहतेर्धातोः, परस्मैपदमुच्यते ॥

फलवत्त्वेऽत्र-अपवदन्ति पर स्वभावात् ॥९७॥ एवमायच्छत । अग्रन्थ इति-चिकित्सामुद्यच्छति ॥९८॥ 'परिमुहे'-त्यादिसूत्रपञ्चकै । स्व शत्रु, परिमोहयत परिमोहयति चेत्यादि ॥९९॥ भवति अस्ति इत्यादि ॥१००॥ स्पष्टम् ॥१०१॥ एनम् अभिक्षिपति, अतिक्षिपति ॥१०२॥ स्पष्टम् ॥१०३॥

प्रवहति धुरा धर्म्यां, जिनो धर्मधुरन्धरः ॥१०३॥

परेर्मृषश्च ॥३॥३॥१०४॥

परेर्मृषेर्वहेश्चापि, स्यात् परस्मैपदं ध्रुवम् ॥
परिमृषति भव्यात्मा, सततं मोक्षसाधनम् ॥१०४॥

व्याङ्परे रमः ॥३॥३॥१०५॥

व्याङ्परिभ्यो रमेर्धातोः, परस्मैपदमुच्यते ॥
प्रारभ्य श्रेयसे कर्म, विरमन्ति न साधवः ॥१०५॥

वोपात् ॥३॥३॥१०६॥

उपपूर्वाद् रमेर्धातोः, स्याद् परस्मैपदं नवा ॥
उपरमेद् रमा रम्यां, मुक्तिमुपरमेत सन् ॥१०६॥

अणिगि प्राणिकर्तृकानाप्याण्णिगः ॥३॥३॥१०७॥

स्यात् प्राणिकर्तृकानाप्या-दणिगि णिगि नित्यशः ॥
परस्मैपदमास्ते या, तामासयति गुर्विणीम् ॥१०७॥

चल्याहारार्थेङ्बुधयुधप्रुद्रुस्रुनशजनः ॥३॥३॥१०८॥

चल्याहारार्थधातुभ्य, इङादिभ्यश्च जायते ॥
णिङन्तेभ्यः पदं प्रोक्तं, पापः कम्पयति क्षमाम् ॥१०८॥

इति तृतीयपादः ॥

एव परिवहति ॥१०४॥ एवम् आरमति, परिरमति ॥१०५॥ स्पष्टम् ॥१०६॥ तत्तद्विशेषरूपमूह्यम् ॥१०७॥ एव—चलयति, भाजयति, आशयति चैत्रमन्नम्, सूत्रमध्यापयति शिष्यम्, बोधयति पद्मं रविः, यावयति काष्ठानि, प्रावयति राज्यम्, द्रावयत्ययः, स्रावयति तल्पम् नाशयति पापम्, जनयति पुण्यम् ॥१०८॥

इति तृतीय पादः समाप्तः ॥

गुपौधूपविच्छिपणिपनेरायः ॥३॥४॥१॥

गुपादिभ्यस्तु धातुभ्यो, जायते आयप्रत्ययः ॥
अर्थानिर्देशतः स्वार्थे, गोपायति पणायति ॥१॥

कमेर्णिङ् ॥३॥४॥२॥

भवेत् स्वार्थे कमेर्धातोः, प्रत्ययो णिङ् णङौ मतौ ॥
आत्मनेपदवृद्ध्यर्थौ, कामयस्व सदा शिवम् ॥२॥

ऋतेर्ङीयः ॥३॥४॥३॥

गतिस्पर्धघृणाद्यर्थात्, स्यादृतेर्ङीयप्रत्ययः ॥
आत्मनेपदता ङित्वा-दगुणश्च ऋतीयते ॥३॥

अशवि ते वा ॥३॥४॥४॥

अशवि स्याद् गुपादिभ्य, आयादयो विभाषया ॥
गोप्ता गोपायिता काम-यिता ना कमिता सुधीः ॥४॥

गुप्तिजो गर्हाक्षान्तौ सन् ॥३॥४॥५॥

गर्हायां स्याद् गुपेर्धातोः, सन् क्षमायां तिजेस्तथा ॥
पापी जुगुप्सते धर्मं, मुनिः सर्वं तितिक्षते ॥५॥

कितः संशयप्रतीकारे ॥३॥४॥६॥

जायते सन् कितो धातोः, संशयप्रतिकारयोः ॥

सूत्रत्रय व्यक्तार्थम् ॥१॥२॥३॥ एवम् ऋतीयिता, अर्तिता ॥४॥ गर्हाक्षान्त्योरिति गोपनम् तजनम् ॥ संशयप्रतीकार इति केतयति ॥६॥

चिकित्सति भिषग् व्याधिं, दुर्जनो विचिकित्सति ॥६॥

शान्दान्मान्वधान्निशानार्जवविचारवैरूप्ये दीर्घश्चेतः ॥३।४।७॥

निशानार्जववैरूप्य–विचारार्थेषु सन् क्रमात् ॥
शानेर्दानेर्वधेर्माने–दीर्घश्चेतः शीशांसते ॥७॥

धातोः कण्ड्वादेर्यक् ॥३।४।८॥

कण्ड्वादिभ्योऽपि धातुभ्यः, स्वार्थे यक् प्रत्ययो भवेत् ॥
कण्डूयन्ति महीयन्ते, मन्तूयन्ति जना भुवि ॥८॥

व्यञ्जनादेरेकस्वराद् भृशाऽऽभीक्ष्ण्ये यङ् वा ॥३।४।९॥

स्यादेकस्वरतो धातो–र्व्यञ्जनादेर्नु यङ् नवा ॥
आभीक्ष्ण्येऽर्थे भृशार्थे च, मानी जाज्वल्यते सदा ॥९॥

अट्यर्तिसूत्रिमूत्रिसूच्यशूर्णोः ॥३।४।१०॥

स्याद् भृशाभीक्ष्ण्ययोरेभ्यो, धातुभ्यो यङ् अटाट्यते ॥

एव दीदासति, मीमासत, बीभत्सते । अथाक्ति किम् ? अथान्तर माभूत्, निशानम्, अवदानम्, मानयति, बाधयति । अत्र पाठान्तरद्व मित्थम् 'शानादिभ्य क्रमात् स्वार्थे, निशानादिषु सन् भवेत् । पूर्वकारस्य दीर्घत्व, मीमासेत सदा शिवम् ॥' 'शानेस्तैक्ष्ण्ये नैर्वरूप्य दानरावा हि सन् । माने विचारणे दीर्घ–श्चेना मीमासत सुधी ॥' ॥७॥ धातोरिति कण्डू ॥८॥ गुणक्रियाणामधिश्रयणादीना क्रियान्तराव्यवधानेन साकल्ये उत्पत्ति फलातिरेको वा–भृशत्वम, प्रधानक्रियाया विच्छेदात् क्रियान्तराव्यवधानेन वृत्ति आभीक्ष्ण्यम् । व्यञ्जनादेरिति–भृशार्थोक्तत्व । एकस्वरादिति नुम नदति । धेति लुनीहि लुनीहीत्येवाय लुनातीत्यादि नथा स्यात् ॥९॥ एव सासूत्र्यते, अशाश्व्यते, प्राप्णानूर्वते ॥ ॥१०॥

आराट्यते तथा सोसू-च्यते मोमूत्र्यते भयात् ॥१०॥

गत्यर्थात् कुटिले ॥३॥४॥११॥

स्यादेकस्वरतो व्यञ्ज-नादेर्गत्यर्थधातुतः ॥
यङ् कुटिले न पूर्वार्थे, चङ्क्रम्यते खलो जनः ॥११॥

गलुपसदचरजपजभदशदहो गर्ह्ये ॥३॥४॥१२॥

गर्ह्ये गृप्रभृतिभ्यः स्याद्, धातुभ्यो यङ् न पूर्वयोः ॥
धूर्तः सासद्यते लोलु-प्यते चञ्चूर्यते तथा ॥१२॥

न गृणाशुभरुचः ॥३॥४॥१३॥

गृणाशुभरुचिभ्यस्तु, भृशाद्यर्थे न यङ् भवेत् ॥
गृणाति गर्हितं मूर्खोऽ-तिमात्रं शोभते शिशुः ॥१३॥

बहुलं लुप् ॥३॥४॥१४॥

बाहुल्येन यङो लुप् स्याद्, रोरवीति महावृषः ॥
चिलालपीति नाशोका-दशोकाल्लालपीत्यपि ॥१४॥

अचि ॥३॥४॥१५॥

यङो लुब् जायते नित्यं, नन्वचि प्रत्यये परे ॥
लोलुवः पोपुवश्चेच्यः, सनीसंसादयो मताः ॥१५॥

नोतः ॥३॥४॥१६॥

उदन्ताद् विहितो यो यङ्, तस्य लुग् नाचि प्रत्यये ॥

कुटिल इति भृशं क्रामति ॥११॥ एवं निजेगिल्यते, जञ्जप्यते, जञ्जभ्यते, दन्दशत, दन्दह्यत । गर्ह्य इति साधु जपति, भृशं निगिरति ॥१२॥ एवं भृशं गृणाति ॥१३॥ बहुलमिति क्वचिन्न लालपा, पोपूया ॥१४॥ स्पष्टे ॥१५॥१६॥

रोल्यो नीरवाद्वार्य्यो, न प्रतिरवतो वलात् ॥१६॥

चुरादिभ्यो णिच् ॥३॥४॥१७॥

चुरादयो णितः प्रोक्ता–स्तेभ्यो णिच्प्रत्ययो भवेत् ॥
स्वार्थे चोरयति स्तेनो, धनं भाग्यं नचार्थिनाम् ॥१७॥

युजादेर्नवा ॥३॥४॥१८॥

युजादिभ्यस्तु धातुभ्यः, स्वार्थे णिज्जायते नवा ॥
योजयेद्वा नियोजेत् स्वं, धर्मेण नतु कर्मणा ॥१८॥

भूङः प्राप्तौ णिङ् ॥३॥४॥१९॥

भुवो धातोर्भवेत् प्राप्त्या–वर्थे णिङ्प्रत्ययो नवा ॥
ज्ञानी भावयते योगाद्, भवते वा शिवं पदम् ॥१९॥

प्रयोक्तृव्यापारे णिग् ॥३॥४॥२०॥

प्रयोक्तुः प्रेपणादौ स्याद्, व्यापारे णिग् तु धातुतः ॥
पाठयति गुरुः शिष्यं, शिशु पाययति प्रभूः ॥२०॥

तुमर्हादिच्छायां सन्नतत्सनः ॥३॥४॥२१॥

यो धातुः स्यादिषेः कर्म, हीपिणा समकर्तृकः ॥
सन्वा तत इच्छाया–मिच्छासन्नन्ततो नवा ॥२१॥

णकारः इद्दर्थः । एवं नाटयति, पट्यत इत्यादि ॥१७॥ एवं साहयति सहनान्यादि ॥१८॥ प्राप्नातिनि–भवति ॥१९॥ माथम ॥२०॥ यथा निर्गीर्षति, जिगमिषति । नुमन्तिति यामन्ति्ठति । [illegible] भावतु याति । अन्तान इति निष्कांपिनुमिन्छति । नदिति उपुलिखत ॥२१॥

द्वितीयायाः काम्यः ॥३॥४॥२२॥

वा स्यान्नाम्नो द्वितीयान्ता–दिच्छार्थे काम्यप्रत्ययः ॥
धर्मकाम्यति धर्मात्मा, कामात्मा कामकाम्यति ॥२२॥

अमाव्ययात् क्यन् च ॥३॥४॥२३॥

वाऽनव्ययादमान्ताच्च, स्याद् द्वितीयान्तनामतः ॥
इच्छार्थे क्यन् च काम्यश्च, पुत्रीयति स्वरिच्छति ॥२३॥

आधाराच्चोपमानादाचारे ॥३॥४॥२४॥

उपमानाद् द्वितीयान्ता–दाधारात् स्यादमाव्ययात् ॥
क्यन् वा कन्या यतिर्वस्त्री–यति कुट्यां गृहीयति ॥२४॥

कर्तुः क्विप् गल्भक्लीबहोडात्तु ङित् ॥३॥४॥२५॥

क्विप् नवा नामतः कर्तु–राचार उपमानतः ॥
गल्भादेर्ङित् स एव स्या–दश्वति गल्भते खरः ॥२५॥

क्यङ् ॥३॥४॥२६॥

उपमानाद् भवेद् कर्तु–राचारे क्यङ् विभाषया ॥
विदुषा सङ्गतिं कृत्वा, मूर्खोऽपि विबुधायते ॥२६॥

सो वा लुक् च ॥३॥४॥२७॥

आचार उपमानात् स्यात्, क्यङ् नवा सान्तकर्तृतः ॥
लुगन्त्यसस्य वा ज्योत्स्ना, यशायते यशस्यते ॥२७॥

द्वितीयाया इति इष्ट पुत्र ॥२२॥ एव पुत्रकाम्यति ॥२३॥ आचारार्थे इति बोध्यम् ॥२४॥ ङित्त्वादात्मनेपदम ॥२५॥ क्विप्क्यङोस्तुल्यविषयत्वादसत्युत्सर्गापवादत्वे पर्यायेण प्रयोग ॥२६॥ स्पष्टे ॥२७॥२८॥

ओजोऽप्सरसः ॥३॥४॥२८॥

क्यङ् स्यादोजोऽप्सरोभ्यां वा, कर्तृभ्यामुपमानतः ॥
सलोपश्च ध्रुवं क्वापि-रोजायतेऽप्सरायते ॥२८॥

च्व्यर्थे भृशादेः स्तोः ॥३॥४॥२९॥

भृशादिभ्योऽपि कर्तृभ्य-श्च्व्यर्थे क्यङ्प्रत्ययो नवा ॥
लुक् स्तोर्भवेद्यथास्थान-मोजायते भृशायते ॥२९॥

डाच् लोहितादिभ्यः पित् ॥३॥४॥३०॥

डाजन्तेभ्यस्तथा लोहि-तादिभ्यः क्यङ् पिदुच्यते ॥
दमदमायन्ति क्ष्मेयं, किञ्च दमदमायते ॥३०॥

कष्टकक्षकृच्छ्रसत्रगहनाय पापे क्रमणे ॥३॥४॥३१॥

कष्टादिभ्यश्चतुर्थ्यर्थे, पापे क्यङ् क्रमणे भवेत् ॥
कष्टायते जनः कृच्छ्रा-यते च गहनायते ॥३१॥

रोमन्थाद् व्याप्यादुच्चर्वणे ॥३॥४॥३२॥

रोमन्थकर्मणः क्यङ् स्या-दुच्चर्वणे विभाषया ॥
भुक्त्वा पश्चाच्च रोमन्था-यन्ते गावः स्वभावतः ॥३२॥

फेनोष्मबाष्पधूमादुद्वमने ॥३॥४॥३३॥

फेनादिभ्यो नु कर्मभ्यः, क्यङ् स्यादुद्वमने नवा ॥
ऊष्मायते मरुद् धूमायते फेनायते पयः ॥३३॥

सुखादेरनुभवे ॥३॥४॥३४॥

साक्षात्कारे सुखादिभ्यः, कर्मभ्यः क्यङ् विभाषया ॥
जनः सुखायते दुःखा-यते च निजकर्मतः ॥३४॥

शब्दादेः कृतौ वा ॥३॥४॥३५॥

शब्दादिभ्योऽपि कर्मभ्यः, कृतौ क्यङ्प्रत्ययो नवा ॥
पात्र शब्दायते कांस्यं, न शब्दयति काञ्चनम् ॥३५॥

तपसः क्यन् ॥३॥४॥३६॥

कर्मवाचितपःशब्दात्, करोतौ क्यन् भवेन्नवा ॥
तपस्येन्मानवः सर्व-कालं कामं शमिच्छया ॥३६॥

नमोवरिवश्चित्रङोऽर्चासेवाश्चर्ये ॥३॥४॥३७॥

एभ्यस्त्रिभ्यो नु शब्देभ्यः, पूजादिषु भवेत् कृतौ ॥
क्यन् गा नमस्यति चित्री-यते च वरिवस्यति ॥३७॥

अङ्गान्निरसने णिङ् ॥३॥४॥३८॥

भवेन्निरसनेऽर्थे णिङ्, कर्मणो वाऽङ्गवाचिनः ॥
भीतभीतो जनो हस्त-यते पादयतेऽथवा ॥३८॥

एवं पाठान्तरम् ॥३३॥ स्पष्टे ॥३४॥३५॥ तपस्यति शत्रूनित्यादौ सकर्मकत्वं [illegible] ॥३६॥ स्पष्टे ॥३७॥३८॥

पुच्छादुतपरिव्यसने ॥३॥४॥३९॥

उत्परिव्यसने पुच्छ–शब्दाण्णिङ्प्रत्ययो नवा ॥
परिपुच्छयते हर्षात्, कपिः पुच्छयते सदा ॥३९॥

भाण्डात् समाचितौ ॥३॥४॥४०॥

कर्मणो भाण्डशब्दाद्वा, णिङ् प्रत्ययः समाचितौ ॥
ना सम्भाण्डयते यत्नात्, परिभाण्डयते परम् ॥४०॥

चीवरात् परिधानाऽर्जने ॥३॥४॥४१॥

चीवरात् कर्मणो णिङ् वा, परिधानेऽर्जने तथा ॥
सञ्चीवरयते सम्यग्, यावदावश्यक मुनिः ॥४१॥

णिज् बहुलं नाम्नः कृगादिषु ॥३॥४॥४२॥

नाम्नो णिच् प्रत्ययो ज्ञेयो, बाहुल्येन कृगादिषु ॥
लघयन्ति महात्मानं, दुर्जनाः स्वस्वभावतः ॥४२॥

व्रताद् भुजितन्निवृत्त्योः ॥३॥४॥४३॥

भोजने तन्निवृत्तौ च, व्रतशब्दात् कृगादिषु ॥
अचित्त व्रतयते शुद्धं, सचित्त व्रतयेद् व्रती ॥

सत्यार्थवेदस्याः ॥३॥४॥४४॥

सत्यार्थवेदशब्दाना–माकारोऽन्तो भवेण्णिचि ॥

सत्यापयन्ति ये वेदा–पयन्त्यर्थापयन्त्यपि ॥४४॥

श्वेताश्वाश्वतरगालोडिताह्वरकस्याश्वतरेतकलुक् ॥३॥४॥४५॥

श्वेताश्वादिचतुर्णां स्या–दश्वादेर्लुग् णिचि ध्रुवम् ॥
श्वेतयन्त्युत्तमा ग्राम–मश्वयन्ति च नीचकाः ॥४५॥

धातोरनेकस्वरादाम् परोक्षायाः कृभ्वस्ति चानु तदन्तम् ॥३॥४॥४६॥

अनेकस्वरतो धातोः, परोक्षास्थान आमनु ॥
कृभ्वस्तयः परोक्षान्ता–श्चकासामास धार्मिकः ॥४६॥

दयायास्कासः ॥३॥४॥४७॥

दयायास्कासधातुभ्यः, परोक्षास्थान आमनु ॥
कृभ्वस्तयः परोक्षान्ता, दयाञ्चक्रेऽकरोद् दयाम् ॥४७॥

गुरुनाम्यादेरनृच्छूर्णोः ॥३॥४॥४८॥

गुरुनाम्यादितो धातो–र्ऋच्छूर्णुवर्जिताद् भवेत् ॥
आमादेशस्तथाऽन्यच्च, प्राग्वदीहांचभूवतुः ॥४८॥

श्वेताश्व–अश्वतर–गालोडित–आह्वरक इति शब्दचतुष्क तस्य क्रमशो णिचि अश्व–तर–इत–र इति चतुष्कस्य लुक् ॥४५॥ एव चकासाचकार, चकासांबभूवेत्यादि ॥४६॥ एव पलायाञ्चक्रे, आसाञ्चक्रे इत्यादि ॥४७॥ गुर्विति किम् ददेप । नानीति–आनर्च । आदीनि–निनाय । अनृच्छूर्णोरिति–आनर्च्छ. प्रोर्णुनाव ॥४८॥

जागृषसमिन्धेर्नवा ॥३॥४॥४९॥

स्याज्जागृषसमिन्धिभ्य, आमादेशो विभाषया ॥
आगृवदन्यज्जजागर, जागरामास योगवान् ॥४९॥

भीह्रीभृह्रोस्तिवत् ॥३॥४॥५०॥

एभ्यः परं परोक्षाया, आम् वा तिव्वत् स जायते ॥
पूर्ववद् बिभयामास, बिभाय पापतो मुनिः ॥५०॥

वेत्तेः कित् ॥३॥४॥५१॥

वेत्तेर्धातोः परोक्षाया आम् वा किच्च स जायते ॥
आगृवदन्यद्विदामास, विवेद शिनमक्षरम् । ५१॥

पञ्चम्याः कृग् ॥३॥४॥५२॥

वेत्तेर्धातोर्नु पञ्चम्याः, किदाम् वा स्यात्ततः परम् ॥
पञ्चम्याः कृग् प्रयुज्येत, वेत्तु विदाङ्करोतु गाम् ॥५२॥

सिजद्यतन्याम् ॥३॥४॥५३॥

परस्यामद्यतन्या सिज्, प्रत्ययो धातुतो भवेत् ॥
अनैषीत कालमम्लानो, रामो दाशरथिर्वने ॥५३॥

स्पृशमृशकृषतृपदृपो वा ॥३॥४॥५४॥

स्पृशादिभ्यो नु धातुभ्योऽद्यतन्या सिज् विभाषया ॥

अस्प्राक्षीत्तीर्थभूमिं सोऽ-स्पार्क्षीदस्पृक्षदन्वहम् ॥५४॥

हशिटो नाम्युपान्त्यादहशोऽनिटः सक् ॥३॥४॥५५॥

हान्तात् शिडन्तन्तो नाम्यु-पान्त्याच्च दृशिवर्जितात् ॥
अनिटो धातुतः सक् स्या-दद्यतन्यामधुक्षत ॥५५॥

श्लिषः ॥३॥४॥५६॥

अद्यतन्यां श्लिषो धातो-र्भवेत् सक्प्रत्ययो ध्रुवम् ॥
आश्लिक्षद् भरतं रामः, काननादागतः कृशः ॥५६॥

नासत्त्वाश्लेषे ॥३॥४॥५७॥

अप्राण्याश्लेषरूपेऽर्थे, श्लिषः सक्प्रत्ययो नवै ॥
सर्वं समाश्लिषन् काष्ठं, जतु मुनिकुलं मुनिः ॥५७॥

णिश्रिद्रुस्रुकमः कर्तरि ङः ॥३॥४॥५८॥

ण्यन्ताच्छ्र्यादेश्च कर्त्रर्थे-ऽद्यतन्या ङः प्रजायते ॥
अचीकमत सद्धर्मं, रामो राज्यमचीकरत् ॥५८॥

धेश्वेर्वा ॥३॥४॥५९॥

धेश्विभ्यामद्यतन्या ङः, कर्तरि स्याद्विभाषया ॥
अधासीददधद् वार्धे-रधाद्वा विबुध सुधाम् ॥५९॥

हशिट इति अभैत्सीत् । नाम्युपान्त्यादिति अप्राक्षीत् । अदृश इति अद्राक्षीत् । अनिट इति अतार्क्षीत् ॥५५॥ अनिट इत्यनुसन्धेय तेनाश्लेषीत्-अधाक्षीदित्यर्थं इत्यत्र न सक्, दाहार्थस्य श्लिष सेट्त्वात् ॥५६॥ व्यत्याश्लिक्षत काष्ठानि अत्र सिच् । व्यत्याश्लिक्षन्त मिथुनानि अत्र ' हशिट ' ।३।४।५५। इति सक् ॥५७॥ एवम् अशिश्रियदित्यादि ॥५८॥ एवम् अशिश्वियत्, अश्वीत्, अधादित्यादि ॥५९॥

शास्त्यसूवक्तिख्यातेरङ् ॥३॥४॥६०॥

कर्तर्येभ्यो नु धातुभ्यो-ऽद्यतन्यामङ् प्रजायते ॥
भविकानखिलाँल्लोका-नशिषज्जिनभास्करः ॥६०॥

सर्त्यर्तेर्वा ॥३॥४॥६१॥

अङ्प्रत्ययोऽद्यतन्या स्यात्, सर्त्यर्तिभ्या निभाषया ॥
असार्षीदसरच्चन्द्र, आर्षीदारत् समारत ॥६१॥

ह्वालिप्सिचः ॥३॥४॥६२॥

भवेदेभ्योऽद्यतन्यामङ्, प्रत्ययो ननु कर्तरि ॥
आह्वत् स्नहेन सन्मित्र-मसिचच्च वचोऽमृतैः ॥६२॥

वात्मने ॥३॥४॥६३॥

ह्वादिभ्योऽङद्यतन्या वा, स्यात् कर्तर्यात्मनेपदे ॥
आह्वताह्वास्त वेगेन, गगनं रघुनन्दनः ॥६३॥

लृदिद्द्युतादिपुष्यादेः परस्मै ॥३॥४॥६४॥

भवेदेभ्योऽद्यतन्यामङ्, परस्मैपदप्रत्यये ॥
अगमदस्पृशद् ग्राम-मद्युतच्चापुषज्जनम् ॥६४॥

ऋदिच्छ्विस्तम्भूम्रुचूम्लुचूग्लु- लुञ्चूज्रो वा ॥३॥४॥६५॥

स्यात् परस्मैपदेऽङ् वाद्य-तन्यां श्व्यादेश्च ऋदितः ॥
न्यरुधदात्मनः शत्रुं, न्यरौत्सीच्चाभिदत्तथा ॥६५॥

ञिच् ते पदस्तलुक् च ॥३॥४॥६६॥

गत्यर्थात् पद्यतेर्धातो-रद्यतनीतप्रत्यये ॥
ञिच् तकारस्य लुक् च स्यात्, सद्विद्या समपादि ते ॥६६॥

दीपजनबुधिपूरितायिप्यायो वा ॥३॥४॥६७॥

कर्तर्येभ्योऽद्यतन्यास्ते, परे ञिच्प्रत्ययो नवा ॥
लोकमदीप्यदीपिष्टा-पूर्यपूरिष्ट कामनाम् ॥६७॥

भावकर्मणोः ॥३॥४॥६८॥

धातोरद्यतनीते स्याद्, ञिच् तलुग् भावकर्मणोः ॥
क्षीरोदे हरिणाऽशायि, दयाऽकारि जिनेश्वरैः ॥६८॥

स्वरग्रहदृशहन्भ्यः स्यसिजाशीःश्वस्तन्यां ञिट् वा ॥३॥४॥६९॥

ग्रहादिभ्यः स्वरान्ताच्च, स्यादिषु भावकर्मणोः ॥
ञिड् वा दायिष्यते विद्या, दास्यते सूरिभिः सदा ॥६९॥

एवम् अश्वत्, अश्वयीदित्यादि ॥६५॥ त इति उदपत्सातास् ॥६६॥ एवमजनि, अजनिष्टेत्यादि ॥६७॥ सुगमम्, ॥६८॥ एवमदायिषाताम्, अदिषाताम्, दायिषीष्ट, दासीष्ट, दायिता, दाता, इत्यादि ॥६९॥

क्यः शिति ॥३॥४॥७०॥

धातोः क्यः प्रत्ययो ज्ञेयो, भावकर्मशिति क्रमम् ॥
शय्यतां योगनिद्राया, श्रुतं सम्यगधीयताम् ॥७०॥

कर्त्तर्यनदुभ्यः शव् ॥३॥४॥७१॥

कर्त्तरि शिति शव् ज्ञेयो, धातोरदादिवर्जितात् ॥
भवति सभवेच्छ्रेयोऽभवद् भवतु धर्मतः ॥७१॥

दिवादेः श्यः ॥३॥४॥७२॥

दिवादिगणतो धातोः, श्यो भवेत् शिति कर्त्तरि ॥
दीव्यन्ति कृतिनो लोके, जायन्ते विशदाशयाः ॥७२॥

भ्रासभ्लासभ्रमक्रमक्लमत्रसित्रुटिलषियसिसंयसेर्वा

॥३॥४॥७३॥

श्यो नवा सम्भवेदभ्यः, कर्त्तरि विहिते शिति ॥
भवे भ्रमन्ति भ्राम्यन्ति, प्राणिनः स्वेन कर्मणा ॥७३॥

कुषिरञ्जेर्व्याप्ये वा परस्मै च ॥३॥४॥७४॥

आभ्यां शिद्विषये व्याप्ये, कर्त्तरि जायते नवा ॥
श्यः परस्मैपदं चापि, कुष्यन्ति नरा स्वयम् ॥७४॥

स्वादेः श्नुः ॥३॥४॥७५॥

धातोः स्वादिगणात् श्नुः स्यात्, कर्त्तरि विहिते शिति ॥
विषयिणं विसिन्वन्ति, शब्दाद्या विषयास्ततः ॥७५॥

वाऽक्षः ॥३॥४॥७६॥

'अक्षौ' धातोर्भवेत् श्नुर्वा, कर्तरि विहिते शिति ॥
अक्ष्णोत्यक्षति सङ्घातं, करोति व्याप्नुतेऽथवा ॥७६॥

तक्षः स्वार्थे वा ॥३॥४॥७७॥

'तक्षौ' धातोर्भवेत् स्वार्थे, कर्तरि विहिते शिति ॥
श्नुर्वा तक्ष्णोति यः काष्ठं, तक्षति काष्ठतट् स वै ॥७७॥

स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः श्ना च ॥३॥४॥७८॥

स्तम्भ्वादिसौत्रधातुभ्यः, स्कुगश्च शिति जायते ॥
श्नाः श्नुश्च प्रत्ययो विष्ट-भ्नाति स्तभ्नोति सम्मदः॥७८॥

क्र्यादेः ॥३॥४॥७९॥

श्नाः क्र्यादिगणतो धातोः, कर्तरि विहिते शिति ॥
यो यं प्रीणाति सद्भावात्, स तं क्रीणात्यसंशयम् ॥७९॥

व्यञ्जनाच्छ्नाहेरानः ॥३॥४॥८०॥

व्यञ्जनान्ताद् भवेद्धातो-रानः श्नासहितस्य हेः ॥
धर्मं पुषाण विज्ञानं, गृहाण मा लुनीहि शम् ॥८०॥

स्पष्टं ॥७४॥७५॥ स्वार्थ इति—सतक्षति शिष्यम् ॥७७॥ एव स्तुभ्नाति, स्तुभ्नोतीत्यादि ॥७८॥ स्पष्ट सूत्रत्रयम् ॥७९॥८०॥८१॥

तुदादेः शः ॥३॥४॥८१॥

शस्तुदादिगणाद्धातोः, कर्तरि विहिते शिति ॥
मूर्खः पुत्रस्तुदत्येन, पापश्चेत्तुदते भृशम् ॥८१॥

रुधां स्वराच्श्नो न लुक् च ॥३॥४॥८२॥

रुधादेः स्वरतः श्नः स्यात्, कर्तरि विहिते शिति ॥
लुक् प्रकृतेर्नकारस्य, भिन्ध्यरीनान्तरान् खलान् ॥८२॥

कृग्तनादेरुः ॥३॥४॥८३॥

भवेत् कृगस्तनादेश्च, कर्तरि विहिते शिति ॥
करोति कुरुते धर्मं, तनोति तनुते स शम् ॥८३॥

सृज श्राद्धे ञिक्यात्मने तथा ॥३॥४॥८४॥

श्राद्धे कर्तरि सृज्धातो-र्ञिक्यात्मनेपदानि चे ॥
विहितमनतिक्रम्य, धार्मिकः सृज्यते स्रजम् ॥८४॥

तपेस्तप कर्मकात् ॥३॥४॥८५॥

तपःकर्मकतप्धातो-स्तथा कर्तरि जायते ॥
ञिक्यात्मनेपदं तेपे, तप्यते वा तपो मुनिः ॥८५॥

एकधातौ कर्मक्रिययैकाऽकर्मक्रिये ॥३॥४॥८६॥

कर्मस्थक्रियया ऽभिन्ना, सम्प्रत्यकर्मिका क्रिया ॥

एकधातौ ततो ञिक्या–त्मनेपदान्यकारि किम् ? ॥८६॥

पचिदुहेः ॥३॥४॥८७॥

एकधातौ नु कर्मस्थ–क्रिये कार्य्याणि कर्तरि ॥
ञिक्यात्मनेपदान्याभ्यां, पच्यते ओदनः स्वयम् ॥८७॥

न कर्मणा ञिच् ॥३॥४॥८८॥

कर्मयोगे भवेदाभ्यां, कर्तरि प्रत्ययो न ञिच् ॥
आऽदोहि गौः पयोऽपाचि, वायुनोदुम्बरः फलम् ॥८८॥

रुधः ॥३॥४॥८९॥

कर्मकर्तरि रुधूधातो–र्नैव ञिच्प्रत्ययो भवेत् ॥
अरुद्ध गौः स्वयं गोपै–रराधि गौः सयष्टिकैः ॥८९॥

स्वरदुहो वा ॥३॥४॥९०॥

दुहः स्वरान्तधातोश्च, ञिज् नवा कर्मकर्तरि ॥
स्वयं कटोऽकृताकार्य्य–दुग्धाऽदोहि च गौः स्वयम् ॥९०॥

एकस्मिन् धातौ कर्मस्थक्रियया पूर्वदृष्टया एका–अभिन्ना सम्प्रत्यकर्मिका क्रिया यस्य, तस्मिन् कर्तरि कर्मकर्तृरूपे धातौ । एवमपाचि, पच्यते इत्यादि । एकधाताविति–पचत्योदनं चैत्र, सिध्यत्योदनः स्वयम् । कर्मक्रिययेति–साध्वसि-श्छिनत्ति । एकक्रिय इति–स्रवत्युदकं कुण्डिका, स्रवत्युदकं कुण्डिकायाः । अकर्मक्रिय इति भिद्यमानः कुशूलः पात्राणि भिनत्ति ॥८६॥ एवमपाचि, पच्यते इत्यादि, अदोहि, दुग्धे धोक्ष्यते वा गौः स्वयमेव ॥८७॥ कर्मणेति–नापाचि ओदनः स्वयमेव ॥८८॥ गोपैरित्यादि प्रत्युदाहरणम् ॥८९॥ स्पष्टम् ॥९०॥

तपः कर्त्रनुतापे च ॥३।४।९१॥

अनुतापे तपेर्ञिङ् न, कर्मकर्तरि कर्तरि ॥
अन्वतापि पापेना-न्वतप्त कितवः स्वयम् ।९१॥

णिस्नुश्र्यात्मनेपदाकर्मकात् ॥३।४।९२॥

स्नुश्रिभ्या ण्यन्तधातोश्चाऽकर्मभ्यः कर्मकर्तरि ॥
आत्मनेपदतायाः ञिच्, नैव प्रास्नोष्ट गौः स्वयम् ॥९२॥

भूषार्थसन्किरादिभ्यश्च ञिक्यौ ॥३।४।९३॥

भूषार्थसन्किरादिभ्यो, ण्यादिभ्यः कर्मकर्तरि ॥
ञिक्यौ स्याता न भाष्येन, कन्याऽलम कुरुत स्वयम् ॥९३॥

करणक्रियया क्वचित् ॥३।४।९४॥

ञिक्यात्मनेपदानि स्युः, करणक्रियया क्वचित ॥
कर्तरि पादप सयो वेष्टयन्ते लताः स्वयम ॥९४॥

इति चतुर्थः पादः

॥ तृतीयोऽध्यायः समाप्तः ॥

अथ चतुर्थोऽध्यायः ॥

द्विर्धातुः परोक्षाङे प्राक् तु स्वरे स्वरविधेः ॥४॥१॥१॥

धातुर्द्विः स्यात् परोक्षायां, ङे च द्विर्वचने स्वरे ॥
द्वित्वं स्वरविधेः पूर्वं, पपाठाशिश्रियद् गुरून् ॥१॥

आद्योऽंश एकस्वरः ॥४॥१॥२॥

अनेकस्वरधातोश्चा–द्यैकस्वरोऽंश उच्यते ॥
द्विर्ङेपरोक्षयोर्नक्त, जजागार महामुनिः ॥ २ ॥

सन्यङश्च ॥४॥१॥३॥

द्विराद्यैकस्वरोऽंशो हि, स्यात् सन्नन्तयङन्तयोः ॥
पापठ्यते श्रुतं सम्यक्, तितिक्षन्ते क्षमाधनाः ॥३॥

स्वरादेर्द्वितीयः ॥४॥१॥४॥

स्वरादिधातुसम्बन्धी, द्वितीयांशो द्विरुच्यते ॥
एकस्वरो न चाद्योऽंशो, नाशिशदाटिटिषत्ततः ॥४॥

न बदनं संयोगादिः ॥४॥१॥५॥

स्वरादेस्तु द्वितीयस्यै–कस्वरस्य न जायते ।
संयोगादिबकारादे–र्द्वित्वमाड्डिड्ददात्मना ॥५॥

चक्नु, जेघ्रीयते, शुशावेत्यादि प्रागित्यादे फलतया बोध्यम् । प्राक् तु स्वरे स्वरविधेरिति आद्विर्वचनादधिकार ॥१॥ स्पष्टे ॥२॥३॥ प्रागित्यादेरिति–आटिटत् ॥४॥ एवम् उब्जिजिषति, उन्दिदिषतीत्यादि । संयोगादेरिति प्राजिजिषति ॥५॥

अयि र. ॥४॥१॥६॥

संयोगादौ रकारो द्वि-र्न स्याद् ये तु परे भवेत् ॥
अन्यत्र पूर्ववज्ज्ञेय-मर्चिचिषत्यरार्यते ॥६॥

नाम्नो द्वितीयाद् यथेष्टम् ॥४॥१॥७॥

द्विर्भाक्स्वरादिनाम्नस्तु, द्विर्द्वितीयाद् यथेप्सितम् ॥
अश्विश्वीयिषति स्नेहा-दश्वीयियिषति त्वम् ॥७॥

अन्यस्य ॥४॥१॥८॥

स्वराद्यन्यस्य नाम्नस्तु, वातोद्विर्भाज उच्यते ॥
एकस्वरो यथेष्ट द्वि., पुपुत्रीयिषति ह्रिया ॥८॥

कण्ड्वादेस्तृतीय ॥४॥१॥९॥

कण्ड्वादेर्द्विवचोभाज-स्तृतीयाद्यो द्विरुच्यते ॥
एकस्वरो युवः कण्डू-यियिषति स्वय स्वचित् ॥९॥

पुनरेकेषाम् ॥४॥१॥१०॥

प्रधानाचार्यसम्मत्या, द्वित्वेऽपि द्वि. पुनर्भवेत् ॥
स्तुमोणुणिषते प्राणि-णिनिषद् मानसो मुदा ॥१०॥

यि सन् वेर्ष्य ॥४॥१॥११॥

ईर्ष्येद्विर्वचोभाजो, यि सन् वा द्वि प्रजायते ॥
ईर्ष्यियिषति नाना-ईर्ष्यिषिषति ॥सिरम् ॥११॥

ह्वः शिति ॥४॥१॥१२॥

जुहोत्याद्याः शिति द्विः स्यु-राददानि ददाति यः ॥
परार्थं स सुखं सन्तः, प्राणान् जुह्वति सर्वदा ॥१२॥

चराचर-चलाचल-पतापत-वदावद-घनाघन-पाटूपटं वा ॥४॥१॥१३॥

कृतद्विर्वचना वैते, निपात्यन्तेऽचि सूरिभिः ॥
चलाचलो भवेद् धूर्तो, वदावदो घनाघनः ॥१३॥

चिक्लिद-चक्नसम् ॥४॥१॥१४॥

क्लिद्यतेः क्नस्यतेश्चापि, क्रमशः केऽचि केऽथवा ॥
कृतद्वित्वौ निपात्येते, चिक्लिदः किमु चक्नसः ॥१४॥

दाश्वत्-साह्वत्-मीढ्वत् ॥४॥१॥१५॥

अद्वित्वाद्या निपात्यन्ते, त्रयोऽमी क्वसुप्रत्ययाः ॥
दाश्वान् वित्तं सुतं साह्वान्, वृक्षं मीढ्वान् गृही गृहे ॥

ज्ञप्यापो ज्ञीपीप्, न च द्विः सिसनि ॥४॥१॥१६॥

सादौ सनि ज्ञपेर्ज्ञीप् स्या-दापेरीप् न च द्विस्तयोः ॥
ईप्सति शाश्वतं शं यो, ज्ञीप्सति मतमार्हतम् ॥१६॥

॥१२॥ एव चराचर, पतापत, पाटूपट इति । पक्षे चर, चलः, [illegible], [illegible], [illegible], पाट इति ॥१३॥ अथवा के इति-उभयत्र घञर्थे के [illegible] ॥१४॥ दाशृङ् दाने, षहि मर्षणे, मिह सेचने इत्येषां क्रमशो दाश्वदित्यादि [illegible] ॥१५॥ [illegible]-[illegible]ति १६॥

ऋध ईर्त् ॥४॥१॥१७॥

सादौ सनि ऋधेरीर्त् स्याद्, धातुश्च द्विर्न जायते ॥
अर्दिधिषति सन् धर्मं, पापी चेर्त्संति पाप्मना ॥१७॥

दम्भो धिप्धीप् ॥४॥१॥१८॥

दम्भेः सिसनि धिप्धीपौ, न चास्य द्विर्भवेत्तदा ॥
धिप्सति धीप्सति क्रोधा, दिदम्भिषति नास्तिक ॥१८॥

अव्याप्यस्य मुचेर्मोग् वा ॥४॥१॥१९॥

अकर्मकमुचेर्धातोः, सिसनि मोग् विभाषया ॥
धातुश्च द्विर्न मोक्षन्ति, मुमुक्षन्ति च सज्जना ॥१९॥

मिमीमादामित् स्वरस्य ॥४॥१॥२०॥

दासंज्ञाना तथा मीमा-मीत्येतेषां स्वरस्य च ॥
मादौ सनीद् न चैषा द्वि-र्मित्सति मित्सते जनः ।

रभ-लभ-शक-पत-पदामि ॥४॥१॥२१॥

मादौ सनि स्वरस्यैषा-मिकारादेश उच्यते ॥
द्वित्वं नैव समाप्त्यर्थं, प्रारिप्सन्ते सनन्तिन ॥२१॥

राधेर्वधे ॥४॥१॥२२॥

हिंसार्थराधधातो स्या-दित् स्वरस्य पर सनि ॥

सादौ द्वित्वं न धर्मिणः, प्रतिरित्सन्ति कल्मषम् ॥२२॥

अवित्परोक्षासेट्थवोरे: ४॥१॥२३॥

सेट्थव्यवित्परोक्षायां, हिंसार्थकस्य राधतेः ।
एः स्वरस्य न धातुर्द्वी, रेधतुः प्रतिरेधिथ ॥२३॥

अनादेशादेरेकव्यञ्जनमध्येऽतः ॥४॥१॥२४॥

अनादेशादिधातोरे–रेकव्यञ्जनवर्तिनः ॥
सेट्थव्यवित्परोक्षाया–मतो न द्विश्च नेमिथ ॥२४॥

तॄत्रपफलभजाम् ॥४॥१॥२५॥

सेट्थव्यवित्परोक्षाया–मेषामेत्वं भवेदतः ॥
द्वित्वं न च भजन्त्येते, तेरुस्तेरिथ तेरतुः ॥२५॥

जभ्रमवमत्रसफणस्यमस्वनराजभ्राजभ्रासभ्लासो वा ॥४॥२॥२६॥

सेट्थव्यवित्परोक्षाया–मेत्वं वैषामतो भवेत् ॥
न च द्वित्वं स यभ्राजे, भ्रेजे तौ च रराजतुः ॥२६॥

इति–आरिरात्सति ॥२२॥ अविदिति–अपरराध । वध इत्येव–आरराधतुः ॥२३॥ एरित्यादि–असदाद्यव्यञ्जनयोर्मध्यगतस्य, अस्य अत इत्यनेन सम्बन्धः । अनादेशादेरिति–बभणतु । एकव्यञ्जनमध्य इति–ततक्षिथ । अत इति दिदिवतु । सेट्थवादित्येव–पपाथ ॥२४॥ एव त्रेपे, फेलु, फेलिथ, भेजु, भेजिथ ॥२५॥ एव जेरु, जजरु, जेरिथ, जजरिथेत्यादय ॥२६॥

वा श्रन्थग्रन्थो नलुक् च ॥४॥१॥२७॥

सेट्थव्यवित्परोक्षाया, स्वरस्यैरनयोर्नवा ॥
तद्योगे च नलुग् द्विर्न, श्रेथिव त्व जग्रन्थिव ॥२७॥

दम्भः ॥४॥१॥२८॥

दम्भेरवित्परोक्षाया-मेत्वं स्वरस्य नश्च लुक् ॥
द्वित्वं न देभतुर्देभु-स्तौ ते च म ददम्भ ना ॥ २८॥

थे वा ॥४॥१॥२९॥

दम्भेः स्वरस्य थे वत्वं, नस्य लुग् द्विश्च नो भवत् ॥
न त्वं देभिथ दृष्टात्मा, ददम्भिथ न मौनभाग ॥२९॥

न शसददवादिगुणिनः ॥४॥१॥३०॥

शसिदद्योस्तथा वादि-धातूना गुणिनाञ्च न ॥
एत्वं स्वरस्य शशसे, ददृदे ववले तथा ॥३०॥

हौ दः ॥४॥१॥३१॥

दासंज्ञकस्य धातोर्हा-वेत्वमस्त्व प्रजायते ॥
न च द्वि 'र्देहि देही ति, येह्नि दीनरसो न हि ॥३१॥

देदिगि परोक्षायाम ॥४॥१॥३२॥

परोक्षाया भवेद् देङो दिगिरादिश्च नो भवेत् ।
दिग्याते दिग्यिरे दिग्ये-त्यदिग्याने च दिग्यिरे

ङे पिबः पीप्य् ॥४॥१॥३३॥

ण्यन्तस्य पिबतेर्ङे स्यात्, पीप्यादेशः सनातनः ॥
दित्वं न, मुनयोऽपीप्यन्, पिपासूनमृत शिशून् ॥३३॥

अङे हि–हनो हो घः पूर्वात् ॥४॥१॥३४॥

हिहन्नित्येतयोर्धात्वो–रङे द्वित्वे सति ध्रुवम् ॥
पूर्वस्माद् हस्य घत्वं स्या–ज्जघान प्रजिघीषति ॥३४॥

जेर्गिः सन्–परोक्षयोः ॥४॥१॥३५॥

द्वित्वे परस्य गिर्ज्ञेयो, जयतेः सन्परोक्षयोः ॥
शत्रूञ्जिगीषति क्ष्माभृन्, मुनिश्च विजिगीषते ॥३५॥

चेः किर्वा ॥४॥१॥३६॥

द्वित्वे परस्य किर्वा स्या–च्चिनोतेः सन्परोक्षयोः ॥
चिक्ये चिच्ये च यो धर्मं, चिकीषति चिचीषति ॥

पूर्वस्यास्वे स्वरे य्वोरियुव् ॥४॥१॥३७॥

इत उतश्च पूर्वस्य, द्वित्वे स्त इयुवौ स्वरे ॥
अस्वे इयेष चोवोष, प्रारियर्ति तथेषतुः ॥३७॥

ऋतोऽत् ॥४॥१॥३८॥

स्यात् पूर्वस्य ऋतो द्वित्वे, सत्यकारश्चकार शम् ॥
पृथ्वीं बभार सद्धर्म–स्ततार भवसागरम् ॥३८॥

अङ इति–प्राजीह्यत् ॥३४॥ स्पष्टं ॥३५॥३६॥ ईयतुरित्यस्य रूपम् । स्सार इति ववाज ॥३७॥ स्पष्टम्॥ ३८॥

ह्रस्वः ॥४।१।३९॥

स्यात् पूर्वस्य सति द्वित्वे, ह्रस्वः पपौ च ओ दधौ ॥
निनाय च सिषेवे च, लुलोके च चकार कम् ॥३९॥

गहोर्जः ॥४।१।४०॥

स्यात् पूर्वयोर्गहोर्द्वित्वे, सति जश्च जघास यम् ॥
जगाम विपिनं नन्तु-मजहाद्दुदनो जनान् ॥४०॥

द्युतेरिः ॥४।१।४१॥

द्युतेर्द्वित्वे सति स्यादिः, पूर्वस्यातः स्वस्मिन्नुतन ॥
दिद्युते भुवि भूपालो, भानुमान् गगनाङ्गणे ॥४१॥

द्वितीय-तुर्ययोः पूर्वौ ॥४।१।४२॥

द्वित्वे आद्यतृतीयौ स्तः, पूर्वद्वितीयतुर्ययोः ॥
आदत्तौ रमणस्तस्थौ, पफाल ददतुः ॥४२॥

तिर्वा ष्ठिवः ॥४।१।४३॥

ष्ठिवेर्द्वित्वे तिरादेशः पूर्वस्य स्याद्विभाषया ॥
तिष्ठेव ननु टिष्ठेव, नेष्ठीवते जगत्त्रये ॥४३॥

व्यञ्जनस्यानादेर्लुक् ॥४।१।४४॥

अनादेर्व्यञ्जनस्य स्यात्, द्वित्वे पूर्वस्य लुक् सति ॥
जगामाष्टापदं नरः, ननाम जिनमन्दिरम् ॥४४॥

अघोषे शिटः ॥४॥१॥४५॥

द्वित्वे पूर्वस्य तत्सम्ब-न्धिन्यघोषे परे शिटः ॥
लुक् स्यात् चुश्च्योत पस्पर्धे, सस्नौ पप्सौ जनो भुवि ॥

कङश्चञ् ॥४॥१॥४६॥

द्वित्वे सति चञौ स्याता, क्रमशः पूर्वयोः कङोः ॥
चकार ञुङुवे कामं, चखान विश्वविश्रुतः ॥४६॥

न कवतेर्यङः ॥४॥१॥४७॥

द्वित्वे सति यङन्तस्य, कवतेः पूर्वको न चः ॥
कोकूयते खरश्चोकूयते, पुँस्कोकिलो मधौ ॥४७॥

आगुणावन्यादेः ॥४॥१॥४८॥

यङन्तस्य सति द्वित्वेऽ-न्यादेः पूर्वस्य चागुणौ ॥
पापच्यते फलं चेची-यते लोलूयते जनः ॥४८॥

न हाको लुपि ॥४॥१॥४९॥

द्वित्वे सति न हाकः स्या-दात्वं पूर्वस्य यङ्लुपि ॥
प्रजहाति सदा कामान्, मुनिर्जहीयते धनम् ॥४९॥

वञ्चस्रंसध्वंसभ्रंशकसपतपदस्कन्दोऽन्तो नीः

॥४॥१॥५०॥

एषा द्वित्वे यङन्ताना, पूर्वस्यान्तो नु नीर्भवेत् ॥
शं पनीपद्यतेऽर्हन्तं, यः पनीपत्यते मुदा ॥५०॥

स्पष्टे ॥४५॥४६॥ कवतेरिति-कौति-कुवत्योर्माभूत्, चोकूयते । यह इति चुकुवे ॥४७॥ अन्यादेरिति-चनीवच्यते, जञप्यते इत्यादि ॥४८॥ स्पष्टम् ॥४९॥ एवं वनीवच्यते इत्यादि ॥५०॥

मुरतोऽनुनासिकस्य ॥४॥१॥५१॥

मुरन्तः संभवेत् पूर्व-स्यात् परो योऽनुनासिकः ॥
तदन्तस्य यङन्तस्य, द्वित्वे ररम्यते दिवि ॥५१॥

जपजभदहदशभञ्जपशः ॥४॥१॥५२॥

एषां यङन्तधातूनां, द्वित्वे पूर्वो मुरन्तिमः ॥
जञ्जप्यते मुनिर्मन्त्रं, नहि दन्दह्यतेऽशुभम् ॥५२॥

चरफलाम् ॥४॥१॥५३॥

चरफला यङन्ताना द्वित्वे पूर्वो मुरन्तिमः ॥
चञ्चूर्यते तथा चञ्चू--रीति पम्फुल्यते भवेत् ॥५३॥

ति चोपान्त्यातोऽनोदुः ॥४॥१॥५४॥

चरफला यङन्ताना, तादौ च प्रत्यये परे ॥
उपान्त्यस्यात उस्तस्य, गुणो न चञ्चुरीत्यत्र ॥५४॥

ऋमतां री ॥४॥१॥५५॥

ऋमद्यङन्तधातूना, द्वित्वे पूर्वस्य जायते ॥
रीगन्तो धनलाभेन, ना नरीनृत्यते मुदा ॥५५॥

रि-रौ च लुपि ॥४॥१॥५६॥

यङो लुपि ऋमद्धातो-द्वित्वे पूर्वस्य रीस्तथा ॥
रिं चार्त्ती चरीकर्ति, चर्कर्ति चरिकर्ति च ॥५६॥

निजां शित्येत् ॥४॥१॥५७॥

निजिविजिविषां द्वित्वे, शिति पूर्वस्य जायते ॥
एद् नेनेक्ति च वेवेक्ति, वेवेष्टि च निनेज च ॥५७॥

पृभृमाहाङामिः ॥४॥१॥५८॥

पूर्वस्य पृभृमाहाङा-मिः द्वित्वे शिति जायते ॥
स्वामी नूनं पिपर्त्येव, सेवकानां मनोरथान् ॥५८॥

सन्यस्य ॥४॥१॥५९॥

धातोर्द्वित्वे हि पूर्वस्याऽ-कारस्येत्वं परे सनि ॥
दर्शनात्तृप्तचित्तोऽपि, भव्योऽर्हन्तं दिदृक्षति ॥५९॥

ओर्जान्तस्थापवर्गेऽवर्णे ॥४॥१॥६०॥

धातोर्द्वित्वे उदन्तस्य, पूर्वस्यावर्णके परे ॥
जान्तस्थापवर्गे हि, सनोकारः प्रजायते ॥६०॥

श्रुस्रुद्रुप्रुप्लुच्योर्वा ॥४॥१॥६१॥

एषा सनि परे द्वित्वे, पूर्वोदन्तस्य वेद् भवेत् ॥
अन्तस्थायामवर्णान्ता-या शिश्रावयिषन्ति ते ॥६१॥

एवम् इयर्ति, बिभर्ति, मिमीते, जिहीते, । हाटिति जहाति । शिती त्यव-पवार ॥५८॥ अस्येति-रापचिपते ॥५९॥ जिजावयिषति, यियविषति, पिपावयिषति इत्यादि । जान्तस्थापवर्ग इति-जुहावयिषति । अवर्ण इति बुभूषति ॥६०॥ पक्षे शुश्रावयिषति, एव सिस्रावयिषति, सुस्रावयिषति इत्यादि ॥६१॥

स्वपो णावुः ॥४॥१॥६२॥

स्वपेर्णौ विहिते द्वित्वे, पूर्वस्योत् स्याद् यथा शिशुम् ॥
सुष्वापयिषति प्रेम्णा, माता नैव तथाऽन्यका ॥६२॥

असमानलोपे डे ॥४॥१॥६३॥

स्यादसमानलोपे डे, णौ द्विर्भावे सति ध्रुवम् ॥
सन्वल्लघुनि पूर्वस्या-चीकरत् सुकृतं जिनः ॥६३॥

लघोर्दीर्घोऽस्वरादेः ॥४॥१॥६४॥

द्वित्वेऽसमानलोपे डे, णावस्वरादिकस्य तु ॥
लघोर्लघुनि पूर्वस्य, दीर्घश्चालीलवद् वनम् ॥६४॥

स्मृ-दृ-त्वर-प्रथ-म्रद-स्तृ-स्पशेः ॥४॥१॥६५॥

द्वित्वेऽसमानलोपे डे, णौ पूर्वस्याद् भवेत् सदा ॥
एतेषां सप्तधातूना-मसस्मरत स्मरं हरः ॥६५॥

वा वेष्टचेष्टः ॥४॥१॥६६॥

स्यादसमानलोपे डे, णौ द्वित्वेऽदनयोर्नवा ॥
पूर्वस्य त्ववेष्टद् द्रु-मावेवेष्टल्लतातती ॥६६॥

ई च गणः ॥४॥१॥६७॥

ङे णौ द्वित्वे गणेर्धातोः, पूर्वस्य स्याददन्तता ॥
ईदन्तता च विज्ञेय- गणदजीगणत् ॥६७॥

अस्यादेराः परोक्षायाम् ॥४॥१॥६८॥

धातोर्द्वित्वे परोक्षायां, पूर्वस्यादेरतो भवेत् ॥
आदाटतुरुभौ लोके, धर्मतो जीवपुद्गलौ ॥६८॥

अनातो नश्चान्त ऋदाद्यशौसंयोगस्य ॥४॥१॥६९॥

संयोगान्त-ऋदश्नोतेः, स्याद् द्वित्वेऽनात आ ध्रुवम् ॥
कृताकारात्तु नश्चान्तः, परोक्षाया किमानशे? ॥६९॥

भूस्वपोरदुतौ ॥४॥१॥७०॥

परोक्षाया सति द्वित्वे, पूर्वस्य स्तो यथाक्रमम् ।
भूस्वपोरदुतो जाड्यात्, सुष्वाप च बभूव ढः ॥७०॥

ज्या-व्ये-व्यधि-व्यचि-व्यथेरिः ॥४॥१॥७१॥

एषा द्वित्वे परोक्षाया, पूर्वस्येत्वं भवेत्तथा ॥
जिज्यौ, विव्याध विव्याच, वाव्यथ्यते च विव्यथे ७१

स्पष्टम् ॥६७॥ अस्यति-इंधु । आदरिति-पपाच ॥६८॥ अस्यार्थ — ऋदाश्नोति संयोगान्तस्य च परोक्षाया द्वित्वे पूर्वस्यादेरात् स्थानादन्यस्यास्य भा स्यात्, कृतातो नोऽन्तश्च । आनृधु, आनञ्ज । ऋदादीति-आर । अनात इति आञ्ज ॥६९॥ ढ -निर्गुण, लक्षणया जड इति यावत् ॥७०॥ स्पष्टम् ॥७१॥

यजादि-वश्-वचः सस्वरान्तस्था य्वृत् ॥४॥१॥७२॥

वशूवचोश्च यजादीना, परोक्षाद्वित्व उच्यते ॥
पूर्वस्य सस्वरान्तस्था, य्वृदियाज नरोऽमरान ॥७२॥

न वयो य् ॥४॥१॥७३॥

स्याद् वेगादेशभूतस्य, वयो यो य्वृन्न जातुचित् ॥
ऊयुस्ते तन्तुजालेन, कुविन्दाः पटमुत्तमम् ॥७३॥

वेरयः ॥४॥१॥७४॥

वेगोऽयन्तस्य पूर्वस्य, परस्य च न जायते ॥
लक्षणे य्वृत् परोक्षाया, रम्यं ववौ पुरातनम् ॥७४॥

अविति वा ॥४॥१॥७५॥

य्वृदयन्तस्य वेगो वा, परोक्षाया न जायते ॥
ववतुरूवतुर्द्वौ तौ, मिथ उत्कर्षकाङ्क्षिणौ ॥७५॥

ज्यश्च यपि ॥४॥१॥७६॥

ज्या इत्येतस्य वेगश्च, यपि य्वृन्नैव जायते ॥
उपव्याय प्रव्यायोप--ज्यायप्रज्यायमुख्यकाः ॥७६॥

व्य ॥४॥१॥७७॥

वेगो यपि परे धातो-र्जायते य्वृन्न जातुचित् ॥
प्रव्याय लौकिकीं लीला-मात्मा मोक्षमियान्न किम् ॥७७

संपरेर्वा ॥४॥१॥७८॥

संपरिभ्यां परं व्येगो, यपि य्वृद्धा न जायते ॥
परिवीय परिव्याय, द्विविधं रूपमिष्यते ॥७८॥

यजादिवचेः किति ॥४॥१॥७९॥

यजादीनां वचेश्चापि, य्वृद् भवेत् किति प्रत्यये ॥
ईयतुरिज्यते इज्यात्, इष्ट इष्ट्वा तथेजिवान् ॥७९॥

स्वपेर्यङ्ङे च ॥४॥१॥८०॥

स्वपेर्य्वृत् सस्वरान्तस्था, यङि ङे किति च क्रियात् ॥
सर्वथा कृतकार्य्यौ हि, सोसुप्यते सुषुप्सति ॥८०॥

ज्या-व्यधः ङ्किति ॥४॥१॥८१॥

जिनातेर्विध्यतेश्चापि, किति ङिति च प्रत्यये ॥
य्वृद् भवेत् सस्वरान्तस्था, जीनो जेजीयते जनः ॥८१॥

व्यचोऽनसि ॥४॥१॥८२॥

व्यचेर्य्वृत् सस्वरान्तस्था, किति ङित्यसुविवर्जिते ॥
विचितु विचिता वेवि—च्यते न स्यादुरुव्यचाः ॥८२॥

वशेरयङि ॥४॥१॥८३॥

वशेर्य्वृत् सस्वरान्तस्था, यङ्भिन्ने ङ्किति प्रत्यये ॥
उश्यते चेत् सुखं स्थातुं, सत्मङ्गतिर्विधीयताम् ॥८३॥

एर सन्याय, सवीर ॥७८॥ एवम् ऊयु, ऊचुरित्यादि । क्तीति
ष्म् ! यष्टि ॥७९॥ एवम् असुषुप्त् ॥८०॥ जीन—वृद्ध । एव
विध्वात्, विध्वांसर्वादि ॥८१॥ स्वठम् ॥८२॥ यङ्वर्जनात्—वावश्यते ॥८३॥

ग्रह--व्रश्च--भ्रस्ज--प्रच्छ: ॥४।१।८४॥

गृह्णातेर्वृश्चतेर्भ्रस्जेः, पृच्छतेर्य्वृद् भवेत् क्ङिति ॥
गृह्णाति वृश्चति वृकणो, भृष्टः पृष्टश्च भृज्जति ॥८४॥

व्ये--स्यमोर्यङि ॥४।१।८५॥

व्येस्यमोः सस्वरान्तस्था, य्वृद् भवेद् यङि प्रत्यये ॥
सेसिमीति तथा वेवी–यते इत्यादि साध्यताम् ॥८५॥

चाय: की ॥४।१।८६॥

भवेत् कीत्ययमादेश–श्चायृगित्यस्य यङ्परे ॥
जडश्चेकीयते ज्ञानं, चेत् कुर्यात् पञ्चमीतपः ॥८६॥

द्वित्वे ह्व: ॥४।१।८७॥

ह्वयतेः सस्वरान्तस्था, य्वृद् द्वित्वविषये भवेत् ॥
जोहूयते भवेत् सिद्ध, जुहाव च जुहूषति ॥८७॥

णौ ङ--सनि ॥४।१।८८॥

ह्वयतेः सस्वरान्तस्था, ङपरे सन्परे च णौ ॥
य्वृत् स्यादजूहवत् कश्चि–ज्जुहाविषयतीच्छया ॥८८॥

वा परोक्षायङि॥ ४॥१॥९०॥

श्वयतेः सस्वरान्तस्था, स्वृत् परोक्षायङोर्नवा ॥
ततः शोशूयते शेश्वी-यते शिश्वाय लक्ष्यताम् ॥९०॥

प्यायः पी ॥४॥१॥९१॥

प्यायतेः पीः परोक्षाया, यङि च प्रत्यये भवेत् ॥
जनः पेपीयते नूनं, शुभाच्छुभोऽशुभोऽशुभात् ॥९१॥

क्तयोरनुपसर्गस्य ॥४॥१॥९२॥

क्तक्तवतोर्भवेत् प्यायोऽ-नुपसर्गस्य पीरिति ॥
प्रप्यानो वारिदः पीन-माननं पीनवच्छ्रिये ॥९२॥

आङोऽन्धूधसोः ॥४॥१॥९३॥

अन्धावूधसि चार्थे स्यात्, प्यायेराङः परस्य पीः ॥
क्तयोः स्यादन्धुरापीन, आपीनमूध उन्नतम् ॥९३॥

स्फायः स्फी वा ॥४॥१॥९४॥

जायते स्फायतेः स्फीर्वा, क्तयोः प्रत्यययोः परे ॥
स्फीतं च स्फीतवत् स्फात, स्फानवद्वर्धनवं पयः ॥९४॥

प्रसमः स्त्यः स्ती ॥४॥१॥९५॥

प्रसमित्येनसङ्ख्यात-पूर्वस्य स्त्यायतेः क्तयोः ॥
स्तीनिदेशः प्रसस्तीतः, संप्रस्त्यानोऽन्यथा भवेत् ॥९५॥

एवं शुशाव ॥९०॥ एवम् आपिप्ये ॥९१॥ स्पष्टम् ॥९२॥ अन्धूधसोरिति किम् ?– आप्यानश्चन्द्र । आङः इति किम् ? प्राप्यानमूधः ॥९३॥ स्पष्ट ॥९४॥९५॥

१७

प्रात् तश्च मो वा ॥४॥१॥९६॥

प्रपूर्वस्त्यायतेः स्तीः स्यात्, क्तयोस्तस्य च मो नवा ॥
प्रस्तीमश्चापि प्रस्तीतो, द्वे रूपे तद्विधीयताम् ॥९६॥

श्यः शीर्द्रवमूर्ति-स्पर्शे नश्चास्पर्शे ॥४॥१॥९७॥

द्रवमूर्तौ तथा स्पर्शे, श्यायतेः शीः क्तयोर्भवेत् ॥
न श्चास्पर्शे घृत शीनं, शीनाच्छीनः समीरणः ॥९७॥

प्रतेः ॥४॥१॥९८॥

श्यायतेः प्रतिपूर्वस्य, जायते शीः क्तयोस्ततः ॥
तकारस्य च नत्वं स्याद्, प्रतीशीनो हि पीनसः ॥९८॥

वाऽभ्यवाभ्याम् ॥४॥१॥९९॥

श्यायतेरभ्यवाभ्यां वा, शीरादेशः क्तयोर्भवेत् ॥
नश्चास्पर्शे तकारस्या-भिशीन घृतमुच्यते ॥९९॥

श्रः शृतं हविः क्षीरे ॥४॥१॥१००॥

क्षीरे हविषि चार्थे तु, क्ते श्राते श्रायतेश्च शृः ॥
निपात्यते शृत क्षीरं, स्वयमेव शृत हविः ॥१००॥

श्रपेः प्रयोक्त्रैक्ये ॥४॥१॥१०१॥

श्रन्तस्य श्रानं श्राते , प्रयोक्त्रैक्ये निपात्यते ॥

शृर्हविःक्षीरयोः क्ते तत्, शृतं क्षीरं हविस्तया ॥१०१॥

ष्ठ्यूत् सकृत् ॥४॥१॥१०२॥

सकृदेव भवेद् ष्ठ्यूद् य-दन्तस्थास्थानभाविनी ॥
विरहिणः क्रूरैः स्वीयै-र्विध्यतीति विधुर्मतः ॥१०२॥

दीर्घमवोऽन्त्यम् ॥४॥१॥१०३॥

ष्ठ्यूदन्त्यं मंभवेद्दीर्घं, वेगश्चिन्न भवेत्तथा ॥
अद्भुता लभते स्फूर्त्तिं, जीनोऽपि जिनवन्दनात् ॥१०३॥

स्वरहनगमोः सनि धुटि॥४॥१॥१०४॥

धुडादौ सनि दीर्घः स्यात् स्वरान्तस्य च हन्गमोः ॥
यः मञ्जिगांसते दुर्गं, चिचीपति जिघांसति ॥१०४॥

तनो वा ॥४॥१॥१०५॥

तनेः स्वरस्य दीर्घो वा, धुडादौ सनि प्रत्यये ॥
मन् भूयांश्चयशः शुभ्रं, तितांसमि तितसांसि ॥१०५॥

क्रमः क्त्वि वा ॥४॥१॥१०६॥

क्रमेः स्वरस्य दीर्घत्वं, धुडादौ क्त्वि विभाषया ॥
क्रान्त्वा क्रन्त्वा क्रमित्वा ना, लब्ध्वा स्थानान्तरं मुनिः ॥१०६॥

भाग इति श्रपिना ग्राग् । श्रपोक्तैस्य इति श्रपित हविर्धैन्रेण मैत्रेण ॥१०१॥ स्पष्टम् ॥१०२॥ जान-जीर्ण, वृद्ध इति यावत् । अव इति-उत । अन्त्य-मिति-तुम ॥१०३॥ धुटीति-चिरविपति ॥१०४॥ धुटीत्येव-तितनिपति ॥१०५॥ स्पष्टम ॥१०६॥

अहन्पञ्चमस्य क्विक्ङिति ॥४।१।१०७॥

हनवर्जपञ्चमान्तस्य, धातोः स्वरस्य दीर्घता ॥
क्वौ प्रत्यये धुडादौ च, ङ्किति शान्तः प्रतान् प्रशान् ॥१०७॥

अनुनासिके च च्छ्वः शूट् ॥४।१।१०८॥

धातोश्छ्वोः श्वः क्रमात् शूटौ, धुडादौ प्रत्यये तथा ॥
क्वावनुनासिके प्रश्नः, पृष्ट्वा नाऽऽलोकते नमः ॥१०८॥

मव्यविश्रिविज्वरित्वरेरुपान्त्येन ॥४।१।१०९॥

मव्यादीनां वकारस्यो-पान्त्येन ऊटि प्रत्यये ॥
क्वौ चोट् मवेऽञ्जनो जूर्णौ, तूर्णो नैव मवेन कश्चित ॥१०९॥

राल्लुक् ॥४।१।११०॥

रात् परयोश्छ्वोर्लुक्, धुडादौ प्रत्यये तथा ॥
कावनुनासिके मोर्मा मोर्मा मोर्माणि तूर्णवान् ॥११०॥

क्त्वोऽनिटश्चजोः कगौ घिति ॥४।१।१११॥

जायते क्त्वोऽनिटो घाते चजोरिति क्रमात् कगौ ॥
पाकः सेकः तथा त्यागो, भोग्यमर्च्यसमाजक ॥१११॥

न्यङ्क्वद्गमेघादयः ॥४॥१॥११२॥

न्यङ्क्वादयश्च मेघाद्या, उद्गाद्याश्च निपातिताः
कत्वे घत्वे च गत्वे स्यु–, र्न्यङ्कुमेघसमुद्गकाः ॥११२॥

न वञ्चेर्गतौ ॥४॥१॥११३॥

कत्वं न जायते धातो–र्गत्यर्थकस्य वञ्चतेः ॥
वङ्क काष्ठं करे कृत्वा, वञ्चं वञ्चन्ति वञ्चकाः ॥११३॥

यजेर्यज्ञाङ्गे ॥४॥१॥११४॥

जायते जस्य गत्वं नो, यजेर्यज्ञाङ्गवर्तिनः ॥
यदि पञ्च प्रयाजा स्युः, प्रयागे पञ्चता नहि ॥११४॥

ण्यण्यावश्यके ॥४॥११५॥

धातोश्चजोः कगौ नेवाऽऽ–वश्यकोपाधिके घ्यणि ॥
अवश्यपाच्यमौपध्य–मिच्छया पाक्यमौपधम् ॥११५॥

निप्राद् युजः शक्ये ॥४॥१॥११६॥

आभ्यां घ्यणि युजः शक्ये, गम्ये गत्वं न जायते ॥
नियोज्या वा प्रयोज्या वा, नियोग्या हितकर्मणि ॥११६॥

एव तकारादुब्जाद्या कत्वे, दर्भयतिपक्षमद्गुमुद्गगाद्या गत्वे, ओघ-मेघाद्याश्च घत्वे साध्याः । एतदविहितलक्षणानि कत्वगत्वघत्वानि द्रष्टव्यानि ॥११२॥ वञ्चं वञ्च नीति–'पथैव न्यग्रोधस्य–मद्भुले वित्तवत्तमाः । दात्राण्यपि मलान्त, वञ्च यन्त्रन्ति वाणिजा ॥' इति न्यक्षमुद्राधरति ॥११३॥ स्पष्टम् ॥११४॥ पाकादवश्यं पचनित्यादि ॥११५॥ नियोग्या–सेवका प्रत्युदाहरणमिदम् ॥११६॥

भुजो भक्ष्ये ॥४॥१॥११७॥

भुनक्तेर्भक्ष्यरूपेऽर्थे, घ्यणि गत्वं न जायते ॥
भुक्त्वा भोज्यं सदाभोगी, भुङ्क्ते भोग्यं गृहादिकम् ॥११७॥

त्यज-यज-प्रवचः ॥४॥१॥११८॥

एषां चजोः कगौ नैव, भवेतां घ्यणि प्रत्यये ॥
त्याज्यप्रवाच्ययाज्यानां, सिद्धये स्मर लक्षणम् ॥११८॥

वचोऽशब्दनाम्नि ॥४॥१॥११९॥

वचेरशब्दसंज्ञायां, घ्यणि कत्वं न जायते ॥
वाच्यं वाक्यं तथा नैव, वचनीयं न जायते ॥११९॥

भुज-न्युब्जं पाणिरोगे ॥४॥१॥१२०॥

घजन्तस्य भुजेर्न्युब्जे-र्भुजो न्युब्जो निपात्यते ॥
पाणौ रोगे यथासङ्ख्यं, न्युब्जो रोगो भुजः करः ॥१२०॥

वीरुन्-न्यग्रोधौ ॥४॥१॥१२१॥

रोहतेर्न्यग्रुहश्चापि, क्विपि चाति यथाक्रमम् ॥
शब्दावेतौ निपात्येते, न्यग्रोधो भाति वीरुधा ॥१२१॥

॥ इति प्रथमः पादः ॥

वियः प्रजने ॥४॥२॥१३॥

गर्भाधानार्थकस्य स्या–द्वियो णावा द्विभाषया ॥
प्रवापयेन् पुरो वातः, प्रायशो गाः प्रवाययेत् ॥१३॥

रुहः पः ॥४॥२॥१४॥

रुहः स्याद् णौ परे पो वा, रसालं रोपयेत् पथि ॥
वटं वा रोहयेद् कामं, नैव कण्टकिनं कुटम् ॥१४॥

लियो नोऽन्तः स्नेहद्रवे ॥४॥२॥१५॥

लियः स्नेहद्रवे गम्ये, णौ नोऽन्तो वा भवेद् घृतम् ॥
विलीनयति तापेन विलाययति माक्षिकम् ॥१५॥

वो विधूनने जः ॥४॥२॥१९॥

वाधातोः सभवेज्जोऽन्तो, णावर्थे हि विधूनने ।
प्रवाजयति पुष्पाणि, केशानावाजयत्यसौ ॥१९॥

पा--शा- छा--सा--वे--व्या--ह्वो य ॥४॥२॥२०॥

मतानामपि धातूना,-मेषां योऽन्तो हि णौ परे ॥
वत्सं पाययति क्षीर-मृगं शाययतीश्वरम् ॥२०॥

अर्ति--री--व्ली--ह्री-क्नूयि-क्ष्माय्यातां पुः ॥४॥२॥२१॥

एषामादन्तधातूनां, पुरन्तो णौ परे भवेत् ॥
अर्पयेद्रेपयेद् व्लेप-यति ह्रेपयत्यमुम् ॥२१॥

स्फायः स्फाव् ॥४॥२॥२२॥

स्फायतेर्णौ परे स्फाव् स्या-दन्तादेश इतो नहि ॥
स्फावयन्ति सदा धर्मं, निघ्नन्तो मुनीश्वराः ॥२२॥

शदिरगतौ शात् ॥४॥२॥२३॥

शीयतेरगत्यर्थे, णौ परे शात् प्रजायते ॥
शातयेत् पतनं पुष्पं, गोपालो गाः शादयेत् ॥२३॥

घटादेर्ह्रस्वो दीर्घस्तु वा ञिणम्परे ॥४॥२॥२४॥

णौ परे स्याद् घटादीनां, ह्रस्वो ञिणम्परे तु वा ॥
दीर्घो वा स्यात्तथैव, घाटं घाटं घटं घटम् ॥२४॥

क्गे--वनू--जनै--जॄष्--क्नस्--रञ्जः ॥४॥२॥२५॥

षण्णामेषां भवेद् ह्रस्वो, णौ परे णौ ञिणम्परे ॥
दीर्घो वाऽजनि चाजानि, जानं जानं जनं जनम् ॥२५॥

अमोऽकम्यमिचमः ॥४॥२॥२६॥

कम्यमिचमिवर्जस्या–मन्तस्य णौ परे भवेत् ॥
ह्रस्वो ञिणम्परे णौ वा, दीर्घश्चारम्यरामि नैः ॥२६॥

पर्यपात् स्खदः ॥४॥२॥२७॥

पर्यपाभ्या परस्यैव, स्खदेर्णौ ह्रस्वता भवेत् ॥
ञिणम्परे तु वा दीर्घोऽपस्खदयत्यपास्खदि ॥२७॥

शमोऽदर्शने ॥४॥२॥२८॥

शमेरदर्शनेऽर्थे णौ, परे ह्रस्वो ञिणम्परे ॥
वा दीर्घः शमयेद्रोगं, घृतं वा भ्रमणं मधौ ॥२८॥

यमोऽपरिवेषणे णिचि च ॥४॥२॥२९॥

णिच्यणिचि च णौ ह्रस्वो, यमेरपरिवेषणे ॥
ञिणम्परे तु णौ दीर्घो, वा स्यादयमयामि च ॥२९॥

मारणतोषणनिशाने ज्ञश्च ॥४॥२॥३०॥

एतेष्वर्थेषु जानाते–र्णिच्यणिचि च णौ भवेत् ॥

एव जनयति, क्गादीनामप्यरनेर ॥२५॥ कमादिवर्जनात्, कामयते, नरामि, राम रामम्नित्यादि ॥२६॥ एवमपास्खादि, अपास्खादमपास्खादम्, अपस्खादमपस्खादम् । परिस्खनोऽप्येवमेव । पर्यपादितिकिम् ? प्रस्खादयति ॥२७॥ व्यशमि, अशामि, शामं शामम्, शमंशमम् । अदर्शन इति निशामयति रूपम् ॥२८॥ अपरिवेषण इति यामयत्यतिथिम् ॥२९॥ स्पष्टम ॥३०॥

ह्रस्वो ञिणम्परे दीर्घो, ना विकल्पयतीत्यम् ॥३०॥

चहण शाठ्ये ॥४।२।३१॥

चौरादिकचहेर्धातोः, शाठ्येऽर्थे णिचि णौ परे ॥
ह्रस्वो ञिणम्परे वा स्या-द्दीर्घश्चहयति द्विषः ॥३१॥

ज्वल-ह्वल-ह्मल-ग्ला-स्ना-वनू-वम-नमोऽनु

पसर्गस्य वा ॥४।२।३२॥

एषामनुपसर्गाणां, ह्रस्व [illegible] णौ परे नरा ॥
नमयेन्नामयेद् [illegible] आत्मान न पर जनम् ॥३२॥

छदेर्णेस्मन्त्रट्क्वौ ॥४।२।३३॥

छदणो जायते ह्रस्व, इस-मन-त्रट्-क्विपरे नन ॥
[illegible] छद्मी, [illegible] ॥३३॥

एकोपसर्गस्य च घे ॥४।२।३४॥

छदेरेकोप सर्गस्या-नुपसर्गस्य ह्रस्वता ॥
घे णौ परि [illegible] सम-[illegible] ॥३४॥

उपान्त्यस्यासमानलोपिशास्वृदितो ङे ॥४।२।३५॥

समानलोपिशास्वृद्-[illegible] ॥

भ्राज-भास-भाष-दीप-पीड-जीव-मील-कण-रण-वण-भण-श्रण-ह्वे-हेठ-लुट-लुप-लपां नवा ॥४॥२॥३६॥

एषां सप्तदशाना स्या-दुपान्त्यस्य विभाषया ॥
ह्रस्वो णौ डपरे जीव-मजिजीवदजीजिवत् ॥३६॥

ऋद्वर्णस्य ॥४॥२॥३७॥

धातोर्भवेदुपान्त्यस्य, ऋतो णौ डपरे नवा ॥
ऋकारोऽवीवृतद् धर्म-मववर्तज्जिना भुवि ॥६७॥

जिघ्रतेरिः ॥४॥२॥३८॥

स्याज्जिघ्रतेरुपान्त्यस्य, डपरे णौ विभाषया ॥
इकारोऽजिघ्रिपत् कान्ता, कान्तेनाजिघ्रपत् सुमम् ॥३८॥

तिष्ठतेः ॥४॥२॥३९॥

इस्तिष्ठतेरुपान्त्यस्य, डपरे णावनिश्चितम् ॥
पृथग्योगो हि नित्यार्थ-स्तिवृनिर्देशादतिष्ठपत् ॥३९॥

ऊद् दुषो णौ ॥४॥२॥४०॥

ऊत् स्याद् दुषेरुपान्त्यस्य, णौ परे सूत्रसूत्रितः ॥

एतन्निभ्रजत्, अबभ्राजदित्यादि ॥३६॥ वचनसामर्थ्याद्दुर्कीर्त्यादशो न न । उपान्त्यस्येत्येव अचीकरत् ॥३७॥ तिवृनिर्देशाद् यङ्लुपनिवृत्ति-र्न, अमात्रत् । तिष्ठ शपाऽनुबन्धेन, निर्दिष्ट यद् गणेन च ॥ यत्रैकाज्-ग्रहणं तेन, पञ्चैतानि न यङ्लुपि ॥३८॥ स्थम् ॥३९॥ णाविति किम् ?

दुष्यन्त यः प्रयुङ्क्तेऽसौ, तं दूषयति मनसा ॥४०॥

चित्ते वा ॥४॥२॥४१॥

उपान्त्यस्य दुषेश्चित्त-कर्तृकस्य विभाषया ॥
ऊद् भवेण्णौ मनो दूष-यति दोषयति स्मरः ॥४१॥

गोहः स्वरे ॥४॥२॥४२॥

गुहः कृतगुणस्य स्या-दूदुपान्त्यस्य प्रत्यये ॥
मर्यादां स्वर्णं साधो-र्निगूहति निगूहकः ॥४२॥

भुवो वः परोक्षाद्यतन्योः ॥४॥२॥४३॥

अद्यतन्याः परोक्षाया वकारान्तो भुवो भवेत् ॥
ऊदुपान्त्यस्य भूपोऽभूद बभूवार्यो दिवाकर ॥४३॥

गम-हन-जन-खन-घस स्वरेऽनङि क्ङिति लुक्
॥४॥२॥४४॥

गमादीनामुपान्त्यस्य, स्वरादावनङि क्ङिति ॥
लुग् जग्मुर्जघ्नतुर्जज्ञे, जज्ञाते जक्षिरेऽगमन ॥४४॥

नो व्यञ्जनस्यानुदितः ॥४॥२॥४५॥

[illegible]-नुदितो नस्य लुक् क्ङिति ॥
[illegible] , [illegible] ॥

अञ्चोऽनर्चायाम् ॥४।२।४६॥

अनर्चायां स्थितस्याञ्चा-र्लुगुपान्त्यस्य नो भवेत् ॥
उदक्तमुदकं कूपा-दञ्चिता गुरवो जनैः ॥४६॥

लङ्गिकम्प्योरुपतापाङ्गविकृत्योः ॥४।२।४७॥

लङ्गिकम्प्योरुपान्त्यस्यो-पतापाङ्गविकारयोः ॥
नस्य क्ङिति क्रमाल्लुक् स्याद्, विलगितो विलङ्गितः ॥४७॥

भञ्जेर्ञौ वा ॥४।२।४८॥

भञ्जेरुपान्त्यनस्य स्याद्, ञौ परे लुग् विभाषया ॥
अभञ्ज्यभाजि वीरेण, मोहस्य कटक महत् ॥४८॥

दंश-सञ्जः शवि ॥४।२।४९॥

दंश-सञ्जोरुपान्त्यस्य, नस्य लुक् शवि प्रत्यये ॥
दशति सजतीत्येवं, ब्रूयाल्लक्षणलक्षितम् ॥४९॥

अकट्घिनोश्च रञ्जेः ॥४।२।५०॥

रञ्जेरकटि चोपान्त्य-नो लुग् घिनणि शवपरे ॥
रजति रजको रागी, साधयेल्लक्षणादतः ॥५०॥

णौ मृगरमणे ॥४।२।५१॥

मृगाणां रमणे नो लुग्, णावुपान्त्यस्य रञ्जतेः ॥
रजयति मृगं व्याधो, रञ्जयेद्रजकोऽम्बरम् ॥५१॥

लङ्ग् ॥४०॥ [illegible] । [illegible], विकम्पितश्च प्रत्युदाह-[illegible] ॥४७॥ [illegible] व्यकार्षम् ॥४८॥४९॥५०॥५१॥५२॥

वामः ॥४॥२॥५७॥

यम्यादिमान्तधातूनां, यपि वा लुग् भवेत्ततः ॥
प्रणत्य च प्रगम्याईं, प्रारभ्यते सदाऽऽर्हतैः ॥५७॥

गमां क्वौ ॥४॥२॥५८॥

यथादर्शनमेतेषां गमादीना भवेत् क्विडति ॥
गौ लुक् ततो जनङ्गच, परीतच्च सुमन् सुवत् ॥५८॥

न तिकि दीर्घश्च ॥४॥२॥५९॥

भवेता नव लुग्-दीर्घा-वेतेषा तिकि प्रत्यये ॥
यन्ती रन्तिस्तथा नन्ति-र्गन्तिर्हन्तिश्च साध्यताम् ॥५९॥

आः खनि-सनि-जनः ॥४॥२॥६०॥

खनादाना भवेदात्वं, धुडादौ क्डिति प्रत्यये ॥
खातः सातश्च जातश्च, जातिः खानिश्च खातवान् ॥६०॥

सनि ॥४॥२॥६१॥

आत्वमेषा खनादीना, धुडादौ सनि जायते ॥
सिषासति सिषासेच्च सिसनिषति वुध्यताम् ॥६१॥

एा प्रयन्त, प्रयन्यत्यादि ॥५७॥ सङ्गम् ॥५८॥ एव मन्ति., ... , र्हन्तिरित्यादि ॥५९॥ क्डितीति चखन्ति । धुटीत्येव जनित्वा ॥६०॥ 'उ'जिगति धुटीत्यस्य फलम् ॥६१॥

ह्नश्च ह्नवान् ह्नत्ति-रित्यादि सूत्रसम्मतम् ॥६७॥

ऋ-ल्वादेरेषां तो नोऽप्रः ॥४॥२॥६८॥

ऋदन्ताल्ल्वादितस्तो नः, पूर्वजात् क्तेः क्तयोर्भवेत् ॥
लूनिश्च लूनवान् लून-स्तीर्णिस्तीर्णश्च तीर्णवान् ॥६८॥

रदादमूर्च्छमदः क्तयोर्दस्य च ॥४॥२॥६९॥

धातू मूर्च्छिमदी त्यक्त्वा, रान्ताद् दान्तात् क्तयोर्भवेत् ॥
ता नो धातोश्च दो नत्वं, घटः पूर्णश्च पूर्णवान् ॥६९॥

सूयत्याद्योदित ॥४॥२॥७०॥

सूयत्यादिनवभ्यः स्या-दोदिद्भ्यश्च परं क्तयोः ॥
तस्य नः स्नवान् स्नो, दूनवान् दून इत्यपि ॥७०॥

व्यञ्जनान्तस्थाऽऽतोऽख्याध्यः ॥४॥२॥७१॥

ख्याध्यावर्जस्य धातोर्यद्, व्यञ्जनं तत्परा भवेत् ॥
याऽन्तस्था तत आस्तस्मात्, क्तयोस्तो नो निद्राणवान् ॥७१॥

पू-दिव्यञ्चेर्नाशाद्यूतानपादाने ॥४॥२॥७२॥

नाशेऽद्यूतेऽनपादाने, पूदिव्यञ्चा क्रमात् क्तयोः ॥

क्षै-शुषि-पचो म-क-वम् ॥४॥२॥७८॥

स्युः क्षै-शुषि-पचिभ्यस्तु, क्तयोस्तस्य यथाक्रमम् ॥
म-क-वा नित्यमादेशा , क्षामः शुष्कश्च पक्ववान् ॥७८॥

निर्वाणमवाते ॥४॥२॥७९॥

स्यान्निर्पूर्वकवाधातो-रवाते कर्तरि ध्रुवम् ॥
क्तयोर्नस्तस्य निर्वाणोऽ-सौ निर्वातः समीरणः ॥७९॥

अनुपसर्गाः क्षीबोल्लाघकृशपरिकृशफुल्लोत्फुल्ल-
संफुल्लाः ॥४॥२॥८०॥

क्तान्ता एते निपात्यन्तेऽ-नुपसर्गाः कृशस्तथा ॥
उल्लाघोत्फुल्लसंफुल्लाः, फुल्लाः क्षीबः स्वकर्मणा ॥८०॥

भित्तं शकलम् ॥४॥२॥८१॥

शकलेऽर्थे भिदे क्तस्य, नत्वाभावो निपात्यते ॥
भित्तं शकलमित्यर्थे, भिन्नं भित्त्वा तदन्यथा ॥८१॥

वित्तं धनप्रतीतम् ॥४॥२॥८२॥

धनप्रतीतयोर्विन्दे-र्नत्वाभावो निपात्यते ॥
वित्तं धनं प्रतीतश्च, वित्तो विन्नं तदन्यथा ॥८२॥

हु-धुटो हेर्धिः ॥४॥२॥८३॥

हेर्धुडन्ताश्च हेर्धिः स्यात् , प्रज्वलिते तपोऽनले ॥
कामं जुहुधि क्रमेधः, शिवं विद्धि भवं त्यज ॥८३॥

शासस्हनः शाध्येधिजहि ॥४॥२॥८४॥

ह्यन्तशासस्हना ज्ञेयाः, शाध्येधिजहयः क्रमात् ॥
एधि समाधिमन् धीमन् ?, मनः शाधि जहि क्रुधम् ॥८४॥

अतः प्रत्ययाल्लुक् ॥४॥२॥८५॥

अदन्त प्रत्ययो धातोस्ततः परस्य हेश्च लुक ॥
'गच्छ तिष्ठ' धनी वक्ति, 'देहिदेही'ति किङ्करः ॥८५॥

असंयोगादोः ॥४॥२॥८६॥

असंयोगादुदन्तात् स्तात्, प्रत्ययाद् हे लुगाप्नुहि ॥
सद्धर्मं चिनु कल्याणं, क्रीणीहि पदमुत्तमम् ॥८६॥

वम्यविति वा ॥४॥२॥८७॥

असंयोगादुकारो यः, प्रत्ययस्तस्य लुग् नवा ॥
वम्यविति वयं नन्न - स्तनुमो वा सतो गुणान् ॥८७॥

कृगो यि च ॥४॥२॥८८॥

करोतेः स्यादुकारस्य, लुग् यादौ वमि चाविति ॥
कुर्युः कुर्वः सदा कुर्मः श्रेयसे हितमात्मनः ॥८८॥

अत शित्युत् ॥४॥२॥८९॥

शित्यविति य उस्तस्य, निमित्तस्य कृगोऽत उः ॥
कल्याणं कुरु कर्तव्यं, करोति हितमेव मन ॥८९॥

ह्यन्तति-हिप्रत्ययान्तानामिति ॥८४॥ प्रत्ययादिति किम ? पाहि ॥८५॥ चिनु इति उदाहरणम्, आप्नुहि, क्रीणीहि तनामि । अमरत्वादित्येव तक्ष्णुव ॥८७॥ सूत्रद्वय स्पष्टम् ॥८८॥८९॥

श्वाऽस्त्योर्लुक् ॥४।२।९०॥

अस्तेश्च श्नस्य लुक् कामं, शित्यविति भवेदतः ॥
आस्नां स तद्भिनेयौ स्न-स्तयो रुन्धश्च तौ भवम् ॥९०॥

वा द्विषाऽऽतोऽनः पुस् ॥४।२।९१॥

आदन्ताच्च द्विषोऽनः पुस्, विकल्पेन शितोऽवितः ॥
अद्विपुरद्विषन् धर्मं, ते दुर्गतिमयान् अयुः ॥९१॥

सिज्विदोऽभुवः ॥४।२।९२॥

सिचोऽभुवः परात् धातो-र्विदश्चानः पुसामतः
अविदुः शमकापुंश्च, सन्तोऽभूवन् भवेऽभवा ॥९२॥

द्व्युक्तजक्षपञ्चतः ॥४।२।९३॥

जक्षपञ्चकतोऽनः पुस्, स्याद् द्व्युक्तान्च शितोऽवितः ॥
अजुहवुरजक्षुः स्या-ददरिद्रुरजागरुः ॥९३॥

अन्तो नो लुक् ॥४।२।९४॥

नो लुक् शितोऽवितोऽन्तः स्याद्, द्व्युक्तान्च जक्षपञ्चकात् ॥
दरिद्रति दरिद्रत्, जुह्वज्जुह्वति जक्षति ॥९४॥

शौ वा ॥४।२।९५॥

लुग् वा शिविषयेऽन्तो नः, स्याद् द्व्युक्तजक्षपञ्चकात् ॥

दरिद्रति दरिद्रन्ति, ददन्ति दधतीत्यपि ॥९५॥

अश्नातः ॥४॥२॥९६॥

लुग् भवेत् शित्यवित्यातः, श्नो द्व्युक्तजक्षपञ्चतः ॥
भवन्तो मीमता सत्य, यशः क्रीणन्तु सत्कृतेः ॥९६॥

एषामीर्व्यञ्जनेऽदः ॥४॥२॥९७॥

श्नाद्व्युक्तजक्षपञ्चाना-मात ईर्व्यञ्जनादिके ॥
शित्यविति न दासंज्ञ-हस्य मिमीतयादयः ॥९७॥

इर्दरिद्रः ॥४॥२॥९८॥

आत इर्व्यञ्जनादौ स्याद्, दरिद्रोऽविति वै शिति ॥
दरिद्रितो दरिद्रौ हि, नादरिद्रा दरिद्रति ॥९८॥

भियो नवा ॥४॥२॥९९॥

जायते व्यञ्जनादावि:, शित्यविति भियो नवा ॥
बिभीतो बिभितो भीरू, पापाद् बिभ्यति सज्जनाः ॥९९॥

हाकः ॥४॥२॥१००॥

अविच्छिद्व्यञ्जनादौ स्या-ज्जहातेरात इर्नवा ॥
जहीतो जहितो युद्धे, शस्त्राणि पारमार्थिकौ ॥१००॥

आ च हौ ॥४॥२॥१०१॥

जहातेर्हौ भवेदात-मित्वञ्च वा जहीहि भोः ॥

एव दरिद्रति । अवितीत्यत्र अजहाम, अक्रीणाम् ॥९६॥ त्व
लुनीत । व्यञ्जन इति किम् ? मिमत । अद इति किम् ? दत्त, धत्त
॥९७॥ सूत्रत्रय स्पष्टम् ॥९८॥९९॥१००॥

जहाहि जहिहि क्रोधं, कल्याणं यदि काङ्क्षसि ॥१०१॥

यि लुक् ॥४॥२॥१०२॥

हाक आलुग् भवेद् यादौ, प्रत्यये शिति सर्वदा ॥
जहृयाद् मोहमहाजालं, भवचक्राग्रकारणम् ॥१०२॥

ओतः श्ये ॥४॥२॥१०३॥

धातोरोतो भवेद् लुक् श्ये, तमोऽवस्यति भास्करः ॥
जिना रागमवस्यन्ति, गोपो गवन्ति गोव्रजे ॥१०३॥

जा ज्ञा-जनोऽत्यादौ ॥४॥२॥१०४॥

ज्ञाजनोः शिति जाऽऽदेश-स्तिवादौ नत्वनन्तरे ।
आत्मतत्त्वं स जानाति, जायते यो महामुनि ॥१०४॥

प्वादेर्ह्रस्वः ॥४॥२॥१०५॥

प्वादेर्ह्रस्वो भवेत्त्यादि-वर्जिते शिति प्रत्यये ॥
पुनाति भुवनं विश्वं, लुनीते कल्मषं मुनिः ॥१०५॥

गमिषद्यमश्छः ॥४॥२॥१०६॥

अत्यादौ शिति छादेशो, जायते गमिषद्यमाम् ॥
आयच्छते च जन्तुनि, गच्छतीच्छति यच्छति ॥१०६॥

वेगेसर्त्तेर्धाव् ॥४॥२॥१०७॥

वेगे गम्ये भवेत् सर्त्ते–रत्यादौ शिति धाविति ॥
वाजिधावन्ति वेगेन, धर्ममनुसरेत्तथा ॥१०७॥

श्रौति-कृवु-धिवु-पा-घ्रा–ध्मा-स्था-म्ना-दाम्-दृश्यर्ति-शद-सदः शृ-कृ-धि-पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-र्च्छ-शीय-सीदम् ॥४॥२॥१०८॥

एषां त्रयोदशानां स्युः शित्यत्यादौ हि श्रादयः
शृणु कृणु च यच्छर्च्छ, पश्य तिष्ठ च शीयते ॥१०८॥

क्रमो दीर्घः परस्मै ॥४॥२॥१०९॥

शित्यत्यादौ क्रमेर्दीर्घः, परस्मैपदहेतुके ॥
क्राम क्राम्यति विक्रान्तः, रविराक्रमते दिवि ॥१०९॥

ष्ठिवू–क्लम्वाऽऽचमः ॥४॥२॥११०॥

ष्ठिवूक्लम्याचमां दीर्घः, शित्यत्यादौ परे भवेत् ॥
ष्ठीव क्लाम तथाचाम, चमेत्यादि प्रमाष्यताम् ॥११०॥

शमसप्तकस्य श्ये ॥४॥२॥१११॥

श्ये सप्तानां शमादीनां दीर्घो लक्षणलक्षितः ॥
शाम्य दाम्य तथा ताम्य, श्राम्य भ्राम्य तथा भ्रमेत् ॥१११॥

धर्ममित्यादि वेगाभावोदाहरणम् ॥१०७॥ एत आदेशा क्रमशो बोध्या । एव धिनु, पिब, जिघ्र, धम, मन, सीद ॥१०८॥ क्रामे ॥१०९॥ ॥११०॥ एव क्षाम्य, माद्य ॥१११॥

ष्ठिवु-सिवोऽनटि वा ॥४॥२॥११२॥

ष्ठिव्-सिवोर्वा भवेद् दीर्घो-ऽनट्प्रत्ययपरे ततः ॥
सीवनं सेवनं निष्ठी-वनं निष्ठेवनं तथा ॥११२॥

मव्यस्याः ॥४॥२॥११३॥

धातोर्मादौ च वादौ चा-त आ दीर्घो भवेत्ततः ॥
पचामि च पचावश्च, पचामो भवितव्यताम् ॥११३॥

अनतोऽन्तोऽदात्मने ॥४॥२॥११४॥

स्यादात्मनेपदस्यस्याऽ-न्तोऽदनतः परस्य वै ॥
चिन्वन्ति चिन्वते धर्मं, धार्मिका ननु सम्पदम् ॥११४॥

शीङो रत् ॥४॥२॥११५॥

अन्तः शीङः परस्थस्य, रद् भवेदात्मनेपदे ॥
आत्मनि शेरते मूढाः, योगिनस्तत्र जाग्रति ॥११५॥

वेत्तेर्नवा ॥४॥२॥११६॥

अन्तो वेत्तेः परस्थस्य, वा स्याद् रदात्मनेपदे ॥
संविद्रते गुणान् विज्ञाः, सविदतेऽगुणानपि ॥११६॥

तिवां णव परस्मै ॥४॥२॥११७॥

स्युः परस्मैपदानां वा, तिवादीनां णवादयः ॥
वेत्तिः परं यथामद्य, शं वेद विदन्तुर्विदुः ॥११७॥

स्पष्ट ॥११२॥११३॥ अनत इति किम्? पचन्ति ॥११४॥ स्पष्टे ॥११५॥११६॥ एते वेत्ति, विदतु, विद, वेद, विद्व, विद्म, पक्षे रूप वदि ॥११७॥

ब्रूगः पञ्चानां पञ्चाहश्च ॥४॥२॥११८॥

ब्रूगस्तिवादिपञ्चाना, क्रमात् पञ्च णवादयः ॥
वाऽहश्च ब्रूग आदेशः, साधुराह हितं वचः ॥११८॥

आशिषि तुह्योस्तातङ् ॥४॥२॥११९॥

आशिष्यर्थे भवेत्तुह्योः, स्थाने तातङ् विभाषया ॥
त्वं जीव जीवतात् कामं, भवान् जीवतु जीवतात् ॥११९॥

आतो णव औः ॥४॥२॥१२०॥

आतः परं णव स्थाने, औरादेशः प्रजायते ॥
ज्ञानामृतं पपौ तस्थौ, कानने विजने मुनिः ॥१२०॥

आतामातेआथामाथे आदि ॥४॥२॥१२१॥

आत्परेषा भवेदेषा—मात इँर्हमलक्षणे ॥
पचेता च पचेते च, पचेथामिति जायते ॥१२१॥

यः सप्तम्या ॥४॥२॥१२२॥

स्यादात्परस्य सप्तम्या, याशब्दस्येः पचेत पचेः ॥
पठेत् पठे-र्वसेद् यद्वा, वसेः कामं चरेच्चरेः ॥१२२॥

याम्युसोरियमियुसौ ॥४॥२॥१२३॥

स्यातामात्परयोर्याम् यु—सोरियमियुसौ क्रमात् ॥
पठेयमहमध्यात्मं, पठेयुस्तेऽपि तत्तथा ॥१२३॥

॥ इति द्वितीयः पादः समाप्तः ॥

एवम् आहतु, आहु, आत्थ, आहथु, पक्षे ब्रवीतीत्यादि ॥११८॥
आशिषीति किम् ? जीवतु ॥११९॥ स्वहम ॥१२०॥ एवं पचेते । ॥इति
किम् ? निमानाम् ॥१२१॥ स्पष्ट ॥१२३॥१२२ ॥
द्वितीय पाद समाप्त ॥

अथ तृतीयः पादः ॥

नामिनो गुणोऽक्ङिति ॥४।३।१॥

नाम्यन्तस्य भवेद् धातोः, प्रत्यये क्ङितिवर्जिते ॥
आमन्नो गुण आश्चर्यं, चेता नेनापि जायते ॥१॥

उश्नोः ॥४।३।२॥

अङिति जायते धातो-रुश्नोः प्रत्यययोर्गुणः ॥
नरः सुनोति सत् पद्यं, वातस्तनोति सौरभम् ॥२॥

पुस्-पौ ॥४।३।३॥

पुसि पौ च परे धातो-र्नाम्यन्तस्य गुणो भवेत् ॥
राजानोऽबिभरुः पृथ्वी-मर्पयन्त्यधुनापि शम् ॥३॥

लघोरुपान्त्यस्य ॥४।३।४॥

धातोर्लघोरुपान्त्यस्य, नामिनः स्याद् गुणोऽक्ङिति ॥
भेत्ता भिनत्ति पूर्द्वारं, विजयं य समीहते ॥४॥

मिदः श्ये ॥४।३।५॥

उपान्त्यस्य मिदेर्धातोः, श्ये परे जायते गुणः ॥
मेद्यति बुद्धिमान् युक्त्याऽत्रपि स्वार्थसाधने ॥५॥

जागुः किति ॥४।३।६॥

प्रत्यये किति जागर्तेः सर्वदा जायते गुणः ॥
लोका जागरिता लोके, साधुभिर्ज्ञानदानतः ॥६॥

---

१ ङितीति किम् ? सुत ॥१॥ मूलवद् स्पष्टम् ॥२।३।४।५।६।७॥

ऋवर्ण–दृशोऽङि ॥४॥३॥७॥

स्याद् ऋवर्णान्तधातूना, दृशेश्चाङि परे गुणः ॥
अदर्शदजरच्चारद्, असरदतरत्तथा ॥७॥

स्कृच्छृतोऽकि परोक्षायाम् ॥४॥३॥८॥

स्कृच्छोर्ऋदन्तधातूना, परोक्षाया गुणो भवेत् ॥
नामिनः क्सुकानोर्न, तेरुः संचस्करुस्तथा ॥८॥

संयोगादृदर्तेः ॥४॥३॥९॥

संयोगाद् ऋत् तदन्तस्या–र्तेश्च गुणो भवेदकि ॥
परोक्षाया स्वमर्यादा, सज्जना न विसस्वरुः ॥९॥

क्ययङाशीर्ये ॥४॥३॥१०॥

संयोगाद् ऋत् तदन्तस्या–र्तेश्च क्ये यङि प्रत्यये ॥
आशीर्ये च गुणः स्यात्तत्, स्मर्यते स्वर्यतेऽर्यते ॥१०॥

न वृद्धिश्चाविति क्ङिल्लोपे ॥४॥३॥११॥

अविति प्रत्यये लोपः, क्तो ङितश्च तत्परे ॥
गुणो वृद्धिश्च नैव स्यात्, चेक्यस्तथा परीमृजः ॥११॥

भवतेः सिज्लुपि ॥४॥३॥१२॥

गुणः स्यान्नैव भूधातोः, सिज्लुपि प्राग्तनूर्जकः ॥
गजगजेथगे रामोऽ–भन्दत [illegible] मचिन्द च ॥१२॥

[illegible] । [illegible] [illegible] ॥८॥ [illegible], [illegible] । संयोगादिति–चकु ॥९॥ [illegible] ॥१०॥ [illegible] ॥११॥१२॥१३॥

सूतेः पञ्चम्याम् ॥४॥३॥१३॥

पञ्चम्या जायते नैव, सूतेर्गुणः कदाचन ॥
सुवै सुवावहै सोष–वाणि सुवामहै तथा ॥१३॥

द्व्युक्तोपान्त्यस्य शिति स्वरे ॥४॥३॥१४॥

कृतद्वित्वस्य धातोः स्या–दुपान्त्यस्य नु नामिनः ॥
गुणः शिति स्वरादौ न, नेनिजानि निजं मनः ॥१४॥

ह्विणोरप्विति व्यौ ॥४॥३॥१५॥

स्वरादौ नामिनः स्याता, व्यौ क्रमाद् होरिणः शिति ॥
अपिति चाविति ज्ञाना–दयानि यन्तु जुह्वनि ॥१५॥

इको वा ॥४॥३॥१६॥

स्यादिक् स्मरण इत्यस्य, वा स्वरादावविच्छिति ॥
यकारो ऽधियन्त्येता–धीयन्ति पण्डिता हितम् ॥१६॥

कुटादेर्ङिद्वदञ्णित् ॥४॥३॥१७

ञ्णिद्वर्जप्रत्ययो ङिद्वत्, कुटादेः परतो भवेत् ॥
कुटिता कुटितु कर्म, सर्वदा जायते जिनः ॥१७॥

विजेरिट् ॥४॥३॥१८॥

विजेरिट् सम्भवेद् ङिद्व–च्चतुर्थाध्यायसूत्रतः ॥
उद्विजिता जनो नैव, स्वार्थं साधयितुं क्षमः ॥१८॥

[illegible]स्वरेति किम् ? जुहवानि । शितीति किम् ? निनेज ॥१४॥ अपितीति किम् ? अजुहवु ॥१५॥ स्मृष्टम् ॥१६॥ एव गुता इत्यादि । [illegible] उत्कुटक, ॥१७॥ इडिति किम् ? उद्विजनम् ॥१८॥

वोर्णोः ॥४॥३॥१९॥

ऊर्णोरिड्वा भवेद् ङिद्वत्, प्रोर्णविनाऽपरे दले ॥
प्रोर्णुविता सुहृद्दोपं, विरलो भुवि मानवः ॥१९॥

शिदवित् ॥४॥३॥२०॥

धातोः शित्प्रत्ययो ङिद्वद्, चिद्वर्जो जायते ततः ॥
इतो चित्तः सुतोऽधीते संविदानो विद्न् ह्नः ॥२०॥

इन्ध्यसंयोगात् परोक्षा किद्वत् ॥४॥३॥२१॥

असंयोगान्ततश्चेन्धे', परोक्षा विद्विवर्जिता ॥
किद्वद् भवेत् समीधाते, ऊचतुश्च जजागरुः ॥ २१ ॥

स्वञ्जेर्नवा ॥४॥३॥२२॥

स्वञ्जः परा परोक्षा वा, भवेत् किद्वच्छकुन्तला ॥
प्रियंवदाऽनसूयाभ्या, सस्वञ्जे परिषस्वजे ॥२२॥

जनशो न्युपान्त्ये तादिः क्त्वा ॥४॥३॥२३॥

जान्ताद् धातोर्नशेश्चापि, न्युपान्त्ये क्त्वा तथा भवेत् ।
तादिः किद्वन्नरा रक्त्वा, काम भङ्क्त्वा सुखी भवेत् ॥२३॥

ऋत-तृष-मृष-कृष-वञ्च-लुञ्च-थ-फ सेट् ॥४॥३॥२४॥

न्युपान्त्ये सति चैभ्यः क्त्वा, सेट् किद्वज्जायते ततः ॥
ऋतित्वा स्यात्तथाऽर्तित्वा, तृषि त्वाऽपि विकल्पतः ॥२४॥

स्पष्टम् ॥१९॥ अविदिति [illegible] । [illegible] ॥२०॥ [illegible] गादिति किम्? [illegible] ॥२१॥ स्पष्टम् ॥२२॥ [illegible] ॥२३॥ [illegible] उपान्त्य इति किम्? [illegible] । तादिरिति [illegible] ॥२३॥ [illegible], [illegible] गुफित्वा, गुम्फित्वेत्यादि । न्युपान्त्य इति [illegible], [illegible] । सेडिति वञ्चित्वा ॥२४॥

वौ व्यञ्जनादेः सन् चाय्वः ॥४॥३॥२५॥

स्यातामुदित्युपान्त्ये वा, क्त्वा सन् च व्यञ्जनादितः ॥
सेटौ किद्वन्नतु य्वन्ता,-ल्लिखित्वा पठ शुद्धये ॥२५॥

उति शवर्हाद्भ्यः क्तौ भावारम्भे ॥४॥३॥२६॥

शवर्हाद्भ्यः परौ भावा-रम्भयोः क्तौ विभाषया ॥
उदुपान्त्ये सति स्याता, सेटौ किद्वत् प्रकोचितः ॥२६॥

न डीङ्-शीङ-पूङ्-धृषि-क्ष्विदि-स्विदि मिदः॥४॥३॥२७॥

स्यातामेभ्यः परौ सेटौ, किद्वत् क्तक्तवतू नहि ॥
दिवा शयितवान् नक्तं, शयितो दर्शनावृतेः ॥२७॥

मृषः क्षान्तौ ॥४॥३॥२८॥

क्षमार्थकान् मृषः सेटौ, किद्वत् क्तक्तवतू नवै ॥
मुनिर्मर्षितवान् दोषान्, दुष्टानामप्यनेकशः ॥२८॥

क्त्वा ॥४॥३॥२९॥

धातोः क्त्वा सेड् न किद्वत् स्यात्, देवित्वादि ततो भवेत् ॥
इष्ट्वा कुत्वा च शान्त्वा च, सेडित्यस्य फलं मतम् ॥२९॥

स्कन्द-स्यन्दः ॥४॥३॥३०॥

स्कन्दतः स्यन्दतेश्चापि, क्त्वा किद्वन्न प्रजायते ॥

एव लेखित्वा, लिलिखिषति, लिलेखिषतीत्यादि। वाविति-वर्तित्वा, व्यञ्जनादेरिति-उषित्वा, अय्व इति-दवित्वा ॥२५॥ एव कुचितम, कोचितमनेन, प्रकुचित इत्यादि। उतीति किम् ? श्वितितमनेन। शवर्हाद्भ्य इति किम् ? रुचितमनेन। भावारम्भ इति किम् ? रुचित ॥२६॥ एव उयित, उयितवानिति। सेटावित्येव-डीन, डीनवान् ॥२७॥ एव मर्षित.। क्षान्ताविति-अपमर्षितं वाक्यम् ॥२८॥ स्पष्टे ॥२९॥३०॥

स्कन्त्वा स्यन्त्वा च प्रस्कन्द्य, स्यन्दित्वा सेटि जायते॥३०॥

क्षुध–क्लिश–कुष–गुध–मृड–मृद-वद–वसः ॥४॥३॥३१॥

एभ्योऽष्टाभ्यो नु धातुभ्यः, क्त्वा सेट् किद्वद् भवेत्ततः ॥
ज्ञानी जनः क्षुधित्वाऽपि, प्राप्तुमुत्सहते शिवम् ॥३१॥

रुद–विद–मुष-ग्रह-स्वप-प्रच्छः सन् च ॥४॥३॥३२॥

एभ्यः षड्भ्योऽपि धातुभ्यः, किद्वत् स्यात् क्त्वा च सन् तथा ॥
जिघृक्षति गृहीत्वाऽपि, सुप्त्वाऽपि स सुषुप्सति ॥३२॥

नामिनोऽनिट् ॥४॥३॥३३॥

धातोर्नाम्यन्ततोऽनिट् सन्, किद्वद् भवेच्चिचीषति ॥
तुष्टूषति जनो मोहा–त्तितीर्षति चिकीर्षति ॥३३॥

उपान्त्ये ॥४॥३॥३४॥

धातोर्नामिन्युपान्त्येऽनिट्, सन् किद्वज्जायते ततः ॥
बिभित्सन्ते बुभुत्सन्ते, विवृत्सति यियक्षति ॥३४॥

सिजाशिषावात्मने ॥४॥३॥३५॥

धातोर्नामिन्युपान्त्ये स–त्यनिटावात्मनेपदे ॥
किद्वत् सिजाशिषौ स्याता–मभित्साऽबुद्ध भेत्स्यते ॥३५॥

ऋवर्णात् ॥४॥३॥३६॥

स्याता धातोर्ऋवर्णान्ता–दनिटावात्मनेपदे ॥

एव क्लिशित्वेत्यादि ॥३१॥ स्पष्टम् ॥३२॥ अनिडिति–शिशयिषते ॥३३॥ स्पष्टम् ॥३४॥ एव भित्सीष्ट इत्यादि । आत्मन इति अप्राक्षीत् ॥३५॥ एव कृषीष्टेत्यादि ॥३६॥

किद्वत् सिजाशिषौ धन्योऽ–कृत सर्वं समीहितम् ॥३६॥

गमो वा ॥४॥३॥३७॥

सिजाशिषौ गमेः किद्वद्, वा स्यातामात्मनेपदे ॥
चैत्रः समगत ग्रामा–न्यान् समगंस्त मानवः ॥३७॥

हनः सिच् ॥४॥३॥३८॥

आत्मनेपदसम्बन्धी, सिच् किद्वज्जायते हनः ॥
सुधीराहत शत्रूंस्तान्, रिपूँ हन्ति नाहतः ॥३८॥

यमः सूचने ॥४॥३॥३९॥

यमेः सिच् सूचने किद्वत्, सम्भवेदात्मनेपदे ॥
उदायत महाक्रूरः, शकुनिः पाण्डवानहो ॥३९॥

वा स्वीकृतौ ॥४॥३॥४०॥

स्वीकारार्थाद् यमेर्धातोः, सिच् किद्वदात्मनेपदे ॥
दृष्ट्वाऽरातीन् महास्त्राणि, नोपायंस्त ह्युपायत ॥४०॥

इश्च स्थादः ॥४॥३॥४१॥

स्थश्च दासंज्ञकाच्च स्यात्, सिच् किद्वदात्मनेपदे ॥
स्यान् स्थादेरिश्च तद्योगे, व्यधितोपास्थितादित ॥४१॥

मृजोऽस्य वृद्धिः ॥४॥३॥४२॥

सति मृजेर्गुणे वृद्धि–रकारस्य भवेत्ततः ॥

एवं समगीष्ट, समगंसातेत्यादि ॥३७॥ स्पष्टम् ॥३८॥ सूचन इति किम् ? आयस्त रज्जुम् ॥३९॥ स्वीकृताविति–आयस्त पाणिम् ॥४०॥ स्पष्टम् ॥४१॥ [illegible]न इति किम् ? [illegible] ॥४२॥

मार्ष्टि मार्ष्टा तथा मार्ष्टुं मार्जिता मार्जकः पुनः ॥४२॥

ऋतः स्वरे वा ॥४॥३॥४३॥

ऋकारस्य मृजेर्वृद्धिः, स्वरादौ प्रत्यये नवा ॥
परिमार्जन्ति चेतः स्वं, परिमृजन्ति साधवः ॥४३॥

सिचि परस्मै समानस्याऽङिति ॥४॥३॥४४॥

स्यात् परस्मैपदे वृद्धि', समानान्तस्य नित्यशः ॥
सिच्यङिति परेऽचैषीत्, सद्धर्मं मुनिमण्डली ॥४४॥

व्यञ्जनानामनिटि ॥४॥३॥४५॥

व्यनान्तस्य धातोः स्यात्, परस्मैपदकेऽनिटि ॥
सिचि वृद्धिः समानस्या-शाङ्क्षीदित्यादि साध्यते ॥४५॥

वोर्णुगः सेटि ॥४॥३॥४६॥

ऊर्णोः सेटि भवेद् वृद्धि-र्वा परस्मैपदे सिचि ॥
प्रौर्णावीत् प्रौर्णवीच्चापि, प्रौर्णुवीदपि जायते ॥४६॥

व्यञ्जनादेर्वोपान्त्यस्यातः ॥४॥३॥४७॥

व्यञ्जनादेरुपान्त्यस्या-तः सेटि सिचि प्रत्यये ॥
वा परस्मैपदे वृद्धि-रकाणीदकणीत्तथा ॥४७॥

ऋत इति किम्? ममार्ज। स्वर इति किम्? मृज्व. ।४३॥ परस्मैपदे इति अच्योष्ट। समानस्यति अगरीत्। अङितीति न्यनुवीत् ॥४४॥ समानस्येत्येव-उदवोटाम्। अनिटीति-अतक्षीत् ॥४५॥ स्पष्टम् ॥४६॥ व्यञ्जनादेरिति किम्? मा भवान् अटीत्। उपान्त्यस्यति अरक्षीत्। अत इति अदेवीत्। सेटीत्यव अधाक्षीत् ॥४७॥

वद–व्रज–लः ॥४॥३॥४८॥

सेटि सिचि ह्युपान्त्यस्य, वदव्रजोर्ल–रन्तयो ॥
अस्य वृद्धिः परस्मै स्यात्, प्राव्राजीद्वदतो जनान् ॥४८॥

न श्वि-जागृ-शस-क्षण-ह्म्येदितः ॥४॥३॥४९॥

ह्म्यन्तानामेदितामेषा, श्व्यादीनां सिचि सेटि नो ॥
स्यात् परस्मैपदे वृद्धि–रक्षणीदग्रहीत्तथा ॥४९॥

ञ्णिति ॥४॥३॥५०॥

धातोरत उपान्त्यस्य, वृद्धिर्ञिति णितीष्यते ॥
शास्त्रं सता यथाऽपाठि, तथैवावाचि धीमता ॥५०॥

नामिनोऽकलिहलेः ॥४॥३॥५१॥

नाम्यन्तस्य भवेद् धातो–र्नाम्नो वा ञ्णिति प्रत्यये ॥
वृद्धिः कलिहली त्यक्त्वा, चिकायाकारि कारकः ॥५१॥

जागुर्ञिणवि ॥४॥३॥५२॥

णव्येव ञ्णिति जागर्ते–र्ञौ परे वृद्धिरिष्यते ॥
अजागारि जजागार, जागरः साधु जागरी ॥५२॥

आत ऐः कृञ्ञौ ॥४॥३॥५३॥

आदन्तस्यैभवेद् धातो–र्ञ्णिति कृति च ञौ परे ॥
दायो धायः शतदायी, गोदायो धायको ददौ ॥५३॥

एवम् अगादीत्, अज्वालीत्, अक्षारीदित्यादि ॥४८॥ एवम् अश्वयीत् अजागरीत् अशसीत्, अवमीत्, अहयीत्, अस्यमीत्, इत्यादि ॥४९॥ स्पष्टम् ॥५०॥ कल्हिलिर्जनान्–अचकलत्। अजहलत् ॥५१॥ जिणतीति–जागरयति ॥५२॥ स्पष्टं ॥५३॥

न जनवधः ॥४॥३॥५४॥

वृद्धिर्न जनिवध्योः स्याद्, णौ कृति ञ्णिति प्रत्यये ॥
प्रजनो जनको वध्यो, प्रजन्यो वधकोऽवधि ॥५४॥

मोऽकमि-यमि-रमि-नमि-गमि-वमा-ऽऽचमः ॥४॥३॥५५॥

कम्यादिभिन्नमन्तस्य, ञ्णिति कृत्प्रत्यये परे ॥
णौ च वृद्धिर्भवेन्नैव, शमको दमकोऽशमि ॥५५॥

विश्रमेर्वा ॥४॥३॥५६॥

वा वृद्धिर्विश्रमेर्धातो-र्ञ्णिति कृति च णौ भवेत् ॥
विश्रामो विश्रमो विश्वे, श्रान्ताना दीयते हितम् ॥५६॥

उद्यमोपरमौ ॥४॥३॥५७॥

उद्यमोपरमौ साधू, घञि स्तो वृद्ध्यभावतः ॥
सदुद्यमस्तथा कार्य्यः, स्यात् पापोपरमो यथा ॥५७॥

णिद्वाऽन्त्यो णव् ॥४॥३॥५८॥

परोक्षाया भवेदन्त्यो, णव् णिद्वाऽहं चिचाय यद् ॥
चिचयाहं चुकोटाहं, चुकुटाहं पपाच स ॥५८॥

उत और्विति व्यञ्जनेऽद्वेः ॥४॥३॥५९॥

और्विति व्यञ्जनादौ स्या-दुदन्तस्य विरौति ना ॥
द्व्युक्तस्य नो जुहोतीति, स्यात् सुनोति स्तवानि च ॥५९॥

कम्यादिवर्जनात्, काम, कामुक, अकामि, याम राम, नाम, अगामि, वाम, आचामक इत्यादि ॥५५॥ एव विश्रामक विश्रमक व्यश्रामि, व्यश्रमि इत्यादि ॥५६॥ स्पष्ट ॥५७॥५८॥ विर्वीति किम् दा ॥५९॥

वोर्णोः ॥४॥३॥६०॥

स्यादयुक्तस्य वोर्णोरौ–र्व्यञ्जनादौ विति स्वयम् ॥
सदा प्रोर्णौति प्रोर्णोति, प्रोर्णोर्नोति द्विरुक्तितः ॥६०॥

न दिस्योः ॥४॥३॥६१॥

न दिस्योः परयोरौः स्या–दुर्णोतेर्हैमलक्षणे ॥
ह्यस्तन्याः सिर्ग्रहीतव्यः प्रौर्णोत् प्रौर्णोः प्रमीयताम् ॥६१॥

तृहः श्नादीत् ॥४॥३॥६२॥

तृहः श्नाद् व्यञ्जनादावीत्, प्रत्यये विति जायते ॥
दयस्व सर्वभूतेषु तृणेढु नैव कञ्चन ॥६२॥

ब्रूतः परादिः ॥४॥३॥६३॥

ब्रूतेरूतः परो व्यञ्ज–नादावीद् विति प्रत्यये ॥
स परावयवः साधु–र्ब्रवीति शर्म्मदं वचः ॥६३॥

यङ्–तु–रु–स्तोर्बहुलम् ॥४॥३॥६४॥

यङ्लुबन्तात्तुरुस्तुभ्यो, व्यञ्जनादौ परे विति ॥
ईद् बहुलं परादिः स्याद्, नर्नर्त्ति वोभवीति च ॥६४॥

सः सिजस्तेर्दिस्योः ॥४॥३॥६५॥

सिच्प्रत्ययान्ततो धातो–रस्तेश्च सन्ततो भवेत् ॥
दिस्योः परादिरीन्नित्य–मासीरासीदभूददात् ॥६५॥

सूत्रत्रय स्पष्टम् ॥६०॥६१॥६२॥ ऊत इति किम्? आत्थ ॥६३॥
बहुलमिति क्वाचित्क्वा क्वचिन्न तेन नर्नृतीति, नर्नर्ति, वोभवीति, वोभोति, ववर्त्ति, ववीत इत्यादि। अद्वेरित्येव–तुतोथ, तुष्टोथ ॥६४॥ स्पष्टम् ॥६५॥

पिबैति-दा-भू-स्थः सिचो लुप् परस्मै न चेट् ॥४॥३॥६६॥

एभ्यः परं सिचो लुप् स्यात्, परस्मैपदके परे ॥
लुब्योगे च भवेदिड् नो, दुग्धमपान्नरोऽध्यगात् ॥६६॥

धे-घ्रा-शा-च्छा-सो वा ॥४॥३॥६७॥

एभ्यः परं सिचो वा स्या-ल्लुप् परस्मैपदे परे ॥
लुब्योगे चेड् न वालोऽसौ, पयोऽधासीदधात्तथा ॥६७॥

तन्भ्यो वा त-थासि न्‌णोश्च ॥४॥३॥६८॥

तनादिभ्यः सिचस्ते च थासि लुब् वा भवेत्तथा ॥
तद्योगे न्‌णोश्च लुप् चेड् नो, अतनिष्टाततातथाः ॥६८॥

सनस्तत्राऽऽवा ॥४॥३॥६९॥

लुपि सत्या सनोतेः स्या-दन्त्यस्यात्वं विभाषया ॥
असातासत चासाथा, असथा इति साधयेत् ॥६९॥

धुड्ह्रस्वाल्लुगनिटस्तथोः ॥४॥३॥७०॥

ह्रस्वान्तात् स्याद् धुडन्ताच्च, तादौ थादौ परेऽनिटः ॥
सिचो लुग् स्यादभित्ताथो, अभित्था अकृताकृथाः ॥७०॥

एवम् अगात्, अदात्, अधात्, अभूत्, अस्थादित्यादि । परस्मै इति अपासत पयांसि तै ॥६६॥ एवम् अघ्रात्, अघ्रासीदित्यादि ॥६७॥ विकल्पपक्षे अतनिष्ठा ॥६८॥ तत्रेति किम्? असनिष्ट ॥६९॥ अनिट इति किम्? व्यथातिष्ट ॥७०॥

इट ईति ॥४॥३॥७१॥

सिच इटः परस्य स्या-दीति लुग् नित्यशो भवेत् ॥
अलावीत् संशयं विद्वान्, निश्चयेन प्रमात्मना ॥७१॥

सो धि वा ॥४॥३॥७२॥

धातोर्भवेद् धकारादौ, प्रत्यये सस्य लुग् नवा ॥
चकाधि ज्ञानदीपेना-शाध्व मोक्षपदं लघु ।७२॥

अस्तेः सि हस्त्वेति ॥४॥३॥७३॥

अस्तेः सः प्रत्यये सादौ, लुक् स्यादेति तु सस्य हः ॥
त्वमसि व्यतिसे भाव-यामाहे व्यतिहे तथा ।।७३॥

दुह--दिह--लिह--गुहो दन्त्यात्मने वा सकः ॥४॥३॥७४॥

एभ्यः सक्प्रत्ययस्य स्याद्, दन्त्यादावात्मनेपदे ॥
लुग् नवाऽधुक्षनादुग्धा-दिग्धाधिक्षत रूप्यताम् ॥७४॥

स्वरेऽतः ॥४॥३॥७५॥

सकोऽकारस्य लुक् कार्यः, स्वरादौ प्रत्यये परे ॥
अधुक्षातामधुक्षाथा मधिक्षातामधिक्षत ।७५॥

दरिद्रोऽद्यतन्यां वा ॥४॥३॥७६॥

अद्यतन्या दरिद्राते-र्विषयेऽन्तस्य लुग् नवा ॥

इट इति–अग्रहीत् । ईतीति–अश्रमणिषम् ॥७१॥ विकल्पपक्षे चकाद्धि, अशाध्वम् ॥७२॥ स्तम् ॥७३॥ एवम् अलीढा, अलिक्षथा, न्यगुह्वहि, न्यघुक्षावहि । दन्त्य इति किम्–अधुक्षामहि ॥७४॥ स्पष्टं ॥७५॥७६॥

पापेन सोऽदरिद्रासी–ददरिद्रीत् पुनः पुनः ॥७६॥

अशित्यस्सन्‌-णकज्-णकाऽनटि ॥४॥३॥७७॥

सादिसन्नादिवर्जे लु–गशिति विषये भवेत् ॥
दरिद्रो दुर्दरिद्र ना, दरिद्राति दुरात्मना ॥७७॥

व्यञ्जनाद् देः सश्च दः ॥४॥३॥७८॥

स्याद् धातोर्व्यञ्जनान्ताद् दे–र्लुक् सो दश्च यथायथम् ॥
अचकाद्बिभोऽजागः साधन्वशाद्गात्तथा ॥७८॥

सेः स्‌-द्-धां च रुर्वा ॥४॥३॥७९॥

स्याद् धातोर्व्यञ्जनान्तात् से–र्लुक् सदधा च रुर्नवा ॥
यथायोगमजघास्त्व–मजागस्त्वं त्वमन्वशः ॥७९॥

योऽशिति ॥४॥३॥८०॥

स्याद् धातोर्व्यञ्जनान्ताल्लुग्, यकारस्य परेऽशिति ॥
जङ्गमिता तथा बेभि–द्यते सोसूच्यतेर्थिता ॥८०॥

क्यो वा ॥४॥३॥८१॥

स्याद् धातोर्व्यञ्जनात् क्यस्य, वा लुगशिति प्रत्यये ॥
समिधिष्यति प्रारम्भे, योगी च दृपदिष्यते ॥८१॥

सन्नादिवर्जनात्, दिदरिद्रासति, दरिद्रायका याति, दरिद्रायक, दरिद्राणम् ॥७७॥ स्पष्टम् ॥७८॥ पक्षे अजघात्त्वम, अन्वशात्त्वम् इत्यादि ॥७९॥ व्यञ्जनादित्येव–लालूयिता ॥८०॥ पक्षे समिधिष्यति, दृषदिष्यत ॥८१॥

अतः ॥४॥३॥८२॥

धातोरदन्ततो लुक् स्या-द्विहितेऽशिति प्रत्यये ॥
धातोरतस्ततः स्वीयां, कथां कथयतीश्वरः ॥८२॥

णेरनिटि ॥४॥३॥८३॥

लुग् भवेद् णेरतः स्त्रा-दनिट्यशिति प्रत्यये ॥
आस्त्विदाशिशन्माता, बालकं बाल्यकालकम् ॥८३॥

सेट्क्तयोः ॥४॥३॥८४॥

क्तक्तवत्वोर्भवेत् सेटो-र्णे लुग् गणितवाँस्तथा ॥
कारितवान् नृपः स्वर्ण-चैत्यमष्टापदे महत् ॥८४॥

आमन्ताऽऽल्वाऽऽय्येत्न्वावय् ॥४॥३॥८५॥

सम्भवेण्णेरयादेश, आमादिकेषु पञ्चसु ॥
स्तनयित्नुर्महद्ध्यायः, स्पृहयालुः प्रसाधयेत् ॥८५॥

लघोर्यपि ॥४॥३॥८६॥

लघोः परस्य णेर्ज्ञेयोऽ-यादेशो यपि प्रत्यये ॥
प्रशमय्य रिपुं धीरा, जयन्ति जगतीतले ॥८६॥

वाऽऽप्नोः ॥४॥३॥८७॥

आप्नोतेर्यपि णेः स्याद्वाऽ-यादेशः प्राप्य मङ्गलम् ॥
प्रापय्य मनुजान् सर्व-ज्ञाता मोक्षपदं गतः ॥८७॥

विहितविशेषण किम् ? गत ॥८२॥ अनिटीति किम् ? कारयिता ॥ ८३ ॥ एव कारित इत्यपि ॥८४॥ एव कारयावकार, गण्डयन्त इत्यादि ॥८५॥ लघोरिति किम् ? प्रतिपाद्य ॥८६॥ आप्नोरिति किम् ? अध्याप्य ॥८७॥

मेङो वा मित् ॥४॥३॥८८॥

मेङो यपि भवेद् णिद्वा, शाब्दलक्षणलक्षितः ॥
अपमित्यापमायात्म-सुखं साधयितु चरेत् ॥८८॥

क्षेः क्षीः ॥४॥३॥८९॥

क्षीरादेशो यपि क्षेः स्यात्, सानुबन्धस्य नो भवेत् ॥
निरनुबन्धनिर्देशात्, कर्म प्रक्षीय श शृणु ॥८९॥

क्षय्य-जय्यौ शक्तौ ॥४॥३॥९०॥

क्षि-ज्योरन्तस्य गम्यायां, शक्तावय् ये निपात्यते ॥
व्याधिः क्षय्यो भवेत् शत्रु-र्जय्यः काम स्वशक्तितः ॥९०॥

क्रय्यः क्रयार्थे ॥४॥३॥९१॥

निपात्यते क्रियोऽन्तस्याय्, ये परे चेत् प्रमारितः ॥
क्रयायार्थो घृणो क्रय्यः, क्रेयः शाकटिको नली ॥९१॥

सस्त· सि ॥४॥३॥९२॥

धातोः सन्तस्य सादौ स्या-त्तोऽशिति प्रत्यये परे ॥
वत्स्यति व्यनिवत्सीष्ट, विवत्सति जिघत्सति ॥९२॥

दीय् दीङ· क्ङिति स्वरे ॥४॥३॥९३॥

दीङः क्ङिति स्वरे दीय् स्या-दशिति प्रत्यये परे ॥
तत उपदिदीयाते, उपदेदीयतेऽस्वरे ॥९३॥

स्पष्ट ॥८८॥८९॥ शक्ताविति किम् ? क्षेत्र पापम्, नर जेतव्य ॥९०॥ स्पष्टम् ॥९१॥ स इति किं ? वसिष्ट । अशिति किम् ? वसिषीष्ट ॥९२॥ क्ङितीति किम् ? उपादानम् ॥९३॥

इडेत्--पुसि चातो लुक् ॥४॥३॥९४॥

इट्येति पुसि चातो लु–गादन्तस्य स्वरेऽशिति ॥
ङिडति पपुरद्धुश्चापि, पपिथ व्यतिरेऽदधत् ॥९४॥

संयोगाऽऽदेर्वाऽऽशिष्येः ॥४॥३॥९५॥

आदन्तस्य भवेद् धातोः, संयोगादेर्विभाषया ॥
ङिडत्याशिष्येत्वमन्तस्य, ग्लेयाद् ग्लायादसयमी ॥९५॥

गा--पा -स्था--सा- दा--मा- हाकः ॥४॥३॥९६॥

ङिडत्याशिषि भवेदेत्व–मेषामन्त्यस्य नित्यशः ॥
गेयात् पेयात् सदा स्थेयाद्, देयाद् धेयाद्धितं हितम्॥९६॥

ईर्व्यञ्जनेऽयपि ॥४॥३॥९७॥

गादेः स्याद् व्यञ्जनादावी–र्यब्वर्जे नाशिति ङिडति ॥
गीयते पीयते स्थीय–ते दीयतेऽवसीयते ॥९७॥

घ्रा--ध्मोर्यङि ॥४॥३॥९८॥

घ्राध्मोर्यङि भवेदीत्वं, जेघ्रीयते मधुव्रतः ॥
सुमं देध्मीयते शङ्ख, वासुदेवो रणोद्यतः ॥९८॥

हनो घ्नीर्वधे ॥४॥३॥९९॥

वधार्थस्य भवेद् हन्ते–र्घ्नीरादेशः परे यङि ॥

स्पष्टम् ॥ ९४॥ संयोगादेरिति किम् ? यायात् । ङिडतीत्येव ग्लासीष्ट ॥९५॥ एवम् अवसेयात्, मेयात्, हेयात्, ॥९६॥ एव जेगीयते, धीयते, गीयते, हीन । व्यञ्जन इति किम् ? तस्थु. । अयपीति प्रगाय ॥ ९७ ॥ सूत्रद्वयं स्पष्टम् ॥९८॥९९॥—

जेघ्नीयते खलो जीवान्, जङ्घन्यते गतिं हताम् ॥९९॥

ञ्णिति घात् ॥४।३।१००॥

ञिति णिति परे हन्ते–र्घादादेशो निगीयते ॥
घातंघातं महामोहं, घातयेत् कर्म सज्जनः ॥१००॥

ञि- णवि घन् ॥४।३।१०१॥

ञौ णवि च परे हन्ते–र्घनादेशो निरूपितः ॥
जघानाघानि पापात्मा, स्वसुखं पापकर्मणा ॥१०१॥

नशेर्नेश् वाऽङि ॥४।३।१०२॥

नेशादेशो विकल्पेन, नशेः स्यादङि प्रत्यये ॥
अनशदथवाऽनेशद्–दनीशो निजसाध्यतः ॥१०२॥

श्वयत्यसू-वच-पतः श्वाऽस्थवोचपप्तम् ॥४।३।१०३॥

श्वयत्यादिचतुर्णां स्युः, श्वादयोऽङि परे क्रमात् ॥
अश्वदास्थत्तथाऽवोच–दपप्तन् साध्यतामतः ॥१०३॥

शीङ एः शिति ॥४।३।१०४॥

शीङः शित्येर्भवेन्मूर्खः, शेते सुखं दिवानिशम् ॥
शयाते शेरते योग–निद्रया योगिनो जनाः ॥१०४॥

क्ङिति यि शय् ॥४।३।१०५॥

धातोः शीङः शयादेशः, क्ङिति यादौ परे भवेत् ॥
शाशय्यते जनो रोगी, सुधीभिः शय्यते मितम् ॥१०५॥

—॥१००॥१०१॥१०२॥१०३॥१०४॥ क्ङितीति किम् ? शेयम् ॥१०५॥

उपसर्गादूहो ह्रस्वः ॥४॥३॥१०६॥

सोपसर्गोहतेरूनो, ह्रस्वः स्याद् यादिके क्ङिति ॥
समुह्यते समूहेन, सदूह्यते समूहितम् ॥१०६॥

आशिषीणः ॥४॥३॥१०७॥

उपसर्गात् परस्येण, इत आशिषि यादिके ॥
क्ङिति ह्रस्वो भवेद् भव्य, उदियादुत्तरोत्तरम् ॥१०७॥

दीर्घश्च्वियङ्‌ यक्क्येषु च ॥४॥३॥१०८॥

यादावाशिषि चैषु स्या-दन्त्यस्वरस्य दीर्घता ॥
शुचीकरोति तोष्टूय-ते स्तूयते भृशायते ॥१०८॥

ऋतोरी ॥४॥३॥१०९॥

च्व्यादौ परे ऋदन्तस्य-र्तः स्थाने रीर्भवेदिति ॥
चेक्रीयते च मित्रीस्याद्, मात्रीयते पित्रीयते ॥१०९॥

रिः शक्याशीर्ये ॥४॥३॥११०॥

ऋदन्तस्य रिदादेश, आशीर्ये क्ये तथा च शे ॥
ऋत स्थाने क्रियाद्‌ब, क्रियते ह्रियते ह्रियात् ॥११०॥

ईश्व्यावर्णस्यानव्ययस्य ॥४॥३॥१११॥

च्व्यादीरनव्ययस्यान-र्णान्तस्य स्याद् द्विकः क्वचित् ॥

ऊ ऊह् इति प्रश्लेष किम्? आ उह्यते आऊह्य-समोह्यते ॥१०६ ई.ण इति प्रश्लेष. किम्? आ ईयात् एयात्, समेयात् ॥१०७॥ एव मन्तू-यते, दधीयते, ल्लाह्निायत, ईत्यादित्यादि ॥ १०८ ॥ ऋत इति किम्? चेकीयते ॥१०९॥ इत्यादि ॥११०॥१११॥—

शुक्लीभवेद् दीवाभूता, रात्रिर्माली भवेदहि ॥१११॥

क्यनि ॥४॥३॥११२॥

अवर्णान्तस्य हीत्वं क्यन्–प्रत्यये जायते यतः ॥
पुत्रीयति जनो मालीयति शालीयति स्वयम् ॥११२।

क्षुत्--तृड्--गर्द्धेऽशनायोदन्यधनायम् ।४।३।११३।

एष्वर्थेषु यथासङ्ख्य–मशनायादयस्त्रयः ॥
क्यन्नन्ता हि निपात्यन्ते, उदन्यति धनायति ॥११३॥

वृषाऽश्वान् मैथुने स्सोऽन्तः ॥४॥३॥११४॥

आभ्या स्यान्मैथुनार्थाभ्या, क्यनि स्सोऽन्तः स्मराविला ॥
गौः वृषस्यति कालेन, वडवाऽश्वस्यति क्रमात् ॥११४॥

अस् च लौल्ये ॥४॥३॥११५॥

लौल्ये क्यनि परे नाम्न, स्सोऽस् चान्तः स्यात् स्वभावत ॥
दध्यस्यन्ति दधिस्यन्ति, मध्वस्यन्ति च बालकाः ॥११५॥

॥ इति तृतीयः पाद ॥

अस्ति-ब्रुवोर्भूवचावशिति ॥४।४।१॥

अस्तिब्रुवोर्यथासङ्ख्यं, भूवचौ भवतोऽशिति ॥
बभूव भविता भूयाद्, वक्षीष्टावोचदुच्यते ॥१॥

अघञ्क्यबलच्यजेर्वी ॥४॥४॥२॥

अघञादावजेर्वी स्या-दशिति विषये ततः ॥
प्रवेयं च समाजश्च, समज्याऽजः पशुर्मतः ॥२॥

त्रने वा ॥४॥४॥३॥

त्रनयोः स्यादजेर्वी वा, विषयभूतयोस्ततः ॥
प्रवयणः प्रवेता च प्राजिता प्राजनस्तथा ॥३॥

चक्षो वाचि क्शांग्-ख्यांग् ॥४॥४॥४॥

अशिति विषये चक्षो, वागर्थस्य समार्थकौ ॥
क्शाग्-ख्यागौ स्तो नरः क्शाता, ख्याताऽऽचष्टे विच-
क्षणः ॥४॥

नवा परोक्षायाम् ॥४॥४॥५॥

चक्षो वाचि परोक्षाया, क्शाग्-ख्यागौ स्तो विभाषया ॥
आचक्शौ नर आचख्या-वाचचक्षे हितं वचः ॥५॥

भृज्जो भर्ज् ॥४॥४॥६॥

भृज्जतेर्भर्ज् विकल्पेन, ह्यशिति विषये भवेत् ॥
भर्ष्टा भ्रष्टा तथाऽभार्क्षीद्, भर्जनं भ्रज्जनं तथा ॥६॥

अशितीति-स्यात्, भूत ॥१॥ सूत्रपद्ध स्तम् ॥२॥३॥४॥५॥६॥७॥

प्राद् दागस्त्त आरम्भे क्ते ॥४॥४॥७॥

आरम्भार्थस्य दागः क्ते, प्रपूर्वस्य भवेन्नवा ॥
त्तः प्रत्तश्च प्रदत्तश्च, परीत्तमिति जायते ॥७॥

निविस्वन्ववात् ॥४॥४॥८॥

एभ्यः परस्य दागः क्ते, परे त्तो जायते नवा ॥
नीत्तं वीत्तं निदत्तश्च, विदत्त स्वत्तमुत्तमम् ॥

स्वरादुपसर्गाद् दस्ति कित्यधः ॥४॥४॥९॥

स्वरान्तादुपसर्गाद् दा-संज्ञस्य किति तादिके ॥
स्याद् धावर्जस्य नित्यं त्तो, दत्त प्रत्त परीत्तिमम् ॥९॥

दत् ॥४॥४॥१०॥

भवेद् दासंज्ञकस्याधो, दत् तादौ किति प्रत्यये ॥
दत्तो दत्तिस्तथाधीतः, साध्यता लक्षणादयः ॥१०॥

दोसोमास्थ इ ॥४॥४॥११॥

दोसोमास्थामिकारः स्यात्, तादिके किति प्रत्यये ॥
तेन संमिश्रनॅाश्चापि, मितिः मित्वा च निर्दितः ॥११॥

छाशोर्वा ॥४॥४॥१२॥

'छोशो' इत्येतयोर्धात्वो-रिः स्याद्वा किति तादिके ॥

एव मन्तम्, अनूनम्, अनुन्नम्, आत्तम्, आदनम ॥८॥ स्वरादिनि निन्तम । द इति-प्रदाना नी.य । नीति निम् । प्रगार । आ र दी निर्गत ॥९॥ साष्टे ॥१०॥११॥ एतस्य छान्तात्, अर्ता छातात्, निशितात्, निशातवान् ॥१२॥

निशितश्च निशातः स्या-दवच्छातस्त्ववच्छितः ॥१२॥

शा व्रते ॥४॥४॥१३॥

श्यतेः क्तप्रत्यये नित्य-मिर्व्रतविषये भवेत् ॥
स संशितव्रतो ज्ञेयो, व्रतं येन च संशितम् ॥१३॥

हाको हिः क्त्वि ॥४॥४॥१४॥

हाकस्तादौ किति त्वनाया, हिर्भवेद् हैमलक्षणे ॥
हीनोऽपि हीनता हित्वा, पापं प्रहीय सन् भवेत् ॥१४॥

धागः ॥४॥४॥१५॥

धातोर्धागस्तकारादौ, किति हिर्जायते यतः ॥
हित्वा विहितवान् धीतः, प्रधाय धीनवान् हितिः॥१५॥

यपि चादो जग्ध् ॥४॥४॥१६॥

तादौ किति यपि चादे-र्जग्धादेशो विधीयते ॥
जग्धि प्रजग्ध्य जग्ध्वा च, पीयूष मरणं जयेत् ॥१६॥

घस्लृ सनद्यतनी घञचलि ॥४॥४॥१७॥

एषु सनादिषु घस्लृ-रदेरादिश्यते ततः ॥
भात्तीति प्रघसो घासो, घसोऽघसज्जिघत्सति ॥१७॥

संशितम्–अभिधारितं व्रतमित्यर्थः । व्रतविषयाभावे तु निशातः ॥ १३ ॥
स्पष्टम् ॥ १४ ॥ धीतः, धीतवानिति ट्रुट् पाने इत्यस्य । प्रधाय इति ताद्यभावात्
॥१५॥ यपि चेति अदनम्, तीत्यर्थं अथात्, क्तिन्नित्येव अत्तव्यम् ॥१६॥
घस्लृ अदने इत्यनेनैव सिद्धेऽदेः सनादिषु स्थानान्तरनिवृत्त्यर्थं वचनम् ॥१७॥

परोक्षायां नवा ॥४॥४॥१८॥

परोक्षायामदेर्घस्लृ-र्विकल्पेन विधीयते ॥
जघास जक्षतुर्जक्षु-रादतुराद्गुराद च ॥१८॥

वेर्वय् ॥४॥४॥१९॥

वेगो धातोः परोक्षाया, वयादेशो भवेन्नवा ॥
ऊयुर्ववुः पुरा वस्त्र, कुविन्दा लक्षमूल्यकम् ॥१९॥

ऋः शॄदॄप्रः ॥४॥४॥२०॥

एषा भवेत् परोक्षाया-मृन्तो वा विशश्रतुः ॥
विशशृवान् विशिशीर्वान्, विदद्रतुर्निपप्रतुः ॥२०॥

हनो वध आशिष्यञो ॥४॥४॥२१॥

स्यादाशीर्विषये हन्ते-र्वधो नो जिटि प्रत्यये ॥
वध्यात् मदाऽन्तगन शत्रून, घानिषीढेत्यजानिति ॥२१॥

अद्यतन्यां वाऽऽत्मने ॥४॥४॥२२॥

अद्यतन्या हनो नित्यं, वधो वा त्वात्मनेपदे ॥
राक्षसानवधीद् राम आवधिष्टाऽहनाद्रे ॥२२॥

इणिकोर्गाः ॥४॥४॥२३॥

गादेश इणिकोर्धात्वो-रद्यतन्या निर्धायते ॥
अगात कश्चिद् हिताद् दूर, हित च कश्चिदध्यगात् ॥२३॥

द्रष्ट ॥१८॥१९॥ पक्षे [illegible], [illegible], [illegible] ॥२०॥
स्पष्ट सूत्र-[illegible] ॥२१॥२२॥२३॥

णावज्ञाने गमुः ॥४॥४॥२४॥

अज्ञानार्थकयोर्धात्वो-रिणिकोर्णौ गमुर्भवेत् ॥
सद्धर्मो गमयेत् स्वर्गं, तथाऽधिगमयेच्छिवम् ॥२४॥

सनीङश्च ॥४॥४॥२५॥

सनीङो गमुरज्ञाना-र्थकयोरिणिकोस्तथा ॥
अधिजिगांसते ग्रामं, जिगमिषति सत्वरम् ॥२५॥

गाः परोक्षायाम् ॥४॥४॥२६॥

परोक्षाविषये गाः स्या-दिङो धातोः सनातन ॥
अधिजगे जगत्तत्त्वं, तत्त्ववित्तत्त्वलिप्सया ॥२६॥

णौ सन्ङे वा ॥४॥४॥२७॥

इङो धातोः परे सन्ङे, णौ गादेशो विभाषया ॥
शिष्यमध्यापिपच्छास्त्र-मुपाध्यायोऽध्यजीगपत् ॥२७॥

वाऽद्यतनीक्रियातिपत्त्योर्गीङ् ॥४॥४॥२८॥

इङः क्रियातिपत्तौ चा-द्यतन्यां गीङ् विभाषया ॥
अध्यगीष्ट तथाऽध्यैष्ट, चाध्यैष्यता-ध्यगीष्यत ॥२८॥

अड् धातोरादिर्ह्यस्तन्यां चामाङा ॥४॥४॥२९॥

ह्यस्तन्यामद्यतन्याञ्च, क्रियातिपत्तिके तथा ॥

अज्ञान इति किम् ? ग्रामान् प्रत्याययति ॥२४॥ एवं मातुरधिजिगमिषतीत्यादि ॥२५॥ स्पष्टम् ॥२६॥ णौ नधिजिगापयिषति, अध्यापिपयिषति । णाविति किम् ? अधिजिगांसते । सन्ङ इति अध्यापयति ॥२७॥ स्पष्टम् ॥२८॥ एवम् अनार्षीत् । अनाडि न … । धातोरिति प्राया ॥२९॥

धातोरादिर्भवेदड् माङ्-योगे नोऽगाऽद्यास्यदाः ? ॥२९॥

एत्यस्तेर्वृद्धिः ॥४॥४॥३०॥

ह्यस्तन्यां विषये वृद्धिः, स्यादस्तेरिणिकोस्तथा ॥
आदेर्न माङ्समायोगेऽ–ध्यायन्नास्तां तथाऽऽयनः ? ॥३०॥

स्वरादेस्तासु ॥४॥४॥३१॥

ह्यस्तन्यामद्यतन्याश्च, वृद्धिः क्रियातिपत्तिके ॥
स्वरादिर्नच माङ्योगे, आटीदैधिष्यदौ-अदा ? ॥३१॥

स्ताद्यशितोऽत्रोणादेरिट् ॥४॥४॥३२॥

धातोः परस्य सादेश्च, तादेश्चाशित आदिरिट् ॥
त्रोणाद्योर्नतु सम्भया – ह्लविता च लविष्यति ॥३२॥

तेर्ग्रहादिभ्यः ॥४॥४॥३३॥

ग्रहादिभ्यः परस्य स्ता – यशितस्तेरिडादिकः ॥
भगिती रगितिः शान्ति – रन्दोलितिश्च कम्पितिः ॥३३॥

गृह्णोऽपरोक्षायां दीर्घः ॥४॥४॥३४॥

ग्रहेर्यो विहितस्तस्ये – टो दीर्घः स्यादनेन च ॥
परोक्षाया ग्रहीताऽस्रं, ग्रहीष्यति तथाऽग्रहीत ॥३४॥

वृतो नवाऽनाशीः सिच्परस्मै न ॥४॥४॥३५॥

पुणो शुट् क्रदन्तान, दीर्घो नेटो न चान्यदापि ॥
सिच्परस्मैपरक्षार्यां, वरीता वरिता तथा ॥३५॥

इट सिजाशिषोरात्मने ॥४॥४॥३६॥

सिजाशिषोरिडाद्दिर्दी, वृतः स्यादात्मनेपदे ॥
अवरीष्टावृताप्सीष्टी – स्तरिष्ट प्रावृषीष्ट न ॥३६॥

संयोगाद् ऋतः ॥४॥४॥३७॥

संयोगाद् ऋदन्तात् स्यात्, सिजाशीरात्मनेपदे ॥
आदिरिड् नाऽस्मृषाताश्च – स्मरिषातां स्मृषीष्ट च ॥३७॥

घृगोदितः ॥४॥४॥३८॥

स्तादिशित इडादिर्दी, धूगोदितोस्तो यथा ॥
धविता तर्जिता भोना, अता तातौ न गोपिता ॥३८॥

निष्कुषः ॥४॥४॥३९॥

इट् स्तादशित आदिर्दी, कुषो निष्पूर्वकात् परम् ॥
निष्कोषिता च निष्कोष्टा, कोषिता च प्रकोषिता ॥३९॥

क्त्योः ॥४॥४॥४०॥

निष्कुष आदिरिट् नित्यं, स्यात क्तयोः परयोस्ततः ॥

निष्कुषितस्तथा निष्कु-षितवान् मतिकर्कशः ॥४०॥

जॄव्रश्चः क्त्वः ॥४॥४॥४१॥

जॄव्रश्चिभ्या परस्य क्त्वा – प्रत्ययस्यादिरिड् भवेत् ॥
जरित्वा च जरीत्वाऽपि, व्रश्चित्वा हितमाचरेत् ॥४१॥

ऊदितो वा ॥४॥४॥४२॥

ऊदितः परतो वा क्त्वा–प्रत्ययस्यादिरिड् भवेत् ॥
दान्त्वा शान्त्वा दमित्वा च, शमित्वाप्रमुखं ततः ॥४२॥

क्षुधवसस्तेषाम् ॥४॥४॥४३॥

आभ्या क्तक्तवतुक्त्वामा–दिरिट् स्यात् स उपोषितः ॥
क्षुधितः क्षुधितवाँश्चापि, क्षुधित्वोषितवाँस्तथा ॥४३॥

लुभ्यञ्चेर्विमोहार्चे ॥४॥४॥४४॥

आभ्या क्तक्तवतुक्त्वामा–दिरिड् भवेद् यथाक्रमम् ॥
विमोहनार्थपूजार्था–भ्या लुभित्वा समञ्चितः ॥४४॥

पूङ्क्लिशिभ्यो नवा ॥४॥४॥४५॥

पूङ्क्लिशिभ्यः परेषा क्त–क्तवतुक्त्वा नवादिरिट् ॥
पविनश्च पवित्वा च, पूत पूत्वा च पूतवान ॥४५॥

सहलुभेच्छरुषरिषस्तादेः ॥४॥४॥४६॥

एभ्यः पञ्चभ्य आदेरिट्, तादेः स्ताद्यशितो नरा ॥
सोढा च सहिता लोब्धा, लोभितैष्टा तथैषिता ॥४६॥

इवृध-भ्रस्ज-दम्भ-श्रि-यूर्णु-भर-ज्ञपि-सनि-
तनि-पति-वृद्-दरिद्रः सनः ॥४॥४॥४७॥

इवन्तेभ्य ऋधादिभ्यो, दरिद्रातेर्ऋदन्ततः ॥
सन आदिर्भवेदिड् वा, कोऽप्यर्दिधिषतीर्त्सति ॥४७॥

ऋ-स्मि-पूङञ्जशौ-कॄ-गॄ-दृ-धृ-प्रच्छः
॥४॥४॥४८॥

ऋस्मिपूङञ्जशौकॄगॄ-दृधृप्रच्छिभ्य आदिरिट् ॥
सनश्चिकरिषत्येव, चिकरीषति को हितम् ॥४८॥

हनृतः स्यस्य ॥४॥४॥४९॥

हन्तेर्ऋदन्तधातोश्च, परस्य स्यस्य चादिरिट् ॥
हनिष्यति रिपून् योऽसौ, करिष्यति सदासुखम् ॥४९॥

एर राध्र, रधिता, रेद्धुम, रधितुम् ॥४६॥ एव दुद्यूषति, दिदे-
विषतीत्यादि ॥४७॥ एरम् अरिरिषति, सिस्मयिषते, पिपविषते, अ..जि
अजिशिषत, निगरीषति, आदिदरिषत, आदिधरिषत, पिपृच्छिषति ॥४
रूपम् ॥४९॥

कृत-चृत-नृत-च्छृद-तृदोऽसिच सादेर्वा ॥४॥४॥५०॥

एभ्योऽसिचः सकारादेः, स्तायशितो नवादिरिट् ॥
कर्तिष्यन्ति च कर्त्स्यन्ति, नर्तिष्यन्ति च नर्त्स्यन्ति ॥५०॥

गमोऽनात्मने ॥४॥४॥५१॥

गमः सादेर्भवेदिट् स्ता - द्यशितोऽनात्मनेपदे ॥
श गमिष्यति शास्त्रस्या - न्विजिगमिषिना स्वयम् ॥५१॥

स्नोः ॥४॥४॥५२॥

स्नोः परस्यादिरिट् स्यात् स्ता - द्यशितोऽनात्मनेपदे ॥
प्रस्नविष्यति प्रास्नोष्ट, कर्मणि कुशलो जन ॥५२॥

क्रमः ॥४॥४॥५३॥

अनात्मनेपदे स्ताद्य - शित स्यात् क्रम आदिरिट् ॥
प्रक्रस्यते पराक्रंतं, प्रक्रमित क्रमिष्यति ॥५३॥

न वृद्भ्यः ॥४॥४॥५५॥

स्ताद्यशित इडादिर्नो, भवेद् वृदादिपञ्चकात् ॥
चेदात्मनेपदे नासौ, वर्त्स्यति च विवृत्सति ॥५५॥

एकस्वरादनुस्वारेतः ॥४॥४॥५६॥

धातोरेकस्वराच्चानु – स्वारेत आदिरिड् नवै ॥
स्ताद्यशितो भवेत् पाताऽ – धीत् पृथक् पृथग् जनः ॥५६॥

ऋवर्ण-श्र्यूर्णुगः कितः ॥४॥४॥५७॥

ऋवर्णान्ताच्च श्र्यूर्णो – श्चैकस्वरत आदिरिट् ॥
कितो न स्याद् वृतस्तीर्त्वो–र्णुत्वाश्रितः समाश्रित ॥५७॥

उवर्णात् ॥४॥४॥५८॥

एकस्वरादुवर्णान्ताद्, न भवेत् कित आदिरिट् ॥
युतो लूनो विलूनश्च, यविता लविता तथा ॥५८॥

ग्रह-गुहश्च सनः ॥४॥४॥५९॥

उवर्णान्तात्तथा चाभ्या, न भवेत् सन आदिरिट् ॥
रुरूषति महारोपा – ज्जिघृक्षति जुघुक्षति ॥५९॥

स्वार्थे ॥४॥४॥६०॥

स्वार्थार्थस्य सनो नैव, स्यादादिरिट् जुगुप्सते ॥
तितिक्षते तथा दीदा – सते मीमांसते तथा ॥६०॥

एर स्यन्त्स्यति, सिस्य स्सतीत्यादि ॥५५॥ स्पष्टम् ॥५६॥ एकस्वरादित्येव जागरित । कित इति किम् ? वरिता ॥५७॥ स्पष्टानि ॥५८॥५९॥६०॥

डीय-श्व्यैदित क्तयोः ॥४।४।६१॥

आदिग्टि् क्तक्तवतोर्न, श्वैदितश्च डीयतेः ॥
डीनश्च डीनवान् शून:, शनवांश्वसनवांस्तथा ॥६१॥

वेटोऽपत ॥४।४।६२॥

विकल्पेटोऽपतो धातो – रेकस्वरात् क्तयोर्निषेः ॥
आदिग्टि् जायते रुद्धो रुद्धवान् पतितस्तथा ॥६२॥

सं-नि-वेरर्दः ॥४।४।६३॥

सं – नि – विभ्यः परादर्दे – र्नादिग्टि् परयोः क्तयोः ॥
समर्णवान् समर्णश्च, व्यर्णो न्यर्णस्तथार्दितः ॥६३॥

अविदूरेऽभेः ॥४।४।६४॥

आदिग्डविदूरेऽर्थे, नाभेर्र्दः क्तयोर्भवेत ॥
अभ्यर्णवांस्तथाऽभ्यर्णोऽ–भ्यर्दितः शीततोऽन्यतः ॥६४॥

वृत्तवृत्त ग्रन्थे ॥४।४।६५॥

वृतेर्ण्यन्तात् परे क्ते स्याद्, वृत्त ग्रन्थे निपातितः ॥
गुणश्च्छात्र वृत्तोऽपि, वृत्तम् वर्तितः नितम् ॥६५॥

कषः कृच्छ्र-गहने ॥४॥४॥६७॥

इड् न भवेत् क्तयोरादि – रनयोरर्थयोः कषेः ॥
गहनं काननं कष्ट, कष्टं कषितकाञ्चनम् ॥६७॥

घुषेरविशब्दे ॥४॥४॥६८॥

आदिरिड् अविशब्दार्थाद्, घुषेर्न परयोः क्तयोः ॥
घुष्टा रज्जुश्च सम्बद्धा – वथवा घुष्टवांस्तथा ॥६८॥

बलिस्थूले दृढः ॥४॥४॥६९॥

क्तान्तस्य बलिनि स्थूले, चार्थे दृहेश्च दृंहतेः ॥
निपात्यते दृढः स्थूलो, बली दृढितदृंहिते ॥६९॥

क्षुब्ध-विरिब्ध-स्वान्त-ध्वान्त-लग्न-म्लिष्ट-फाण्ट-बाढ परिवृढं मन्थ-स्वर-मनस्-तमस्-सक्ता-स्पष्टा-नायास--भृश--प्रभौ ॥४॥४॥७०॥

क्षुब्धाद्या नव मन्थादि – ष्वर्थेषु क्रमशो यथा ॥
निपात्यन्तेऽनिटः क्तान्ताः, क्षुब्धं स्वान्तं विरिब्धतः ॥७०॥

आदितः ॥४॥४॥७१॥

आदिरिड् न भवेद् धातो–रादितः परयोः क्तयोः ॥
मिन्नश्च मिन्नवांश्चापि, स्विन्नश्च स्विन्नवांस्तथा ॥७१॥

कष्टं दुःखम्, कष्टं दुरवगाहमिति ॥६७॥ अविशब्द इति किम्? घुषितं वाक्यम् ॥६८॥ दृढ इति उभयान्वयि ॥६९॥ विरिब्धतः स्वरात् स्वान्तं मनः, क्षुब्धः मन्थः, एवं ध्वान्तं तमः, लग्नं सक्तम्, म्लिष्टमस्पष्टम्, फाण्टमनायासजातम्, बाढं भृशम्, परिवृढः प्रभुः ॥७०॥ स्पष्टम् ॥७१॥

नवा भावारम्भे ॥४।४।७२॥

भावारम्भे भवेद् नातो – गदित आदिरिट् नवा ॥
क्तयोर्हि भेदितं भिन्नं, प्रभिन्नश्च प्रभेदितः ॥७२॥

शकः कर्मणि ॥४।४।७३॥

शकेः कर्मणि वा न स्या–दादिरिट् परयोः क्तयोः ॥
शक्तः किं शकितः कर्तुं, कुलालैः कलशोऽङ्गकः ।७३॥

णौ दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्तम् ॥४।४।७४॥

क्तान्ताना वा दमादीना सन्त्येते णौ निपातिता ॥
दान्तश्च दमितः शान्तः, शमितः पूर्णपूरितः ।७४॥

श्वस-जप-वम-रुष-त्वर-सङ्घुषाऽऽस्वनाम्

हृषेः केश-लोम--विस्मय-प्रतिघाते ॥४॥४॥७६॥

केशाद्यर्थेषु हृष्धातो-रादिरिट् स्यान्नवा क्तयोः ॥
हृष्टाश्च हृषिता केशा, दन्ता हृष्टश्च लोमभिः ॥७६॥

अपचितः ॥४॥४॥७७॥

अपात् चायेरिटोऽभावः, क्तान्तस्य जायते तथा ॥
चिश्च निपात्यते वाऽसा-वपचितोऽपचायितः ॥७७॥

सृजि--दृशि--स्कृ--स्वराऽत्वतस्तृज्नित्यानिटस्थवः ॥४॥४॥७८॥

थव आदिर्न वेट् सृज्दृश्-भ्यां स्कृगः स्वरतोऽत्वतः ॥
तृजि नित्यानिटः कुर्यात्, सस्रष्ठ च ससर्जिथ ॥७८॥

ऋतः ॥४॥४॥७९॥

ऋदन्तात् तृजि नित्यानिट्-रूपस्य थव आदिरिट् ॥
न स्याज्जहर्थ सस्मर्थ, सस्वरिथ बिभेदिथ ॥७९॥

ऋ--वृ-व्ये--ऽद इट ॥४॥४॥८०॥

उक्तधातुचतुष्केभ्यः, परस्य थव आदिरिट् ॥
ववरिथारिथ ब्रूयात्, संविव्ययिथ चादिथ ॥८०॥

ए। हृष्टा हृषितश्चेत्र, लोमभि हृषितमित्यपि ॥७६॥ स्पष्टम् ॥७७॥ अस्यार्थ-सृजिदृशिभ्यां स्कृग स्वरान्तादत्वतश्च तृचि नित्यानिटो विहितस्य थव आदि रिट् वा न स्यादिति । एव दद्रष्ठ, ददर्शिथ, सञ्चस्कर्थ, सञ्चस्करिथ, ययाथ, ययिथ, पपक्थ, पेचिथ. । तृज्नित्यानिट इति किम् ? ररन्धिथ, बिभेदिथ । विहितविशेषण किम् ? चकर्षिथ ॥७८॥ स्पष्टे ॥७९॥८०॥

स्कृ-सृ-वृ-भृ-स्तु-द्रु-श्रु-स्रोर्व्यञ्जनादेः परोक्षायाः ॥४।४।८१॥

व्यञ्जनादेः परोक्षाया, आदिरिड् धातुमात्रतः ।
स्यात् स्कादिमष्टकं त्यक्त्वा, ऋगाद्य दरिद्रादयः ॥८१॥

घसेकस्वरातः क्वसोः ॥४।४।८२॥

घसेरेकस्वरादाद्-न्ताच्च धातोः परः क्वसोः ॥
परोक्षाया इडादिः स्या - ज्जक्षिवानादिर्वाम्तथा ॥८२॥

गम--हन--विद्ऌ--विश--दृशो वा ॥४।४।८३॥

परोक्षायाः क्वसोरादि - रिड् वा गमादिपञ्चकात् ॥
जग्मिवाँश्च जगन्वाँश्च, जघन्वान् जघ्निवाँस्तथा ॥८३॥

सिचोऽञ्जेः ॥४।४।८४॥

अञ्जेः परस्य जानीत, नित्यं सिच आदिरिट् ॥
अ[illegible]ञ्जिता ॥८४॥

यमि-रमि-नम्यातः सोऽन्तश्च ॥४॥४॥८६॥

आदन्तेभ्यस्तथाचैभ्य, इट् परस्मैपदे सिचः ॥
आदिः सोऽन्तश्च स्यादेषां, व्यरंसीद् रजनी खलु ॥८६॥

ईशीडः सेध्वेस्वध्वमोः ॥४॥४॥८७॥

ईशीड्भ्यां वर्तमानायाः, सेध्वयोः पञ्चमीद्वयोः ॥
स्वध्वमोश्चादिरिट् स्यात् त-दीशिष्वेडिध्वमीशिषे ॥८७॥

रुत्पञ्चकाच्छिदयः ॥४॥४॥८८॥

रुदादेः पञ्चतो व्यञ्ज-नादेः शितोऽय आदिरिट् ॥
रोदिति स्वपिति प्राणी-ति श्वसिति च जक्षिति ॥८८॥

दिस्योरीट् ॥४॥४॥८९॥

रुदादिपञ्चकाद् दिस्योः, स्याच्छितोरादिरीट् ततः ॥
अरोदीदस्वपीत् प्राणी-दरोदीरस्वपीस्तथा ॥८९॥

अदश्चाट् ॥४॥४॥९०॥

अत्ते रुत्पञ्चकाद् दिस्योः, स्याच्छितोरादिरट् ततः ॥
आददादस्तथाऽरोद-दरोदोऽस्वपदस्वपः ॥९०॥

संपरेः कृगः स्सट् ॥४॥४॥९१॥

सपरिभ्या परस्य स्सट्. कृग आदिर्विधीयते ॥

एवम् अयसीत्, अनंसीत्, अयासिषाम् ॥८६॥ एवम् ईशिध्वे, ईशिष्वम्, ईडिषे, ईडिध्वे, ईडिष्व ॥८७॥ अयिति किम् ? रुद्यात्, शित इति किम्? रोत्स्यति, स्वप्स्यति ॥८८॥ सूत्रत्रय व्यक्तार्थम् ॥८९॥९०॥९१॥

संस्करोति कन्यां स्नेहात्, परिष्करोति संस्कृतम् ॥१.२॥

उपाद् भूषासमवायप्रतियत्नविकारवाक्याध्याहारे ॥४।४।९.२॥

उपात् परस्य भूषादि-प्वर्थेष्वादिः कृगो भवेत् ॥
स्रग् स उपस्कृत भुङ्क्ते, कन्यामुपस्करोति स ॥१.२॥

किरो लवने ॥४।४।९.३॥

उपात् स्यात् किरतेरादिः, स्सट स चेल्लवनार्थकः ॥
ते मद्रका उपस्कीर्य, लुनन्ति निभराधिन. ॥१.३॥

प्रतेश्च वधे ॥४।४।९.४॥

प्रतेरुपाच्च हिंसाया, स्सडादिः किरतेर्भवेत् ॥
प्रतिस्कीर्णमुपस्कीर्णं, ना ह ते वृषलाऽस्तु ते ॥१.४॥

अपाच्चतुष्पात्-पक्षि-शुनि हृष्टान्नाश्रयार्थे ॥४।४।९.५॥

उक्तकर्तरि चोक्तार्थं स्सडादि. किरतेरपात ॥
हृष्टोऽपस्किरते गोगं. स्वाश्रार्थी कुक्कुटस्तथा ॥१.५॥

वौ विष्किरो वा ॥४।४।९.६॥

विकिरतेः स्सडादिर्वा, पक्ष्यर्थे निपात्यते ॥
विष्किरो विकिरः पक्षी. विकिरतीति विष्किरः ॥१.६॥

प्रात् तुम्पतेर्गवि ॥४॥४॥९७॥

प्रात् तुम्पतेः स्सडादिः स्याद्, गवि कर्तरि नित्यशः ॥
प्रस्तुम्पति बलीवर्द–स्तरुस्तारं प्रतुम्पति ॥९७॥

उदितः स्वरान्नोऽन्तः ॥४॥४॥९८॥

स्वरात् परो भवेन्नोऽन्तो, धातोः सदोदितस्ततः ॥
नन्दितो निन्दितः कश्चित्, कश्चिन्नन्दति निन्दति ॥९८॥

मुचादितृफदृफगुफशुभोभः शे ॥४॥४॥९९॥

एषां स्वराद् भवेन्नोऽन्तः, शे परे मुञ्चति क्रुधा ॥
तुम्फति दृम्फतीदानीं, गुम्फत्युम्भति शुम्भति ॥९९॥

जभः स्वरे ॥४॥४॥१००॥

जभेः स्वरात् परो नोऽन्तः, स्वरादौ प्रत्यये परे ॥
जम्भंजम्भ भवेज्जम्भो, जम्भयति च जम्भकः ॥१००॥

रध इटि तु परोक्षायामेव ॥४॥४॥१०१॥

रधः स्वरात् परो नोऽन्तः, स्वरादौ प्रत्यये परे ॥
परोक्षायामिडादौ वै, रन्धयन्ति ररन्धिम ॥१०१॥

रभोऽपरोक्षाशवि॥४॥४॥१०२॥

रभेः स्वरात् परो नोऽन्तः, स्वरादौ प्रत्यये परे ॥
परोक्षा च शवं त्यक्त्वा, सन्नारम्भयति श्रुतम् ॥१०२॥

–॥९७॥९८॥ एद पिशतान्यादि ॥९९॥ सप्तम् ॥१००॥ परोक्षायामेवेति किम् ? रधिना ॥ १०१ ॥ अपरोक्षाशवीति किम् ? आरेभे, आरभत ॥१०२॥

लभः ॥४॥४॥१०३॥

लभः स्वरात् परो नोऽन्त, स्वरादौ प्रत्यये परे ॥
परोक्षा च शव त्यक्त्वा, म लम्भयति लम्भकः ॥१०३॥

आङो यि ॥४॥४॥१०४॥

आङो लभः स्वराद् यादौ, परे नोऽन्तो भवेत्ततः ॥
आलम्भ्याः गौस्तथाऽऽलम्भ्या, यदा लभ्य ईश्वरः ॥१०४॥

उपात् स्तुतौ ॥४॥४॥१०५॥

उपाल्लभः स्वराद् यादौ, परे नोऽन्त स्तुतौ भवन् ॥
विद्या सदोपलम्भ्या स्या-दुपलभ्या कथा तथा ॥१०५॥

ञिख्णमोर्वा ॥४॥४॥१०६॥

लभः स्वरात् परो नोऽन्तो ञौ ख्णमि च भवेत्तदा ॥
लम्भं लम्भं तथाऽलाभि, लाभं लाभमलम्भि च ॥१०६॥

उपसर्गात् खल्घञोश्च ॥४॥४॥१०७॥

उपसर्गाल्लभो नोऽन्त खल्घञोर्ञिख्णमोः स्वरात् ॥

नशो धुटि ॥४॥४॥१०९॥

नशेः स्वरात् परो नोऽन्तो, धुडादौ प्रत्यये भवेत् ॥
नंष्टा च नशिता नंष्टुं, नङ्क्ष्यति च निनङ्क्षति ॥१०९॥

मस्जेः सः ॥४॥४॥११०॥

मस्जेः स्वरात् सकारस्य, भवेन्नोऽन्तो धुडादिके ॥
मङ्क्ता मङ्क्तुं तथाऽमाङ्क्षीत्, मग्नो मङ्क्त्वा च मज्जनम् ॥

अः सृजिदृशोऽकिति ॥४॥४॥१११॥

अनयोः स्वरतोऽदन्तो, धुडादौ प्रत्ययेऽकिति ॥
स्रष्टा द्रष्टुं च स्रष्टव्यं, द्रष्टा सर्जनदर्शने ॥१११॥

स्पृशादिसृपो वा ॥४॥४॥११२॥

स्पृश-मृश-कृषां तृपश्चैव, दृपः सृपः स्वरात् परः ॥
धुडादावकिति स्याद्वा-ऽदन्तः स्प्रष्टादि साधयेत् ॥११२॥

ह्रस्वस्य तः पित्कृति ॥४॥४॥११३॥

ह्रस्वान्तस्य भवेत्तोऽन्तो, धातोः पित्कृति प्रत्यये ॥
गुणप्रकृन्म समागत्य, जगज्जेताऽभवत् स्तुतः ॥११३॥

अतो म आने ॥४॥११४॥

धातोर्हि विहिते आने, मोऽन्तो भवेदतः परः ॥

स्पष्ट ॥१०९॥११०॥ अकितीति किम्? सृष्ट, दृष्ट, सिसृक्षति, दिदृक्षति ॥१११॥ आदिपदात् स्प्राष्टा, [illegible], [illegible], [illegible], [illegible], [illegible], [illegible], [illegible], [illegible], [illegible] ॥११२॥ ह्रस्वस्येति किम्? ग्रामणी, कृतीति किम्? [illegible] ॥११३॥ स्पष्टम् ॥११४॥

पचमानश्शयानश्चेद्, नकं कार्यं प्रसाधयेत् ॥११४॥

आसीनः ॥४॥४॥११५॥

आस्तेर्धातोः परस्यान-स्यादीत्त्वं निपात्यते ॥
आसीनो यदुदासीन, उपासीन कथ भवेत् ॥११५॥

ऋतां क्ङितीर् ॥४॥४॥११६॥

ऋकारान्तस्य धातोः स्या-दीर् क्ङिति प्रत्यये ॥
तीर्णं कीर्णं तथाऽऽस्तीर्णं, किरति च निकीर्यति ॥११६॥

ओष्ठ्यादुर् ॥४॥४॥११७॥

धातोरोष्ठ्यात् परस्य स्या-दॄत क्ङित्युर् तु अर्पति ॥
पूर्णः पुर्णो पुरः पूर्च मुमूर्षति तु र्पति ॥११७॥

इसासः शासोऽङ्-व्यञ्जने ॥४॥४॥११८॥

शास्तेरासस्यासो-ऽङि क्ङिति व्यञ्जनादिके ॥
इस भवेदशिषच्छिष्टः शास्ता शास्त प्रशासितः ॥११८॥

आङः ॥४॥४॥१२०॥

आङः परस्य शासासः, स्थाने क्वावेव कार्य इस् ॥
सदाशीः सन् सदाशास्ते, आशीर्वादो हि सिध्यति ॥१२०॥

य्वोः प्वय्व्यञ्जने लुक् ॥४॥४॥१२१॥

पौ य्वर्जव्यञ्जनादौ च, परे य्वोर्लुक् भवेत्ततः ॥
क्नोपयोति तथा क्ष्मात, कण्डूर्लोलूश्च सेव्यते ॥१२१॥

कृतः कीर्तिः ॥४॥४॥१२२॥

स्यात् कीर्त् इत्ययमादेशः, कॄताणित्यस्य नित्यशः ॥
कीर्तयन्ति शुभां कीर्तिं, सन्तः परोपकारिणः ॥१२२॥

इति चतुर्थः पादः ॥

चतुर्थोऽध्यायः परिपूर्णतामितः ॥

अथ पञ्चमोऽध्यायः : ॥

आतुमोऽत्यादि कृत् ॥५॥१॥१॥

धातोर्विधीयमानः स्याद्, वक्ष्यमाणो नु प्रत्ययः ॥
आतुमस्त्यादिवर्जः 'कृत्', घनघात्योऽपि बुध्यते ॥१॥

बहुलम् ॥५॥१॥२॥

अर्थाद् यथोक्तनिर्दिष्टा–दन्यत्रापि च कृद् भवेत् ॥
बहुलं मोहनीयं तद्, येनात्मा मुह्यति भ्रमात् ॥२॥

कर्तरि ॥५॥१॥३॥

अर्थविशेषनिर्देशं, विना कर्तरि कृद् भवेत् ॥
कारकः पाचकः कर्ता, बुधः पचश्च नन्दनः ॥३॥

व्याप्ये घुरकेलिमकृष्टपच्यम् ॥५॥१॥४॥

स्युः शब्दः कृष्टपच्यश्च, प्रत्ययौ घुरकेलिमौ ॥
व्याप्ये कर्तरि संसारो, भङ्गुरश्च पचेलिमः ॥४॥

सङ्गतेऽजर्यम् ॥५॥१॥५॥

कर्तरि सङ्गतेऽजर्यं, नञ्पूर्वाज्जीर्यतेश्च ये ॥
निपात्यतेऽजरं वस्त्र–मजर्यमार्यसङ्गतम् ॥५॥

रुच्याव्यथ्यवास्तव्यम् ॥५॥१॥६॥

रुच्याव्यथ्यवास्तव्य–त्रयमेतन्निपात्यते ॥

अत्यादिरिति किम् ? प्रणिस्त ॥१॥ एव पादहारक, सम्प्रदानमित्यादि ॥२॥ स्पष्टम् ॥ ३॥ एव कृष्टपच्या शालय ॥४॥ स्पष्टे ॥५॥६॥

कर्तरि रुच्यमव्यथ्यं, वास्तव्येनाप्यते क्वचित् ॥६॥

भव्य-गेय-जन्य-रम्या-ऽऽपात्या-ऽऽप्लाव्यं नवा ॥५॥१॥७॥

भव्याद्याः षड् निपात्यन्ते, कर्तरि वा स भव्यहृत् ॥
भव्यं गेय करोत्येव, गेयो रम्यः सुखाकरः ॥७॥

प्रवचनीयादयः ॥५॥१॥८॥

अनीयप्रत्ययान्ता वा, कर्तर्येते निपातिताः ॥
सता प्रवचनीयः प्र-वचनीयः स आत्मनः ॥८॥

श्लिष-शीङ्-स्था-ऽऽस-वस-जन-रुह-जॄ-भजेः क्तः ॥५॥१॥९॥

एभ्यः क्तः प्रत्ययो ज्ञेयो, विकल्पेनैव कर्तरि ॥
आश्लिष्टो रमणीं चैत्रः, साऽऽश्लिष्टा तेन कामिनी ॥९॥

आरम्भे ॥५॥१॥१०॥

आरम्भार्थकधातोः क्तो, विहितो वा स कर्तरि ॥
भवेत्तत् प्रकृतास्ते तं, कटं स प्रकृतश्च तै ॥१०॥

गत्यर्थाकर्मकपिबभुजेः ॥५॥१॥११॥

गत्यर्थाकर्मकेभ्यश्च, पिबतेर्भुजितस्तथा ॥

एव जन्य, रम्य, आपात्य, आप्लाव्य, पक्षे जन्यम्, रम्यम्, आपात्यम्, आप्लाव्यम् ॥७॥ सत्पुरुषेण आत्मा प्रवचनीय, स सत्पुरुषात्मन प्रवचनीय इति, एवम् उपस्थानीय शिष्यो गुरो, उपस्थानीय. शिष्येन गुरुरित्यादि॥८॥एव शेपुष्मनुवरत्वेनम् ॥९॥ हाष्टम् ॥१०॥ एवम्

जायते कर्तरि क्तो वा, गताः शिष्या उपाश्रयम् ॥११॥

अद्यर्थाच्चाधारे ॥५॥१॥१२॥

गत्यार्थादेस्तथाऽद्यर्था-द्धातोः क्तोः जायते नवा ॥
आधारे जग्धमस्येद, जग्धं तेनेदमित्यपि ॥१२॥

क्त्वा-तुमं भावे ॥५॥१॥१३॥

क्त्वातुमम इत्येते, भावे धात्वर्थमात्रतः ॥
स्युः कृत्वा कर्तुमुच्चात्मा, कारंकारं प्रयाति शम् ॥१३॥

भीमादयोऽपादाने ॥५॥१॥१४॥

साधवः स्युरपादाने, शब्दा भीमादयः समे ॥
बिभेत्यस्मात् परो युद्धे, बली भीमो भयानकः ॥१४॥

सम्प्रदानाच्चान्यत्रोणादयः ॥५॥१॥१५॥

सम्प्रदानादपादाना-च्चान्यत्र स्युरुणादयः ॥
साधनीया यथामार्ध्यं, कार्व्वायुः कपिस्तनु ॥१५।

असरूपोऽपवादे वोत्सर्गः प्राक् क्तेः ॥५॥१॥१६॥

स्यादुत्सर्गोऽसरूपो वा-ऽपवादे प्राक् क्तिप्रत्ययात् ॥
ज्ञो ज्ञाता ज्ञायको गोदो, रक्षित रक्षण कृतिः ॥१६॥

गसितोऽसौ, आसित ते, पीता पय, पीत पय, भुक्तास्त, इद तैर्भुक्तम् ११॥ एतम् इद तया यातम्, तैयातम् इत्यादि ॥१२॥ सूत्रत्रय व्यक्ताम् ॥१३॥१४॥१५॥ अस्यायमर्थ, इत सूत्रादारभ्य 'स्त्रियां क्ति' ।५।३।९१ इत्यत प्राग् योऽपवादस्तद्विषयेऽपवादेनाममानरूप औत्सर्गिक प्रत्ययो स्यात् ॥१६॥

ऋवर्ण–व्यञ्जनाद् घ्यण् ॥५॥१॥१७॥

व्यञ्जनान्तादृवर्णान्ता–द्धातोर्घ्यण् प्रत्ययो भवेत् ॥
कार्य्यं हार्य्यं तथा धार्य्यं, पाक्यं वाक्यं वचस्विनः ॥१७॥

पाणि–समवाभ्यां सृजः ॥५॥१॥१८॥

पाणेः समवपूर्वाच्च, सृजेर्घ्यण् प्रत्ययो भवेत् ॥
रज्जुः समवसर्ग्याऽपि, पाणिसर्ग्या न किं भवेत् ? ॥१८॥

उवर्णादावश्यके ॥५॥१॥१९॥

द्योत्य आवश्यके धातो–र्घ्यणुवर्णान्ततो भवेत् ॥
सताऽन्तःकरणं पाव्यं, लाव्यः पापभरः परः ॥१९॥

आसु-यु-वपि-रपि त्रपि-डिपि-दभि-चम्यानमः ॥५॥१॥२०॥

सुग्-नम्भ्यामाङ्युताभ्या ध्यण्, यौत्याद्यष्टकतस्तथा ॥
आसाव्यं याव्यमाचाम्य–मानाम्यं स्युस्तथाऽपरे ॥२०॥

वाऽऽधारेऽमावास्या ॥५॥१॥२१॥

वसतेर्घ्यणमापूर्वाद्, ह्रस्वश्च स्याद्विभाषया ॥
आधारेऽर्थे त्वमावस्याऽऽ–मावास्या तिमिरप्रिया ॥२१॥

संचाय्य–कुण्डपाय्य–राजसूयं क्रतौ ॥५॥१॥२२॥

एते त्रयः क्रतावर्थे ध्यणन्ताः स्युर्निपातिताः ॥

स्पष्टे ॥१७।१०॥ एवमस्यपाव्यम् ॥१९॥ एव वाप्यम्, राप्यम्, लाप्यम्, जपत्राप्यम्, डेप्यम् दाभ्यम् ॥ ०॥ सूत्रत्रय व्यक्तम् ॥२१॥२२॥--

संचाय्यः कुण्डपाय्यश्च, राजसूयं क्रतुर्मत ॥२२॥

प्रणाय्यो निष्कामासम्मते ॥५॥१२३॥

निष्कामेऽसम्मते चार्थे, ध्यणायौ न्तो नु प्राग्निय ॥
सन् प्रणाय्यो भवेच्छिष्यो-ऽसन् प्रणाय्यो भवेत् खल ॥२३॥

धाय्या-पाय्य-सान्नाय्य-निकाय्यमृङ्-मान-हवि-
र्निवासे ॥५॥१॥२४॥

धाय्यादयश्चतुश्शब्दा, ऋगाद्यर्थे यथाक्रमम् ॥
घ्यणन्ता हि निपात्यन्ते, धाय्या ऋगिति बुध्यताम् ॥२४॥

परिचाय्योपचाय्यानाय्यसमूह्यचित्यमग्नौ॥५॥१॥२५॥

एते पञ्च निपात्यन्ते-ऽग्नावर्थे सूत्रसम्मताः ॥
परिचाय्योपचाय्याना-य्यसमूह्याश्च चित्यकः ॥२५॥

याज्या दानर्चि ॥५॥१॥२६॥

घ्यण् दानर्च्यभिधेयाया, यजतेः करणे भवेत् ॥
गत्वाभावोऽन्यतो याज्या, दानऋक् कथ्यते बुधैः ॥२६॥

तव्यानीयौ ॥५॥१॥२७॥

तव्यानीयौ भवेतां द्वौ, प्रत्ययौ धातुतः परौ ॥
कर्तव्यः करणीयश्च, संयमः सुखमिच्छता ॥२७॥

य एचातः ॥५॥१॥२८॥

स्वरान्ताद्धातुतो यः स्या-दन्त्याकारस्य चेद् भवेद् ॥

-॥२३॥ एव पाय्य मानम्, सान्नाय्य हविः, निकाय्या निवास ॥२४॥
सूत्रचतुष्क स्पष्टम् ॥२५॥२६॥२७॥२८॥

दित्स्यं धित्स्य तथा चेयं, नव्यं देयं यथायथम् ॥२८॥

शकि-तकि-चति-यति-शसि-सहि-यजि-भजि-पवर्गात् ॥५॥१॥२९॥

शक्यादितः पवर्गान्त-धातुतश्चापि यो भवेत् ॥
शक्यं निरोद्धुमभ्यास-वैराग्याभ्यां मनश्चलम् ॥२९॥

यमि-मदि-गदोऽनुपसर्गात् ॥५॥१॥३०॥

स्यादेभ्योऽनुपसर्गेभ्यो, धातुभ्यो नु यप्रत्ययः ॥
यम्यं मद्यं तथा गद्य-मायाम्यमुपसर्गतः ॥३०॥

चरेराङस्त्वगुरौ ॥५॥१॥३१॥

नोपसर्गाच्चरेर्यः स्या-दाङ्पूर्वात्त्वगुरौ भवेत् ॥
आचार्यादेशतो देश, अचार्यं चर्यमुत्तमैः ॥३१॥

वर्योपसर्यावद्यपण्यमुपेयर्तुमतीगर्ह्यविक्रेय ।५।१।३२।

वर्यादयश्चतुश्शब्दा, उपेयाद्यर्थकाः क्रमात् ॥
यान्ता निपातिता वर्या, कन्या पण्या पयस्विनी ॥३२॥

स्वामि-वैश्येऽर्यः ॥५॥१॥३३॥

अर्तेः स्वामिनि वैश्ये च, वाच्ये यः प्रत्ययो भवेत् ॥
अर्यः स्वामी तथा वैश्य, आर्यः सदा सदाचरन् ॥३३॥

एव तक्यम्, चत्यम्, यत्यम्, शस्यम्, सह्यम्, यज्यम् भज्यम्, तप्यम्, गम्यम् ॥२९॥ स्पष्टे ॥३०॥३१॥ एवम् उपसर्या गौः, भवद्य गर्ह्यम् ॥३२॥ सूत्रत्रय स्पष्टम् ॥३३॥-

वह्यं करणे ॥५॥१॥३४॥

करणे वहतेर्धातोः, प्रत्ययो यो भवेत्ततः ॥
जना वहन्त्यनेनेति, वह्यं शकटमुच्यते ॥३४॥

नाम्नो वदः क्यप् च ॥५॥१॥३५॥

वदः क्यप् प्रत्ययो यश्च, नामतो नोपसर्गतः ॥
ब्रह्मोद्य ब्रह्मवद्यश्च, प्रवाद्य वाद्यमन्यथा ॥३५॥

हत्याभूयं भावे ॥५॥१॥३६॥

हत्याभूयौ परौ नाम्नो-ऽनुपसर्गात् क्यबन्तकौ ॥
भावे साधू गतो देव-भूयं स ब्रह्महत्यका ॥३६॥

अग्निचित्या ॥५॥१॥३७॥

स्त्रीभावेऽग्नेः पराच्चेः स्यात् प्रत्ययः क्यप् सदर्थकः ॥
अग्नेश्चयनमर्थज्ञै-रग्निचित्या निगद्यते ॥३७॥

खेय--मृषोद्ये ॥५॥१॥३८॥

साधू खेय मृषोद्यौ द्वौ, क्यबन्तौ भवतस्ततः ॥
मृषोद्यते मृषोद्यं त-दुत्खेयं खन्यते तथा ॥३८॥

कुप्य-भिद्योध्य सिध्य-तिष्य पुष्य-युग्या-ज्य-सूर्य नाम्नि ॥५॥१॥३९॥

एते नव निपात्यन्ते, क्यबन्ता नाम्नि नित्यशः ॥

–॥३४॥३५॥भाव इति किम् ? प्रघात्या सा ॥३ ॥ स्पष्ट॥३७॥३८॥ भिद्य उध्यश्च नद, सिध्य तिष्य पुष्य. नक्षत्रम्, युग्य वाहन गवाश्वादि, आज्य

कुप्यं गोपायितुं योग्यं, धनं गोपाय्यमन्यथा ॥३९॥

दृ-वृग्-स्तु-जुषेति-शासः ॥५॥१॥४०॥

एभ्यः षड्भ्योऽपि धातुभ्यः, क्यप् संजायेत प्रत्ययः ॥
प्रावृत्यः स्तुय आदृत्यो, जुष्य शिष्यस्तथेत्यकः ॥४०॥

ऋदुपान्त्यादकृपिचृदृचः ॥५॥१॥४१॥

ऋकारोपान्त्यधातोः क्यप्, कृप्यादित्रितयान्यतः ॥
वृत्यं वृध्यं तथा कल्प्यं, चर्त्यमर्च्यं सलक्षणम् ॥४१॥

कृ-वृषि-मृजि-शंसि-गुहि-दुहि-जपो वा ॥५॥१॥४२॥

स्यादेभ्यः सप्तधातुभ्यः, क्यप्प्रत्ययो विभाषया ॥
कृत्यं कार्यं सदा वृष्यं, वचनममृतोपमम् ॥४२॥

जि-विपू-न्यो हलि-मुञ्ज-कल्के ॥५॥१॥४३॥

जेः पूनीभ्यां विपूर्वाभ्या, संभवेत् कर्मसु क्रमात् ॥
क्यव् हलिमुञ्जकल्केषु, जित्यो हलिर्बली बलात् ॥४३॥

पदास्वैरिबाह्यपक्ष्ये ग्रहः ॥५॥१॥४४॥

पदाद्यर्थचतुष्के स्यात्, क्यप्प्रत्ययो ग्रहेस्ततः ॥
प्रगृह्यं पदमुन्मत्ता, जना गृह्या न स्वैरिणः ॥४४॥

घृतम्, सूर्य आदित्य ॥३९॥ स्पष्टे ॥४०॥४१॥ एव वर्ष्यम्, मृज्यम्, मार्ग्यम्, शस्यम्, शस्यम्, गुह्यम्, गोह्यम्, दुह्यम्, दोह्यम्, जप्यम्, जाप्यम् ॥४२॥ एव विपूयो मुञ्ज, विनीय कल्क । हलि-मुञ्ज-कल्क इति किम्? जेयम्, विपव्यम्, विनेयम् ॥४३॥ एव ग्रामगृह्या बाह्येत्यर्थः । गुणगृह्या पक्ष्या ॥ ४४ ॥

भृगोऽसंज्ञायाम् ॥५॥१॥४५॥

भृगा धातोरसंज्ञायां, क्यप् प्रत्ययो भवेत्ततः ॥
अन्नवस्त्रादिना पोष्यो, भृत्यो भार्या परिग्रहः ॥४५॥

समो वा ॥५॥१॥४६॥

संपूर्वात् स्याद् भृगो धातोः, क्यप् प्रत्ययो विभाषया ॥
यः सम्भृत्यः स सम्भार्य-स्तुल्यार्थत्वेन सम्मतः॥४६॥

ते कृत्याः ॥५॥१॥४७॥

प्रोक्ताः कृत्संज्ञका एते, घ्यण्-तव्या-नीय-य-क्यपः ॥
कार्यं कर्तव्यमानेय-मास्तिक्यं जिनदैवते ॥ ४७ ॥

णक-तृचौ ॥५॥१॥४८॥

धातोर्णकतृचौ स्याता, प्रत्ययौ कर्तरि ध्रुवम् ॥
पाचकः पाठकः पक्ता, भविता शासिता तथा ॥४८॥

अच् ॥५॥१॥४९॥

धातोरच् प्रत्ययः कामं, कर्तरि जायते ततः ॥
करः पचो हरो गङ्गा-धरो राजा महीधरः ॥४९॥

लिहादिभ्यः ॥५॥१॥५०॥

लिहादिगणसस्थेभ्यो, धातुभ्योऽच् प्रत्ययो भवेत् ॥
लेहः शेपस्तथा देवो, नदी देवी तरी दरी ॥५०॥

सूत्रनवक्रमतिरोहितार्थम् ॥४५॥४६॥४७॥४८॥४९॥५०॥-

ब्रुवः ॥५॥१॥५१॥

ब्रूगो धातोर्भवेन्नित्यं, ब्रुव इत्यचि प्रत्यये ॥
आत्मानं ब्राह्मणं ब्रूते, जनः स ब्राह्मणब्रुवः ॥५१॥

नन्द्यादिभ्योऽनः ॥५॥१॥५२॥

नन्द्यादिगणवर्तिभ्यो, धातुभ्यः स्यादनस्ततः ॥
नन्दनो मदनः सर्व-दमनश्च जनार्दनः ॥ ५२ ॥

ग्रहादिभ्यो णिन् ॥५॥१॥५३॥

एभ्यो णिन् स्याद् ग्रहादिभ्यः, प्रत्ययः शुद्धप्रत्ययः ॥
ग्राही बलात् परस्वस्य, स्थायी न स्याज्जगत्त्रये ॥५३॥

नाम्युपान्त्य-प्री-कृ-गृ-ज्ञः कः ॥५॥१॥५४॥

प्रीमुखेभ्यस्तथा नाम्यु-पान्त्येभ्यः स्यात् कप्रत्ययः ॥
ककारः कित्त्वकार्य्याय, ज्ञो जनो विबुधप्रियः ॥५४॥

गेहे ग्रहः ॥ ५॥१॥५५॥

गेहेऽर्थे स्याद् ग्रहेर्धातोः प्रत्ययः कः ? कप्रत्ययः ॥
न गृहं गृहमित्याहु-र्गृहिणी गृहमुच्यते ॥५५॥

उपसर्गादातो डोऽश्यः ॥५॥१॥५६॥

उपसर्गात् पराच्छ्चैडो, वर्जादादन्तधातुतः ॥
डः प्रत्ययो भवेदाह्वः, मह्वः प्रस्थः सुरस्तथा ॥५६॥

-॥५१॥५२॥५३॥ एव विक्षिप, किर, गिर ॥५४॥ स्पष्टम् ॥५५॥
उपसर्गादिति किम् ? दाय । अश्य इति किम् ? अवश्याय ॥५६॥

व्याघ्राघ्रे प्राणि-नसोः ॥५॥१॥५७॥

प्राणिनि नासिकायाश्च, व्याघ्राघ्रे जिघ्रतेः क्रमात् ॥
डे प्रत्यये निपात्येते, व्याघ्रस्याघ्राऽपि भीषणा ॥५७॥

घ्रा-ध्मा-पा-ट्धे-दृशः शः ॥५॥१॥५८॥

घ्रादिभ्यः पञ्चधातुभ्यः, प्रत्यय शो विधीयते ॥
जिघ्र उद्धम उत्पश्यः, पिब उद्धय आमतः ॥५८॥

साहि-सति-वेद्युदेजि-धारि-पारि-चेतेरनुपसर्गात् ॥५॥१॥५९॥

साह्यादि–सप्तधातुभ्यो, ण्यन्तकेभ्यः शप्रत्ययः ॥
अनुपसर्गकेभ्यः स्यात्, साहयश्चाथ सातयः ॥५९॥

लिम्प–विन्दः ॥५॥१॥६०॥

आभ्यामनुपसर्गाभ्या, शप्रत्ययो विधीयते ॥
लिम्पतीति भवेल्लिम्पः, प्रलिपः सोपसर्गतः ॥६०॥

नि–गवादेर्नाम्नि ॥५॥१॥६१॥

निपूर्वाल्लिम्पतेर्नाम्नि, विन्तेर्गवादिपूर्वकात् ॥
शः स्यात् सुरा निलिम्पाश्च, गोविन्दो गरुडध्वजः ॥६१॥

— स्पष्ट ॥५७॥५८॥ एव वेदय, उद्वेजय, धारय, पारय, चेतय। अनुपसर्गादिति किम्? प्रसाहयिता ॥५९॥ एव विन्द ॥६०॥ एवं इन्द्रविन्द, नाम्नीति किम्? निलिप ॥६१॥

वा ज्वलादि-दु-नी भू ग्रहास्रोर्णः ॥५॥१॥६२॥

स्याज्ज्वलादेर्दुनीभूख्या-दाङ्पूर्वात् स्रवतेस्तथा ॥
अनुपसर्गतो णो वा, ज्वालश्चालो ज्वलश्चलः ॥६२॥

अवहृ-सा-संस्रोः ॥५॥१॥६३॥

अवपूर्वहृसाभ्या णः, संपूर्वात् स्रवतेस्तथा ॥
अवहारोऽवसायश्च, संस्रावश्चापि सस्रवः ॥६३॥

तन्व्यधीण्श्वसातः ॥५॥१॥६४॥

एभ्य आदन्तकेभ्यश्च, धातुभ्यः स्याद् णप्रत्ययः ॥
तानो व्याधश्च प्रत्याय., श्वासोऽवश्याय इत्यलम् ॥६४॥

नृत्-खन्-रञ्जः शिल्पिन्यकट् ॥५॥१॥६५॥

स्याद् नृतिखनिरञ्जिभ्यो, न्वकट् शिल्पिनि कर्तरि ॥
नर्तकी खनकश्चाथ, रजको नर्तिकाऽन्यथा ॥६५॥

गस्थकः ॥५॥१॥६६॥

शिल्पिनि गायतेर्धातोः, कर्तरि प्रत्ययस्थकः ॥
दक्षिणो गाथको लोके, चावङ्कोऽपि मन्यते ॥६६॥

टनण् ॥५॥१॥६७॥

गायतेः शिल्पिनि ज्ञेयः, कर्तरि प्रत्ययष्टनण् ॥
उत्तरार्थः पृथग्योगो, गायनो गायनी तथा ॥६७॥

एव दव, दाव, नय, नाय, भव, भाव, ग्राहो मकरादि, ग्रह सूर्यादि, आस्रव, आस्राव । अनुपसर्गादिति किम् ? प्रज्वल. ॥६२॥ सूत्र-षट्क स्पष्टम् ॥६३॥६४॥६५॥६६॥६७॥६८॥

हः काल-व्रीह्योः ॥५॥१॥६८॥

ह्वाको ह्वाङोऽथवा काल-व्रीह्योः कर्त्रोष्टनण् भवेत् ॥
ह्वायना व्रीहयो ह्वाता, संवत्सरस्तु ह्वायनः ॥६८॥

प्रु-सृ-ल्वोऽकः साधौ ॥५॥१॥६९॥

प्रु सृ-लूभ्यस्त्रिधातुभ्यः, साध्वर्थेभ्यो भवेदकः ॥
साधु प्रवत इत्यर्थे, प्रवकः प्रावकोऽन्यथा ॥६९॥

आशिष्यकन् ॥५॥१॥७०॥

धातोराशिषि गम्यायां, स्यादकन् प्रत्ययः परः ॥
जीवको नन्दको लोके, जीविका नन्दिकाऽन्यथा ॥७०॥

तिक्-कृतौ नाम्नि ॥५॥१॥७१॥

धातोराशिषि गम्यायां, संज्ञायां प्रत्ययाः समे ॥
तिक्कृतश्च भवेयुस्तत्, नन्तिः शान्तिश्च वीरभूः ॥७१॥

कर्मणोऽण् ॥५॥१॥७२॥

धातोरण् प्रत्ययो वाच्य-स्त्रिविधादपि कर्मणः ॥
कुम्भकारो मसीकारः, काण्डलावादयस्तथा ॥७२॥

शीलि-कामि-भक्ष्याचरीक्षिक्षमो णः ॥५॥१॥७३॥

शील्यादिभ्यो भवेत् कर्म-परेभ्यो णो नु प्रत्ययः ॥
धर्मशीला च कल्याणा-चारा वन्दक्षमा क्षमा ॥७३॥

एव सरक, ल्वक ॥६९॥ सूत्रत्रय स्पष्टम ॥७०॥७१॥७२॥ एव धर्मकामा, वायुभक्षा, मुनिप्रतीक्षा ॥७३॥

गायोऽनुपसर्गाट्टक् ॥५॥१॥७४॥

प्रत्ययोऽनुपसर्गाट्टक्, गायतेः कर्मणः परात् ॥
चक्रगो चक्रगी चक्र-सङ्गाय उपसर्गतः ॥७४॥

सुरा-सीधोः पिबः ॥५॥१॥७५॥

नोपसर्गात् परादाभ्या, कर्मभ्यां पिबतेर्नु टक् ॥
सुरापश्च सुरापी च, सीधुपः सीधुपी तथा ॥७५॥

आतो डोऽह्वा-वा-मः ॥५॥१॥७६॥

कर्मणो नोपसर्गाद् ह्वा-वामावर्जितधातुतः ॥
आदन्ताड्डो भवेद् गोदः, स्वर्गह्वायादयोऽपि च ॥७६॥

समः ख्यः ॥५॥१॥७७॥

ख्याधातोः प्रत्ययो डःस्यात्, सम्पूर्वात् कर्मण' परात् ।।
गोसङ्ख्यः पशुसङ्ख्यश्च, नित्यं सङ्ख्याति गोपशून् ॥७७॥

दश्चाङः ॥५॥१॥७८॥

आङो दागस्तथाख्यश्च, भवेद् डः कर्मणः परात् ॥
दायादो दायमादत्ते, स्त्र्याख्य ख्याति स्त्रियं प्रियाम् ॥७८॥

प्राज्ज्ञश्च ॥५॥१॥७९॥

प्रपूर्वाज्ज्ञस्तथा दश्च, डो भवेत् कर्मणः परात् ॥
ज्ञेयं दश्चेति दारूपात्, पथिप्रज्ञः प्रपाप्रदः ॥७९॥

स्पष्टे ॥७४॥७५॥ एव तन्तुवाय धान्यमाय ॥७६॥ सूत्रसप्तक स्पष्टार्थम् ॥७७॥७८॥७९॥–

आशिषि हनः ॥५॥१॥८०॥

आशिषि गम्यमानायां, हन्तेर्डः कर्मणः परात् ॥
शत्रुहो भव भव्यात्मन् ? पापहो दुःखहस्तथा ॥८०॥

क्लेशादिभ्योऽपात् ॥५॥१॥८१॥

क्लेशादिकर्मणो हन्ते–रपपूर्वाद् डप्रत्ययः ॥
जिनः क्लेशापहः सद्यो, यथा सूर्यस्तमोपहः ॥८१॥

कुमारशीर्षाण्णिन् ॥५॥१॥८२॥

कुमारशीर्षकर्मभ्यां, हन्तेर्णिन् प्रत्ययो भवेत् ॥
खलः कुमारघातीव, शीर्षघाती न किं भवेत् ? ॥८२॥

अचित्ते टक् ॥५॥१॥८३॥

हन्तेष्टक् प्रत्ययोऽचित्ते, कर्तरि कर्मणः परात् ॥
वातघ्नं तैलमाचिघ्न, पापघ्नव्रतिव्रतम् ॥८३॥

जायापतेश्चिह्नवति ॥५॥१॥८४॥

कर्मभ्यां टक् भवेज्जाया–पतिभ्यां हन्तिधातुतः ॥
चिह्नवत्कर्तरि ज्ञेयो, जायाघ्नस्तिलकालकः ॥८४॥

ब्रह्मादिभ्यः ॥५॥१॥८५॥

ब्रह्मादिभ्य परात् हन्ते–ष्टक् प्रत्ययो विधीयते ॥
धर्माद् दृढप्रहारीव, ब्रह्मघ्नो गोघ्नोऽपि सन् ॥८५॥

हस्ति–बाहु–कपाटाच्छक्तौ ॥५॥१॥८६॥

हस्ति बाहु-कपाटेभ्यो, हन्तेः शक्तौ तु टक् भवेत् ॥

॥८०॥८१॥८२॥८३॥ [illegible] ॥८४॥ [illegible] ॥८५॥
शक्तावित्ति किम् ? हस्तिघाता [illegible] ॥८ ॥ [illegible] ॥ ८६ ॥

हस्तिघ्नोऽपि च बाहुघ्नः, कपाटघ्नो न किं भवेत् ॥८६॥

नगरादगजे ॥५॥१॥८७॥

नगरात् कर्मणो हन्तेः, कर्तरि गजवर्जिते ॥
टक् व्याघ्रो नगरघ्नः स्या–न्नेभो नगरघातक ॥८७॥

राजघः ॥५॥१॥८८॥

हन्तेष्टक् कर्मणो राज्ञो, घादेशश्च निपात्यते ॥
छद्मना राजघः कश्चिद्, भवेद् विनयरत्नवत् ॥८८॥

पाणिघ–ताडघौ शिल्पिनि ॥५॥१॥८९॥

कर्मभ्यां पाणिताडाभ्या, हन्तेः शिल्पिनि कर्तरि ॥
टक्-घादेशौ निपात्येते, शिल्पी पाणिघताडघ ॥८९॥

कुक्ष्यात्मोदराद् भृगः खिः ॥५॥१॥९०॥

कुक्ष्यात्मोदरकर्मभ्यो, भृग खिः प्रत्ययो भवेत् ॥
कुक्षिमेव बिभर्तीति, नीचः कुक्षिम्भरिः स्मृतः ॥९०॥

अर्होऽच् ॥५॥१॥९१॥

अच् प्रत्ययो भवेद् धातो–रर्हते कर्मणः परात् ॥
पूजामर्हति पूजार्हः, पूजार्हा प्रतिमा तथा ॥९१॥

धनुर्दण्डत्सरुलाङ्गलाङ्कुशर्ष्टियष्टिशक्तितोमरघटाद् ग्रहः ॥५॥१॥९२॥

स्यादेभ्यो दशकर्मभ्यो ग्रहेरच् प्रत्ययो भवेत् ॥

शिल्पिनीति किम् ? पाणिघात, ताडघात ॥८९॥ एवमात्मम्भरि, उदरम्भरि ॥९०॥ स्पष्टम् ॥९१॥ एव त्सरुग्रहः, अङ्कुशग्रह, ऋष्टिग्रह,

धनुर्ग्रहस्तथा दण्ड-ग्रहश्च लाङ्गलग्रह ॥९२॥

सूत्राद् धारणे ॥५॥१॥९३॥

अच् सूत्रकर्मणोऽर्थे चेत्, ग्रहणपूर्वधारणे ॥
ग्रहेः सूत्रग्रहः सूत्र-धारः प्राज्ञोऽथवा मतः ॥९३॥

आयुधादिभ्यो धृगोऽदण्डादेः ॥५॥१॥९४॥

धृगोऽच दण्डादिवर्जादा-युधादेः कर्मणः परात् ॥
भूधरो दण्डधारश्च, कुण्डधारो धनुर्धरः ॥९४॥

हृगो वयोऽनुद्यमे ॥५॥१॥९५॥

कर्मणो हरतेर्धातो-र्गम्ये वयस्यनुद्यमे ॥
अच् स्यान्मनोहरा माला, कस्य नो हरते मनः ॥९५॥

आङः शीले ॥५॥१॥९६॥

आङ् पूर्वाद् हरतेः शीले, प्रत्ययोऽच् कर्मण परात् ॥
पुष्पाण्याहरतीत्येवं-शीलः पुष्पहरः शिशुः ॥९६॥

दृति-नाथात् पशाविः ॥५॥१॥९७॥

कर्मभ्यां दृतिनाथाभ्या-मिः कर्तरि पशौ हृगः ॥
सिंहो नाथहरिः मार-मेयो दृतिहरिस्तथा ॥९७॥

यष्टिग्रह, शक्तिग्रह, तोमरग्रह, घटग्रह ॥९२॥ धारण इति किम्? सूत्र-ग्राह ॥९३॥ स्पष्टम् ॥ उद्यम —उत्क्षेपणमाकाशे धारणं वा तदभावो, स्याऽ-नुद्यम इति किम्? भारहार ॥९५॥ शील इति किम्? पुष्पाहार ॥९६॥ स्पष्टम् ॥९७॥

रजःफलेमलाद् ग्रहः ॥५॥१॥९८॥

रजःफलेमलेभ्यस्तु, कर्मभ्य इर्ग्रहेर्भवेत् ॥
वृक्षः फलेग्रहिः प्रायः, कञ्चुकश्च रजोग्रहिः ॥९८॥

देववातादापः ॥५॥१॥९९॥

कर्मभ्या देववाताभ्या-मापेरिः प्रत्ययो भवेत् ॥
देवानाप्नोति देवापि-र्वातापी राक्षसः श्रुतः ॥९९॥

शकृत्-स्तम्बाद् वत्सव्रीहौ कृगः ॥५॥१॥१००॥

इः कर्मभ्या क्रमादाभ्या, वत्से व्रीहौ च कर्तरि ॥
कृगः शकृत्करिर्वत्सो, व्रीहिः स्तम्बकरिस्तथा ॥१००॥

किंयत्तद्बहोरः ॥५॥१॥१०१॥

एभ्यः कर्मचतुष्केभ्यः, कृगो धातोरप्रत्ययः ॥
किङ्करा यत्कराश्चाथ, बहुकराश्च तत्करा ॥१०१॥

सङ्ख्या-ऽह-र्दिवा विभा-निशा-प्रभा-भा-श्चित्र-कर्त्रा-द्य-न्ता-नन्त-कार बाह्व-रु र्धनु-र्नान्दी-लिपि-लिवि-भक्ति क्षेत्र-जङ्घा-क्षपा-क्षणदा-रजनि-दोषा-दिन-दिवसाट्टः ॥५॥१॥१०२॥

एभ्य एकोनत्रिंशद्भ्य, कर्मभ्यष्ट कृगो भवेत् ॥

एव मलग्रहि ॥९८॥ स्पष्ट सूत्रत्रयम् ॥९९॥१००॥१०१॥ सङ्ख्ये-त्यर्थप्रधानमपि, तन द्विकर इत्याद्यपि। एव सङ्ख्याकर, अहस्कर, विभा-कर, प्रभाकर, भास्कर, चित्रकर, कर्तृकर, आदिकर, अन्तकर,

एकयोक्त्या पुष्पवन्तौ, दिवाकर-निशाकरौ ॥१०२॥

हेतु-तच्छीलानुकूलेऽशब्दश्लोककलहगाथावैर-
चाटुसूत्रमन्त्रपदात् ॥५॥१॥१०३॥

एषु कर्तृषु शब्दादि-वर्जकर्मपरात् कृगः ॥
स्याट्टः श्राद्धकरः श्राद्धो, विद्याऽऽहर्ता यशस्करी ॥१०३॥

भृतौ कर्मणः ॥५॥१॥१०४॥

कृगः कर्मपरात् कर्म-शब्दाद्भृतौ टप्रत्ययः ॥
भृत्यः कर्मकरः कर्म-करी दासी स्वभाग्यतः ॥१०४॥

क्षेमप्रियमद्रभद्रात् खाण् ॥५॥१॥१०५॥

क्षेमादिभ्यश्चतुर्भ्यस्तु, खाणौ स्तः प्रत्ययौ कृगः ॥
क्षेमङ्करः क्षेमकारः, प्रियकारः प्रियङ्करः ॥१०५॥

मेघर्तिभयाभयात् खः ॥५॥१॥१०६॥

एभ्यः कर्मचतुष्केभ्यः, स्यात् करोतेः खप्रत्ययः ॥
आत्माऽभयङ्करः शुद्धः, श्मशानश्च भयङ्करम् ॥१०६॥

प्रियवशाद् वदः ॥५॥१॥१०७॥

स्यात् प्रियवशकर्मभ्यां, परात् खः प्रत्ययो वदेः ॥
प्रियंवदः प्रियो न स्याद्, यदि न स्याद् वशंवदः ॥१०७॥

द्विषन्तपपरन्तपौ ॥५॥१॥१०८॥

तपेर्द्विषत्पराभ्यां खो, ण्यन्ततो ह्रस्वता च मः
द्विषत्तस्य निपात्यन्ते द्विषन्तप परन्तपः ॥१०८॥

परिमाणार्थमितनखात् पचः ॥५॥१॥१०९॥

मित-नख-प्रमाणार्थ—कर्मभ्यः परतः पचेः ॥
खः स्यात् प्रस्थम्पचा स्थाली, मितम्पचः, नखम्पचः॥१०९॥

कूलाभ्रकरीषात् कषः ॥५॥१॥११०॥

ख कूलाभ्रकरीषेभ्य, कर्मभ्य परत कषे ॥
नदी कूलङ्कषा मेघो-ऽभ्रङ्कषो विद्युताऽन्वित ॥११०।

सर्वात् सहश्च ॥५॥१॥१११॥

सहते कषते ख स्यात्, सर्वत कर्मतः परात् ॥
मुनिः सर्वंसहो ज्ञानी, सर्वङ्कषः खलो जनः ॥१११॥

भृ-वृ-जि-तॄ तप-दमश्च नाम्नि ॥५॥१॥११२॥

कर्मतो भ्रादिधातुभ्यः, सहेश्च नाम्नि खो भवेत् ॥
धरा विश्वम्भरा तत्र, शत्रुञ्जयो महागिरिः ॥११२॥

धारेर्धर्च ॥५॥१॥११३॥

नाम्नि धारयतेर्धतो—र्भवेत् ख· कर्मणः परात् ॥
धरादेशश्च भूर्गौश्च, वसुन्धरा धुरन्धरः ॥११३॥

॥ १०८ ॥ १०९ ॥ एव करीषङ्कषा ॥ ११० ॥ स्पष्टम् ॥ ॥१११॥ एव–'कन्या पतिवरा राजा, शत्रुन्तप शत्रुंसह । कृष्णो बलिन्दम साम, रथन्तर प्रगीयते ॥' ॥११२॥ एव सीमन्धर-युगन्धरो जिनो ॥ ११३॥

पुरन्दर भगन्दरौ ॥५॥१॥११४॥

खान्तौ नाम्नि निपात्येते, पुरन्दर–भगन्दरौ ॥
पुरन्दरः सुराधीशो, महाव्याधिर्भगन्दरः ॥११४॥

वाचंयमो व्रते ॥५॥१॥११५॥

खः स्याद् गम्ये व्रते वाचः, कर्मणः परतो यमेः ॥
वाचश्चामन्तता वाच्या, मुनिर्वाचंयमो व्रती ॥११५॥

मन्याण्णिन् ॥५॥१॥११६॥

धातोर्णिन् प्रत्ययो ज्ञेयो, मन्यते कर्मण परात् ॥
शत्रोः पण्डितमानी ना, जायते भुवि कश्चन ॥११६॥

कर्तुः खश् ॥५॥१॥११७॥

खश् प्रत्ययार्थतः कर्तु–र्मन्यतेः कर्मणः परात् ॥
आत्मानं मन्यते सुज्ञं, सुज्ञम्मन्य स आत्मन. ॥११७॥

एज ॥५॥१॥११८॥

धातोरेजयतेः खश् स्यात् , प्रत्ययः कर्मण परात् ॥
स्याज्जनमेजयः सम्यक, समन्तादरिमेजय ॥११८॥

शुनी-स्तन-मुञ्ज-कुला-स्य-पुष्पाद् ट्धे ॥५॥१॥११९॥

ट्धेर्धातो. परश्च खश् स्यात् , कर्मस्य परतो नु खश् ॥
पुष्पन्धयो द्विरेफः स्यात नाहन्त स्यु स्तनन्धया ॥११९॥

नाडीघटीखरीमुष्टिनासिकावाताद् ध्मश्च ॥५।१।१२०॥

नाड्यादिकर्मषट्कात् स्यात्, धमतेर्ध्धेश्च खश् ततः ॥
नाडिन्धमो धमेन्नाडीं, घटिन्धमो घटिन्धयः ॥१२०॥

पाणिकरात् ॥५।१।१२१॥

स्यात् पाणिकरकर्मभ्या, परात् खश् धमतेस्ततः ॥
पाणिन्धमो धमेत् पाणिं, करन्धमः कर धमेत् ॥१२१॥

कूलादुद्रुजोद्वहः ॥५।१।१२२॥

स्यात् कूलात् कर्मणो धातो-रुद्रुजेरुद्वहेश्च खश् ॥
स्यात् कूलमुद्रुजो हस्ती, नदी स्यात् कूलमुद्वहा ॥१२२॥

वहाभ्रात्लिहः ॥५।१।१२३॥

भवेद्वहाभ्रकर्मभ्यां, लिहः खश् प्रत्ययः परः ॥
प्रासादोऽभ्रंलिहो राज्ञो, वहं लेढि वहंलिहः ॥१२३॥

बहुविध्वरुस्तिलात् तुदः ॥५।१।१२४॥

अस्मात् कर्मचतुष्कात् स्यात्, परात् खश् प्रत्ययस्तुदेः ॥
राहुर्विधुन्तुदः काक- स्तिलन्तुदो बहुन्तुदम् ॥१२४॥

ललाटवातशर्द्धात् तपाजहाकः ॥५।१।१२५॥

ललाटवातशर्द्धात् स्यात्, खश् प्रत्ययो यथाक्रमम् ॥

एव नाडिन्धय, खरिन्धम, खरिन्धय, मुष्टिन्धम, मुष्टिन्धय, नासिकन्धम, नासिकन्धय, वातन्धम, वातन्धय ॥१२०॥ सूत्रत्रय स्पष्टम् ॥१२१॥१२२॥१२३॥ एवम् अरुन्तुद पीडाकर, बहुन्तुद युगम् ॥१२४॥

धातोस्तपाजहाकस्तद्, ललाटन्तप आतपः ॥१२५॥

असूर्योग्राद् दृशः ॥५।१।१२६॥

स्यादसूर्योग्रकर्मभ्या, दृशेः खश् प्रत्ययः परः ॥
राजपत्नी मताऽसूर्य्य-म्पश्योग्रम्पश्यभूपतेः ॥१२६॥

इरम्मदः ॥५।१।१२७॥

माद्यतेः खश इरापूर्वात्, श्याभावश्च निपात्यते ॥
इरा सुरा तया माद्येद्, मेघज्योतिरिरम्मदः ॥१२७॥

नग्न-पलित-प्रिया-ऽन्ध-स्थूल-सुभगा-ऽऽढ्य-तदन्ताऽच्व्यर्थेऽच्वेर्भुवः खिष्णुखुकञौ॥५।१।१२८॥

नग्नादिभ्यस्तदन्तेभ्यो-ऽच्व्यन्तेभ्यो भवतेः परौ ॥
स्तः खिष्णुखुकञौ च्व्यर्थे नग्नम्भविष्णुरन्मनाः ॥१२८॥

कृगः खनट् करणे ॥५।१।१२९॥

च्व्यर्थेऽच्व्यन्तनग्नादेः कृगोते करणे खनट् ॥
सुभगङ्करणं रूपं, तथाऽन्धङ्करणः स्मरः ॥१२९॥

भावे चाशिताद् भुवः खः ॥५॥१॥१३०॥

खो भावे करणे चार्थे, भवतेराशिताद्भवेत् ॥
सदाशितम्भवस्ते य–द्धाशितम्भव ओदनः ॥१३०॥

नाम्नो गमः खड्डौ च विहायसस्तु विहः ॥५॥१॥१३१

खड्डखाः स्युर्गमेर्नाम्नो, विहायसो विहस्तथा ॥
विहङ्गो विहगः पक्षी, पतत्री च विहङ्गमः ॥१३१॥

सुगदुर्गमाधारे ॥५॥१॥१३२॥

सुदुर्भ्यां गच्छतेर्धातो–राधारे डो निपात्यते ॥
गूर्जरेऽध्वा सुगो दुर्गो, दक्षिणे बहुकर्कशः ॥१३२॥

निर्गो देशे ॥५॥१॥१३३॥

निस्पूर्वाद् गच्छतेर्देशे, आधारे डो निपात्यते ॥
अस्मिन् निर्गम्यते देशे, निर्गो निर्गमनोऽन्यथा ॥१३३॥

शमो नाम्न्यः ॥५॥१॥१३४॥

शमो नाम्नः पराद्धातोः, संज्ञायामो भवेत् परः ॥
शम्भवशङ्करी दीक्षा, राकायाँ मार्गशीर्षके ॥१३४॥

पार्श्वादिभ्यः शीङः ॥५॥१॥१३५॥

पार्श्वादिनामतः शीङो, धातोरः प्रत्ययो भवेत् ॥
दिग्धसहशयः पार्श्व–शयः पृष्ठशयस्तथा ॥१३५॥

स्पष्टम् ॥१३०॥ एव तुरग, तुरङ्ग, तुरङ्गम, इत्यादि ॥
स्पष्टे ॥१३२॥१३३॥ शम्भवात्यस्याहंत शङ्करी श्रेयस्करी दीक्ष पूर्णिमाया जातेति यावत् ॥१३४॥ सूत्रद्वये बहुवचनं यथोचित ॥१३५॥

ऊर्ध्वादिभ्यः कर्तुः ॥५॥१॥१३६॥

कर्तृवाचिभ्य एभ्यः शीङ्-धातोरः प्रत्ययो भवेत ॥
स्युरुत्तानशया डिम्भा, ऊर्ध्वशयश्च गोव्रज ॥१३६॥

आधारात ॥५॥१॥१३७॥

आधारान्नामतः शीङो, धातोरः प्रत्ययो भवेत ॥
खशयो हृच्छयो गर्त-शयः कुशशयोऽपि च ॥१३७॥

चरेष्टः ॥५॥१॥१३८॥

आधारवाचिनो नाम्न-श्चरेष्टः प्रत्ययो भवेत ॥
भिल्लो वनेचरः क्रूरो, यातुधानो निशाचरः ॥१३८॥

भिक्षासेनाऽऽदायात ॥५॥१॥१३९॥

भिक्षादिभ्यस्त्रिशब्देभ्यो, धातोष्टश्चरतेर्भवेत् ॥
तापसव्यञ्जनः सेना-चरो भिक्षाचरो व्रती ॥१३९॥

पुरोऽग्रतोऽग्रे सर्त्तेः ॥५॥१॥१४०॥

सर्त्तेर्धातोर्विधातव्य, एभ्यः परष्टप्रत्ययः ॥
अग्रेसरः स्वयूथ्यानां, पुरस्सरोऽग्रतः सरः ॥१४०॥

पूर्वात् कर्तुः ॥५॥१॥१४१॥

स्यात् कर्तृवाचिनः पूर्वात्, परात् सर्त्तेष्टप्रत्ययः ॥
पूर्वसरः सरेत पूर्वः, पूर्वो भूत्वाऽपि सरन् ॥१४१॥

स्थापास्नात्रः कः ॥५॥१॥१४२॥

नाम्नः परेभ्य एभ्य कः, प्रत्ययः स्यात्? कप्रत्ययः ॥
धर्मत्रमातपत्रश्चा-श्वस्थो द्विपो नदीष्णकः ॥१४२॥

शोकापनुद–तुन्दपरिमृज-स्तम्बेरम-कर्णेजपं प्रिया-लस–हस्ति–सूचके ॥५॥१॥१४३॥

कान्ता एते निपात्यन्ते, यथासङ्ख्यं प्रियादिषु ॥
न शोकापनुदः कर्णे–जपः स्तम्बेरमो द्विपः ॥१४३॥

मूलविभुजादयः ॥५॥१॥१४४॥

यथादर्शं निपात्यन्ते, कान्ता एते सदर्थकाः ॥
कुमुदं कैरवं ज्ञेयं, स्यान्मूलविभुजो रथः ॥ १४४ ॥

दुहेर्डुघः ॥५॥१॥१४५॥

नाम्नः पराद् दुहेर्धातो–र्जायते डुघप्रत्ययः ॥
विद्या कामदुघा नित्यं, भवेद् धर्मदुघाऽपि सा ॥१४५॥

भजो विण् ॥५॥१॥१४६॥

धातोर्विण् प्रत्ययो ज्ञेयो, भजतेर्नामतः परात् ॥
पादभागर्द्धभागर्द्धं, भजते च प्रभाग् विभाक् ॥१४६॥

मन्-वन्-क्वनिप्-विच् क्वचित् ॥५॥१॥१४७॥

नाम्नो लक्ष्यानुसारेण, धातोर्मन्–वन्–क्वनिप्–विचः ॥

स्पष्टम् ॥१४२॥ शोकापनुद प्रिय, कर्णेजपोऽतिखल, तुन्दपरिमृजोऽलस, एरिति किम्? शोकोपनोदो धर्माचार्ये ॥१४३॥ सूत्रपञ्चक स्पष्टार्थम् ॥१४४॥ ४५॥१४६॥१४७॥

इन्द्रशर्मा विजावा च, सुधीवा पाप्मरेट् तथा ॥१४७॥

क्विप् ॥५॥१॥१४८॥

नाम्नः परात्सर्वधातोः, प्रत्ययः क्विप् क्वचित् क्वचित् ॥
मित्रभूः प्रतिभूः ब्राः पाः, उखास्रत् शालस्त्रः प्रम. ॥१४८॥

स्पृशोऽनुदकात् ॥५॥१॥१४९॥

उदकवर्जितान्नाम्नः, स्पृशेः क्विप् प्रत्ययो भवेत् ॥
मर्म स्पृशति साधूना, मर्मस्पृग् दुर्जनो जनः ॥१४९॥

अदोऽनन्नात् ॥५॥१॥१५०॥

स्यादन्नवर्जितान्नाम्नः प्रत्ययः क्विप् परादतः ॥
आमात् सस्यात् फलात्तत्-द्भोक्ताऽन्नादो यथायथम् ॥

क्रव्यात्-क्रव्यादावामपक्वादौ ॥५॥१॥१५१॥

क्रव्यात्-क्रव्यादशब्दौ क्विन्-णन्ता मा३ यथाक्रमम् ॥
आमपक्वार्थकौ क्रव्यात् . क्रव्यादो नरकङ्गमी ॥१५१॥

त्यदाद्यन्यसमानादुपमानाद् व्याप्ये दृशः टक्-
सकौ च ॥५॥१॥१५२॥

कर्तुर्णिन् ॥५॥१॥१५३॥

कर्तृवाच्युपमानेभ्यो, धातोर्णिन् प्रत्ययो भवेत् ॥
उष्ट्रक्रोशी तथा सिंह-नर्दिनः खरनादिनः ॥१५३॥

अजातेः शीले ॥५॥१॥१५४॥

जात्यर्थभिन्ननाम्नो णिन्, शीलार्थाद् धातुनो भवेत् ॥
उष्णभोजी भवेत् कश्चि-च्छीतभोजी तथाऽपरः ॥१५४॥

साधौ ॥५॥१॥१५५॥

नाम्नः साध्वर्थकाद् धातो, प्रत्ययो णिन् विधीयते ॥
साधुकारी तथा साधु-दायी क्वापि न दुःखितः ॥१५५॥

ब्रह्मणो वदः ॥५॥१॥१५६॥

ब्रह्मन्शब्दात् पराद् धातो-र्वदेर्णिन् प्रत्ययो भवेत् ॥
वदन्ति ब्रह्म ब्रह्माणं, नरास्ते ब्रह्मवादिनः ॥१५६॥

व्रताभीक्ष्ण्ये ॥५॥१॥१५७॥

पौनःपुन्ये व्रते चापि, धातोर्णिन् नामतः परात् ॥
साधुः स्यात् स्थण्डिलस्थायी, सौराष्ट्रास्तक्रपायिनः ॥१५७

करणाद् यजो भूते ॥५॥१॥१५८॥

करणवाचिनो नाम्नो, भूतार्थाद् णिन् भवेद् यजेः ॥
भूदेवा इव भूदेव्यः, किमग्निष्टोमयाजिनः ? ॥१५८॥

स्पष्टम् ॥ १५३ ॥ एवं प्रस्थायी । अजातेरिति किम् ? शालीन् भोक्ता शील इति किम् ? उष्णभोजी मन्द ॥१५४॥ स्पष्टे ॥१५५॥१५६॥ एवं स्थण्डिलवर्ती, क्षीरपायिण उशीनरा इत्यादि ॥ १५७ ॥स्पष्टम् ॥ १५८ ॥

निन्द्ये व्याप्यादिन् विक्रियः ॥५॥१॥१५९॥

व्याप्यान्नाम्नो भवेद् भूते-ऽर्थे क्रीणातेर्विपूर्वकात् ॥
कुत्सिते कर्तरीन् सोम विक्रयी तैलविक्रयी ॥१५९॥

हनो णिन् ॥५॥१॥१६०॥

हन्तेर्भूतार्थकाद् व्याप्या-न्निन्द्ये कर्तरि णिन् भवेत् ॥
पितृव्यघातिन् रुचि-स्त्रीभान्मातुलघातिनः ॥१६०॥

ब्रह्म-भ्रूण-वृत्रात् क्विप् ॥५॥१॥१६१॥

भूतार्थात् क्विप् भवेद् हन्ते-र्ब्रह्मादिकर्मणः परात् ।
ब्रह्महा भ्रूणहा पापो, वृत्रहा निर्जगत्त्रिप. ॥ १६१ ॥

कृगः सु-पुण्य पाप कर्म-मन्त्र-पदात् ॥५॥१॥१६२॥

भूतार्थतः कृगः क्विप् सोः, पुण्यादिकर्मपञ्चकात् ॥
सुकृत् स्यात् पुण्यकृत् कश्चित्, कर्मकृत् पापकृत् परः॥१६२॥

सोमात् सुग. ॥५॥१॥१६३॥

सोमाद् व्याप्यात् परात् क्विप् स्यात्, भूतार्थाद्धातुतः सुग ॥
सोमसुत् सुतवान् सोम, सुगमाचम्नु मयप. ॥१६३॥

अग्नेश्चेः ॥५॥१॥१६४॥

अग्नेर्व्याप्यात् परात् क्विप् स्यात् भूतार्थतश्चिधातुत. ॥
अग्निचिच्चितवानग्नि, तुल्यचायन्ततोऽन्यत ॥१६४॥

कर्मण्यग्न्यर्थे ॥५॥१॥१६५॥

चिनोतेः कर्मणि क्विप् स्या-दग्न्यर्थे कर्मणः परात् ॥
भूतेऽर्थे श्येनचिद् वह्निः, कङ्कचिद्रथचक्रचित् ॥१६५॥

दृशः क्वनिप् ॥५॥१॥१६६॥

कर्मणः पश्यतेर्धातो-र्भूतेऽर्थे प्रत्ययः क्वनिप् ॥
पारदृश्वा सुविद्यानां, हेमचन्द्रो मुनीश्वरः ॥ १६६ ॥

सहराजभ्यां कृग्युधेः ॥५॥१॥१६७॥

स्यात् क्वनिप् सहराजभ्यां, करोतेर्युध्यतेस्तथा ॥
भूतेऽर्थे सहकृत्वा स, राजकृत्वा महारथः ॥१६७॥

अनोर्जनेर्डः ॥५॥१॥१६८॥

भूतार्थादनुपूर्वात् स्या-ज्जनेर्डः कर्मणः परात् ॥
पुमासमनुजातो यः, पुमनुजः स गीयते ॥ १६८ ॥

सप्तम्याः ॥५॥१॥१६९॥

भूतार्थाद् डो जनेर्धातोः, स्यात् सप्तम्यन्तनामतः ॥
अप्सु जातं भवेदब्ज-मप्सुजं पङ्कजन्तथा ॥ १६९ ॥

अजाते पञ्चम्याः ॥५॥१॥१७०॥

पञ्चम्यन्तादजात्यर्थाद् , भूतार्थाद् डो जनेर्भवेत् ॥
सुखं सन्तोषज दुःख, लोभजं सङ्गजो गुणः ॥ १७० ॥

—॥१६५॥१६६॥ एवं सहयुध्वा, राजयुध्वा ॥१६७॥ सप्टे ॥१६८॥
॥१६९॥ अजातेरिति किम् ? गजात् जात ॥१७०॥

क्वचित् ॥५॥१॥१७१॥

अन्यत्रापि भवेदुक्तात्, क्वचिड्डःयानुसारतः ॥
डप्रत्ययो द्विजो द्वाभ्या, जातः क्विञ्जोऽधिजोऽनुजः ॥१७१॥

सुयजोर्ङ्वनिप् ॥५॥१॥१७२॥

सुनोतेर्यजतेश्चापि, भूतेऽर्थे प्रत्ययो ङ्वनिप् ॥
इष्टवानिति यज्वा ना, सुत्वा ना सुतवानिति ॥१७२॥

जॄषोऽतृ ॥५॥१॥१७३॥

भूतार्थाज्जीर्यतेर्धातोः, सम्भवेदतृप्रत्ययः ॥
जीर्यति स्म जरन् जीनो, वृद्धो जीर्णश्च जीर्णवान् ॥१७३॥

क्त–क्तवतू ॥५॥१॥१७४॥

स्याताम् क्तक्तवतू धातो–र्भूतार्थतः सदर्थकौ ॥
स्तुतस्त्वया जिनो भाग्या–दर्हन्तं स्तुतवानहम् ॥१७४॥

॥ इति पञ्चमाध्याये प्रथमः पादः ॥

अथ द्वितीयः पादः ॥

श्रुसदवस्भ्यः परोक्षा वा ॥५।२।१॥

भूतार्थेभ्यः परोक्षा वा, त्रिभ्य एभ्यो विधीयते ॥
अनूवासोपशुश्रावो-पससादात्युपाशृणोत् ॥ १ ॥

तत्र क्वसुकानौ तद्वत् ॥५।२।२॥

परोक्षाविषये धातोः, क्वसुः कानश्च प्रत्ययः ॥
परोक्षावच्च चक्राणः, पेचानः शुश्रुवाँस्तथा ॥२॥

वेयिवदनाश्वदनूचानम् ॥५।२।३॥

भूतेऽर्थे क्वसुकानान्ताः, कर्तरि वा निपातिताः ॥
एतेऽनाश्वाननूचानः समीयिवानगादुपैत् ॥ ३ ॥

अद्यतनी ॥५।२।४॥

भूतेऽर्थे वर्तमानात् स्यात्, धातोरद्यतनी परा ॥
भव्यानामघनाशाय, पार्श्वोऽभूत् सर्वशर्मदः ॥४॥

विशेषाविवक्षाव्यामिश्रे ॥५।२।५॥

विशेषस्याविवक्षाया, व्यामिश्रे चापि धातुतः ॥
भूतेऽर्थेऽद्यतनी ज्ञेया-ऽकार्षीद्रामोऽगमद् वनम् ॥५॥

एवम् उपाश्रौषीत्, उपासीदत्, उपासदत्, अन्ववात्सीत्, अन्ववसत् ॥१॥ एवं सेदिवान्, ऊपिवान् इत्यादि ॥ २ ॥ पक्षे उपेयाय, नाशीत्, नाश्नात्, नाश, अन्ववोचत्, अन्ववक्, अन्वब्रवीत्, अनूवाच ॥ ३ ॥ स्पष्टम् ॥४॥ अनद्यतनादिविशेषाविवक्षायां व्यामिश्रणे च सति भूतार्थाद् धातोरद्यतनी स्यात् इति स्पष्टोऽर्थः, अद्य श्वो वाऽभुक्ष्महि इत्यादि ॥५॥

रात्रौ वसोऽन्त्ययामास्वप्तर्यद्य ॥५॥२॥६॥

वसेर्निश्यन्त्ययामासं-स्पृष्टर्यद्यतनी भवेत् ॥
भूते त्वं क्वोपितोऽमुत्रा-वात्समित्याह कश्चन ॥ ६ ॥

अनद्यतने ह्यस्तनी ॥५॥२॥७॥

स्यादनद्यतने भूते-ऽर्थे धातोर्ह्यस्तनी परा ॥
अकरोद्भवद्भव्य, तुर्येऽह्नि नाद्य दुःस्थितेः ॥७॥

ख्याते दृश्ये ॥५॥२॥८॥

भूतेऽनद्यतने ख्याते, दृश्ये च ह्यस्तनी भवेत् ॥
सोऽराष्ट्रानजयत् सिद्धः, कर्ण्ठ चक्रे च भार गाम् ॥८॥

अयदि स्मृत्यर्थे भविष्यन्ती ॥५॥२॥९॥

स्मृत्यर्थोपपदे भूता-नद्यतनेऽयदि धातुतः ॥
भविष्यन्त्यभिजानासि ? कच्छ्यामस्तत्र वत्सगान् ॥९॥

वाकाङ्क्षायाम् ॥५॥२॥१०॥

वाऽऽकाङ्क्षाया भविष्यन्ती, स्मृत्यर्थादि च ह्यस्तनत् ॥

स्मरसि मित्र ? वत्स्यामः, काश्मीरेष्ववसाम वा ॥ १० ॥

कृतास्मरणातिनिह्नवे परोक्षा ॥५॥२॥११॥

कृतस्यास्मरणेऽत्यन्ता-पह्नवे चापि धातुतः ॥
परोक्षा किल सुप्तोऽहं, विललाप न सङ्गतम् ॥ ११ ॥

परोक्षे ॥५॥२॥१२॥

परोक्षेऽर्थे परोक्षा स्याद्, भूतानद्यतने किल ॥
रामो बभूव सन् राजा, धर्मं दिदेश तीर्थकृत् ॥१२॥

ह-शश्वद्-युगान्तःप्रच्छ्ये ह्यस्तनी वा ॥५॥२॥१३॥

ह शश्वति युगान्तः स्यात्, प्रष्टव्ये ह्यस्तनी तथा ॥
भूतानद्यतनाद्यर्थे, परोक्षा चेति हाऽकरोत् ॥ १३ ॥

अविवक्षिते ॥५॥२॥१४॥

धातुतो ह्यस्तनी ज्ञेया, परोक्षस्याविवक्षिते ॥
अभवत् सगरो राजा-ऽहन् कंसं नन्दनन्दनः ॥१४॥

वाद्यतनी पुरादौ ॥५॥२॥१५॥

परोक्षे चापरोक्षे च, भूतानद्यतने नवा ॥

नद्यतनाद्यादिति 'स्मृत्यर्थादि च पूर्ववदि' त्यस्यभाव । आकाङ्क्षाया-क्रिया-न्तराकाङ्क्षाया सत्याम् । तथा चोदाहरणे तत्रौदन भोक्ष्यामहे अभुञ्जमहि वेत्य-नुसन्धेयम् ॥१०॥ कलिङ्गेषु ब्राह्मणो हतस्त्वया ? नाहं कलिङ्गान् जगाम इत्यत्यन्तनिह्नवोदाहरणम् ॥११॥ स्पष्टम् ॥१२॥ पञ्चवर्षमित कालो युगस्त-न्मध्यमन्तरं, एवम् इति ह चकार, शश्वदकरोत्, शश्वच्चकार, किमगच्छ-स्त्वं मथुराम् ?, किं जगन्थ त्वं मथुराम् ? ॥१३॥ स्पष्टम् ॥१४॥ पक्षे अपुर्वां,

पुराद्युपपदेऽव्यात्सु–रिह छात्राः पुराऽवसन ॥ १५ ॥

स्मे च वर्तमाना ॥५॥२॥१६॥

पूर्वोक्तार्थे स्म शब्दे च, पुराशौ चापि धातुनः ॥
वर्तमाना तदा वक्ति, पृच्छन्ति स्म पुराधमम् ॥ १६ ॥

ननौ पृष्टोक्तौ सद्वत् ॥५॥२॥१७॥

पृष्टोक्तौ तु ननौ भूते, सद्वज्ज्ञायेत धातुतः ॥
किमकार्षीः कटं चैत्र ? ननु दत्र ? करोमि भोः ? ॥१७॥

नन्वोर्वा ॥५॥२॥१८॥

नन्वोस्तु पूर्वयोर्भूते, वर्तमाना नरा मता ॥
धातुतः सा च सद्वद् न, करोमि भो अह कटम् ।१८।

सति ॥५॥२॥१९॥

सत्यर्थेऽवस्थिताद् धातो–र्वर्तमानाविभक्तयः ॥
विद्वांसो न हि सीदन्ति, पश्येश स्वदेशगन् ॥ १९ ॥

शत्रानशावेष्यति तु सस्यौ ॥५॥२॥२०॥

सत्यर्थेऽवस्थिताच्छत्रा–नशौ स्येष्यति धातुतः ॥

सस्यौ तौ यान् शयानश्च, यास्यन् शयिष्यमाणकः ॥२०॥

तौ माङ्याक्रोशेषु ॥५॥२॥२१॥

माङ्याक्रोशेषु धातोस्तौ, स्याता शत्रानशौ परौ ॥
मा जीवन् यः परावज्ञा-दुःखदग्धोऽपि जीवति ॥२१॥

वा वेत्तेः क्वसुः ॥५॥२॥२२॥

सत्यर्थेऽवस्थिताद् वेत्ते-र्वा क्वसुप्रत्ययो भवेत् ॥
साधुस्तत्त्व विदन् विद्वान्, वेत्तीदं विदुषा कृतम् ॥२२॥

पूङ्-यजः शानः ॥५॥२॥२३॥

पूङ्-यजिभ्या सदर्थाभ्या, परः स्यात् शानप्रत्ययः ॥
पवमानो भवेत् कश्चिद्, यजमानस्तथापरः ॥२३॥

वयःशक्ति-शीले ॥५॥२॥२४॥

धातोः सदर्थकादेषु, गम्येषु शानप्रत्ययः ॥
गच्छमानाः स्त्रियं केचिन् निन्दमानाः परान् परे ॥२४॥

धारीङोऽकृच्छ्रेऽतृश् ॥५॥२॥२५॥

अकृच्छ्रेऽवस्थिताद्धारे-रिङश्चातृश् सदर्थतः ॥
अधीयन् द्रुमपुष्पीय-माचाराङ्गञ्च धारयन् ॥२५॥

सुग्द्विषार्हः सत्रिशत्रुस्तुत्ये ॥५॥२॥२६॥

सुगः सत्रिणि शत्रौ तु, द्विषोऽर्हः स्तुत्य इष्यते ॥

एव मा पचन् वृषलो ज्ञास्यति, मा पचमानोऽसौ मर्तुकाम । वृत्तिस्थोदाहरण नेकार्थमेव 'तस्या जननिरेवास्तु, जननीक्लेशकारिण' ॥ २१ ॥ स्पष्टे ॥२२॥२३॥ एव समाश्नाना ॥२४॥ अकृच्छ्र सुखसाध्यम् ॥ २५ ॥ एव

कर्तयंतृश छिषन् चौरं, पूजामर्हन् विचार्यताम् ॥२६॥

तृन् शीलधर्मसाधुषु ॥५॥२॥२७॥

शीले धर्मे च साधौ च, धातोस्तृन् प्रत्ययो भवेत् ॥
कर्ता कटं गुरून् ध्याता-ऽध्येता शास्त्रं च धार्मिकः ॥२७॥

भ्राज्यलङ्कृग्निराकृग्भूसहिरुचिवृतिवृधिचरि-प्रजनापत्रप इष्णुः ॥५॥२॥२८॥

इष्णुरेभ्यो नु शीलादि-सदर्थेभ्यो विधीयते ॥
साधुर्नालङ्करिष्णुर्यद्, भ्राजिष्णुस्तेजसा स्वयम् ॥२८॥

उदः पचि-पति-पदि-मदेः ॥५॥२॥२९॥

उत्पूर्वेभ्यो भवेदेभ्यः, शीलादाविष्णुप्रत्ययः ॥
उन्मदिष्णुर्जनो लोके, निन्द्यते बुद्धिमानपि ॥२९॥

भूजेः ष्णुक् ॥५॥२॥३०॥

शीलादौ वर्तमानाभ्यां, भूजिभ्यां ष्णुक् भवेत् परः ॥
जिष्णुरिन्द्रो महासत्त्वः, शिशुर्भूष्णुर्नयान्वितः ॥३०॥

स्था-ग्ला-म्ला-पचि-परिमृजि-क्षेः स्नुः ॥५॥२॥३१॥

शीलादौ स्थादिधातुभ्यः, स्नुप्रत्ययो विधीयते ॥
ग्लास्नुर्म्लास्नुस्तथा पक्ष्णु, परिमार्क्ष्णुर्जनः पृथक् ॥३१॥

सर्वे सुन्वन्त, एष्विति किम्? सुरा सुनोति ॥२६॥ स्पष्टम् ॥२७॥ एवं निराकरिष्णु, भविष्णु, सहिष्णु रोचिष्णु, वर्तिष्णु, वर्द्धिष्णु, चरिष्णु, प्रजनिष्णु, अपत्रपिष्णु ॥२८॥ एवम् उत्पचिष्णु, उत्पतिष्णु, उत्पदिष्णु ॥२९॥ स्पष्टम् ॥३०॥ एवं स्थास्नु, क्षेष्णु ॥३१॥

त्रसि-गृधि-धृषि-क्षिपः क्नुः ॥५॥२॥३२॥

शीलादौ वर्तमानेभ्य, एभ्यः क्नुप्रत्ययो भवेत् ॥
त्रस्नुर्गृध्नुस्तथा धृष्णु-र्निन्दकः क्षिप्णुरुच्यते ॥३२॥

सन् भिक्षाशंसेरुः ॥५॥२॥३३॥

सन्नन्ताद् धातुतो भिक्षा-ऽऽशंसिभ्यां चोर्भवेत् परः ॥
श चिकीर्षुर्न लिप्सुः स्याद्, भिक्षुराशंसुकः शुभम् ॥३३॥

विन्द्विच्छू ॥५॥२॥३४॥

भवेद्वेत्तीच्छतिभ्यामु-र्निपात्येते क्रमात्तथा ॥
नुपान्त्यच्छान्तकादेशौ, विन्दुर्ज्ञानीच्छुरिच्छुकः ॥३४॥

शृ-वन्देरारुः ॥५॥२॥३५॥

स्याच्छीलादिसदर्थाभ्या-माभ्यामारुः परस्ततः ॥
शरारुर्हिंसकः प्रोक्तो, वन्दारुः स्तुतिकारकः ॥३५॥

दा-ट्धे-सि-शद-सदो रुः ॥५॥२॥३६॥

शीलादौ वर्तमानेभ्य, एभ्यो रुः प्रत्ययो भवेत् ॥
दारुर्धारुस्तथा सेरुः, शद्रुः सद्रुर्विचार्यताम् ॥३६॥

शीङ्-श्रद्धा-निद्रा-तन्द्रा-दयि-पति-गृहि-स्पृहेरालुः ॥५॥२॥३७॥

शीलादिकसदर्थेभ्य, एभ्यः स्यादालुप्रत्ययः ॥

सूत्रपञ्चकं स्पष्टम् ॥३२॥३३॥३४॥३५॥३६॥ एवं शयालु .

निद्रालुर्निद्रयाक्रान्तो, दयालुर्दययान्वितः ॥३७॥

डौ सासहि-वावहि चाचलि पापतिः ॥५॥२॥३८॥

यङन्ता डौ निपात्यन्ते, चत्वार एतके यथा ॥
शीलादौ सासहिर्वाव-हिश्चाचलिश्च पापतिः ॥३८॥

सस्त्रि-चक्रि-दधि-जज्ञि-नेमिः ॥५॥२॥३९॥

एते शीलादिकार्थाः स्यु-र्द्व्युंक्तमन्तो डिप्रत्ययाः ॥
निपात्यास्तद् दधिर्जज्ञिः, सस्त्रिश्चक्रिश्च नेमिर्यत् ॥३९॥

शॄ-कम-गम-हन वृष-भू-स्थ उकण् ॥५॥२॥४०॥

शीलादिकसदर्थेभ्य, एभ्य उकण् परो भवेत् ॥
वर्षासु वार्षुको मेघः, कामुके भावुको भवेत् ॥४०॥

लष-पत-पदः ॥५॥२॥४१॥

शीलाद्यर्थे लषादिभ्यः, स्यादुकण् प्रत्ययः परः ॥
स्या उपपादुको यद्वा, प्रपातुकोऽभिलाषुकः ॥४१॥

भूषा-क्रोधार्थ-जु-सृ-गृधि-ज्वल-शुचश्चानः॥५॥२॥४२॥

भूषाक्रोधार्थकेभ्योऽनो, ज्वादेर्लषादितस्तथा ॥
शीलापौ भूषणः कोऽपि क्रोधनः कोऽपि शोचनः ॥४२॥

श्रद्धालु, तन्द्रालु, पतयालु, गृहयालु, स्पृहयालु। ॥३७॥ स्पष्टे॥३८॥३९॥
एव शारुक, आगामुक॰, घातुक, स्थायुक ॥४०॥ स्पष्टम् ॥ ४१ ॥
एव कोपन॰, जवन, सरण गर्द्धन, ज्वलन अभिलषण, पतन, अथस्य
पदन ॥ ४२ ॥

चलशब्दार्थादकर्मकात् ।।५।।२।।४३।।

शब्दार्थाच्चलनार्थाच्चा–कर्मकाद् धातुतः परः ।।
अनः शीलादिकार्थे स्यात्, कम्पन शब्दनस्तथा ।।४३।।

इङितो व्यञ्जनाद्यन्तात् ।।५।।२।।४४।।

व्यञ्जनमादिरन्तश्च, तस्माद् ङितस्तथेदित ।।
स्यादनः शयिता भीमा–सनो वर्द्धन एधिता ।।४४।।

न णिङ्-य-सूद-दीप-दीक्षः ।।५।।२।।४५।।

णिङन्तयान्त सूदादि–धातुभ्यो नो भवेदनः ।।
दयिता सूदिता भात्र–यिनोऽपुच्छयिता यथा ।।४५।।

द्रम–क्रमो यङः ।।५।।२।।४६

द्रमतेः क्रमतेश्चापि, शीलाद्यर्थे यङन्ततः ।।
स्यादनः प्रत्ययो दन्द्र–मणश्चङ्क्रमणस्तथा

यजि–जपि–दंशि–वदादूकः ।।५।।

एभ्यो भवेद्यङन्तेभ्यः, शीलादावूकप्रत्ययः ।।
यायजूकः पुरा लोको, जञ्जपूकोऽधुनातनः

जागुः ।।५।।२।।४८।।

शीलादौ वर्तमानात् स्या–ज्जागर्तेरूकप्रत्ययः
जागरूको जनः किञ्चि–न्नो

अकर्मकादिति किम्' पठिता विद्याम् ।
वसिता वस्त्रम् ।।७४।। एव क्षमायिता, दीपिता,
।।४६।। एव दन्दशूकः, वावदूक ।।४७।। स्पष्टम्

शमष्टकाद् घिनण् ॥५॥२॥४९॥

शीलादौ स्यात् शमाद्यष्ट–धातुभ्यः प्रत्ययो घिनण् ॥
शमी श्रमी क्षमी चाथा–प्रमादी नावसीदति ॥४९॥

युज-भुज-भज-त्यज-रञ्ज-द्विष-दुष-द्रुह-दुहा-भ्याहनः ॥५॥२॥५०॥

युजादिदशधातुभ्यः, शीलादौ प्रत्ययो घिनण् ॥
त्यागी योगी न रागी स्याद्, द्वेषिणो द्रोह्दिोषिणः॥५०॥

आङः क्रीडमुषः ॥५॥२॥५१॥

आङः क्रीडमुषाभ्यां स्या–च्छीलादौ प्रत्ययो घिनण् ॥
स्यादाक्रीडी तथाऽऽमोषी, वञ्चत्यात्मानमात्मना ॥५१॥

प्राच्च यमयसः ॥५॥२॥५२॥

प्रादाङश्च पराभ्यां स्या–दाभ्यां शीलादिके घिनण् ॥
यः प्रयामी स चायामी, मुधाऽऽयासिप्रयासिनौ ॥५२॥

मथलपः ॥५॥२॥५३॥

प्रात् पराभ्यां भवेदाभ्यां, शीलादौ प्रत्ययो घिनण् ॥
प्रमाथी भव दोषाणां, प्रलापी मा भव क्वचित् ॥५३॥

वेश्च द्रोः ॥५॥२॥५४॥

वेः प्राच्च द्रवतेर्धातोः, शीलादौ प्रत्ययो घिनण् ॥
आदित्यो हिमविद्रावी, प्रद्राव्यर्हस्तमस्ततेः ॥५४॥

एवं दमी, तमी, भ्रमी, क्लमी ॥४९॥ एवं भोगी, भागी, दोही, अभ्याघाती । अकर्मकादित्येव–गां दोग्धा ॥५०॥ सूत्रसप्तकं स्पष्टम् ॥५१॥५२॥ ॥ ५३ ॥ ५४ ॥

विपरिप्रात् सर्त्तेः ॥५॥२॥५५॥

शीलादौ विपरिप्रेभ्यः, सर्त्तेः स्यात् प्रत्ययो घिनण् ॥
विसारी परिसारी च, प्रसारी च यथास्थलम् ॥५५॥

समः पृचैप्-ज्वरेः ॥५॥२॥५६॥

समो ज्वरेः पृणक्तेश्च, शीलादौ प्रत्ययो घिनण् ॥
सम्पर्की दुष्टलोकानां, सञ्ज्वरी किं न जायते ॥५६॥

संवेः स्रजः ॥५॥२॥५७॥

शीलादौ वर्तमानात् स्यात्, संविभ्यां सृजतेर्घिनण् ॥
भव्यात्मजनसंसर्गी, विसर्गी पापभागिनः ॥५७॥

संपरिव्यनुप्राद् वदः ॥५॥२॥५८॥

स्यात् संपरिव्यनुप्रेभ्यो, वदतः प्रत्ययो घिनण् ॥
सत्सङ्गाद्भव सवादी, विवादी मा क्वचिद्भव ॥५८॥

वेर्विचकत्थस्रम्भकषकसलसहनः ॥५॥२॥५९॥

विचादिसप्तकाच्छीला-द्यर्थे विपूर्वकाद् घिनण् ॥
विवेकी न विकत्थी स्याद्, विकासी न विलासिकः ॥५९॥

व्यपाभेर्लपः ॥५॥२॥६०॥

व्यपाभिभ्यो लपेर्धातोः, शीलादौ प्रत्ययो घिनण् ॥
विलापी वाऽपलापी चा-ऽभिलाषी दृश्यते जनः ॥६०॥

५५॥-॥५७॥ एव परिवादी, अनुवादी, प्रवादी ॥५८॥ एवं विस्रम्भी, विकाषी, विघाती ॥५९॥ स्पष्टे ॥६०॥

सम्प्राद् वसात् ॥५॥२॥६१॥

सम्प्राभ्यां वसतेर्धातोः, शीलादौ प्रत्ययो घिनण् ॥
संवासी यो हि संसारे, प्रवासी सततं भवेत् ॥६१॥

समत्यपाभिव्यभेश्वरः ॥५॥२॥६२॥

शीलाद्यर्थे घिनण् वाच्यः, समादिपञ्चकाच्चरेः ॥
सञ्चारी चातिचारी चा-ऽपचारी जायते ग्रहः ॥६२॥

समनुव्यवाद् रुधः ॥५॥२॥६३॥

समनुव्यवपूर्वात् स्यात्, शीलाद्यर्थे रुधेर्घिनण् ॥
सरोधी चानुरोधी चा-वरोधी च विरोधिनः ॥६३॥

वेर्दहः ॥५॥२॥६४॥

विपूर्वाद् दहतेर्धातोः, शीलादौ प्रत्ययो घिनण् ॥
किं तेन जातु जातेन, यो विदाही भवेत् पितुः ॥६४॥

परेर्देविमुहश्च ॥५॥२॥६५॥

पराभ्या दहेश्चापि, शीलादौ प्रत्ययो घिनण् ॥
परिदेवी भवेद् दुःखी, परिमोही च मोहतः ॥६५॥

क्षिपरटः ॥५॥२॥६६॥

स्यादाभ्या परिपूर्वाभ्या, शीलादौ प्रत्ययो घिनण् ॥
परिराटी परिक्षेपी, दुःखी मूढश्च मोहितः ॥६६॥

६१॥ एवम् अभिचारी, व्यभिचारी ॥६२॥ स्पष्टे ॥६३॥६४॥ एव परिदाही ॥ ६५ ॥ स्पष्टम् ॥६६॥

वादेश्च णकः ॥५॥२॥६७॥

परेः क्षिपे रटेर्वदिः, शीलादौ णकप्रत्ययः ॥
स्यात् परिराटक किं सन्, वीणायाः परिवादकः ॥६७॥

निन्द-हिंस-क्लिश खाद-विनाशि-व्याभाष-ऽसूया-ऽनेकस्वरात् ॥५॥२॥६८॥

निन्दादिभ्यस्तथानेक–स्वराच्छीलादिके णक ॥
निन्दको हिंसको वापि, स्याद् दरिद्रायको भुवि ॥६८॥

उपसर्गाद् देवृदेविक्रुशः ॥५॥२॥६९॥

उपसर्गात् परेभ्य. स्या–देभ्यः शीलादिके णकः ॥
आदेवकस्तथाऽऽक्रोश–कः परिदेवकोऽसुखात् ॥६९॥

वृङ्-भिक्षि लुण्टि-जल्पि-कुट्टाट्टाकः ॥५॥२॥७०॥

एभ्यः शीलादिकार्थेभ्य–ष्टाकः स्यात् प्रत्ययः परः ॥
वराकी प्राप्य भिक्षाकं, जल्पाकी स्यात् किमद्भुतम् ॥७०॥

प्रात् सूजोरिन् ॥५॥२॥७१॥

प्रात् पराभ्यां भवेदाभ्या, शीलादाविन् परस्ततः ॥
प्रसवी प्रसुवतीत्येवं–शीलश्च प्रजवी द्रुत ॥७१॥

एव परिक्षेपक ॥६७॥ एव क्लेशक., खादक॰, विनाशक, व्याभाषक, असूयक, चकासक ॥६८॥ स्पष्टम् ॥ ६९ ॥ एव लुण्टाक, कुट्टाक ॥७०॥ स्पष्टम् ॥ ७१ ॥

जी-दृ-क्षि-विश्रि-परिभू-वमा-ऽभ्यमऽव्यथः ॥५॥२॥७२॥

शीलादौ वर्तमानेभ्य, एभ्य इन् प्रत्ययो भवेत् ॥
जय्यादरी भवेदेव, परिभवी क्षयी भवेद् ॥७२॥

सृघस्यदोमरक् ॥५॥२॥७३॥

एभ्यः शीलादिकार्थेभ्यो, जायते प्रत्ययो मरक् ॥
सल्लक्षणं ततो ज्ञेयं, सृमरो घस्मरोऽद्मरः ॥७३॥

भञ्जिभासिमिदो घुरः ॥५॥२॥७४॥

शीलादौ वर्तमानेभ्य, एभ्यः स्यात् प्रत्ययो घुरः ॥
भासुरं मेदुरं वापि, शरीरं क्षणभङ्गुरम् ॥७४॥

वेत्ति-च्छिद्-भिदः कित् ॥५॥२॥७५॥

स्याच्छीलादिसदर्थेभ्य, एभ्यः कित् प्रत्ययो घुरः ॥
विदुर. पण्डितो ज्ञानी, भिदुरं छिदुर समम् ॥७५॥

भियो रुरुकलुकम् ॥५॥२॥७६॥

शीलाद्यर्थे भियो धातोः, स्यु रुरुकलुका. कितः ॥
भीरुको भीलुको भीरुस्त्रयोऽमी कातरा मताः ॥७६॥

सृ-जीण्-नशष्ट्वरप् ॥५॥२॥७७॥

शीलादौ वर्तमानेभ्य, एभ्यः कित् प्रत्ययष्ट्वरप् ॥
न स्थिरं नश्वरं चित्ते, सृत्वरी जित्वरीत्वरः ॥७७॥

एवम् अत्ययी, विश्रयी, वमी, अभ्ययी, अव्यथी ॥७२॥ सूत्रषट्क सप्तम् ॥७३॥७४॥७५॥७६॥७७॥

गत्वरः ॥५॥२॥७८॥

गमेष्ट्वरप् मकारस्य, तकारश्च निपात्यते ॥
गत्वरं यौवनं लक्ष्मी- र्गत्वरी गत्वरो मदः ॥७८॥

स्म्यजसहिंसदीपकम्पकमनमो रः ॥५॥२॥७९॥

स्म्यादिभ्यः सप्तधातुभ्यः, शीलादौ स्याद् रप्रत्ययः ॥
हिंस्रोऽजस्रं तथा स्मेरं,नम्रः कम्रश्च दीप्रकः ॥७९॥

तृषिधृषि स्वपो नजिङ् ॥५॥२॥८०॥

तृषेर्धृषेः स्वपेश्चापि, शीलादौ प्रत्ययो नजिङ् ॥
तृष्णक् तृष्णजौ धृष्णक्, धृष्णजौ स्वप्नजौ तथा ॥८०॥

स्थेश-भास-पिस-कसो वरः ॥५॥२॥८१॥

शीलादौ सम्भवेदेभ्यो, धातुभ्यो वरप्रत्ययः ॥
पर्वतः स्थावरो भानु-र्भास्वरः कस्वरेश्वरः ॥८१॥

यायावरः ॥५॥२॥८२॥

यातेर्यङन्ततः शीला-दिसदर्थाद्वरो भवेत् ॥
कुटिलं याति तच्छीलो, यायावरो मतोऽमतः ॥८२॥

दिद्युद्-दद्रृद् जगज्-जुहू-वाक्-प्राट्-धी-श्री-द्रू-स्रू-ज्वायतस्तू-कटप्रू-परिव्राट्-भ्राजादयः ॥५॥२॥८३॥

एते शब्दा निपात्यन्ते, शीलाद्यर्थे क्विबन्तकाः ॥

॥७८॥ एत्र कम्प्र ॥७९॥ स्पष्टम् ॥८०॥ पेस्वर ॥८१॥ स्पष्टम् ॥८२॥ एत वाङ्, तत्त्वप्राङ्, शतद्रु, आयतस्तू, कटप्रू, विभ्राट् ॥८३॥

दिद्युद् ददृत् परिव्राड् भा, धीः श्रीः स्रूजूर्जगज्जुहूः

शंसंस्वयंविप्राद् भुवो डुः ॥५॥२॥८४॥

एभ्यः पराद् भुवो धातो-र्भवेद् डुः प्रत्ययः परः ॥
शम्भुः सम्भुः स्वयम्भुश्च, विभुः प्रभुर्भुवि श्रुताः ॥८४॥

पुव इत्रो दैवते ॥५॥२॥८५॥

सदर्थतो भवेदित्रः, पुव कर्तरि दैवते ॥
पवित्रोऽर्हन् सदा पातु, दुःखदग्धं जगत्त्रयम् ॥८५॥

ऋषि नाम्नोः करणे ॥५॥२॥८६॥

इत्र पुवः सदर्थात् स्यात्, करणे ऋषिसंज्ञयो ॥
पवित्रोऽयमृषिर्दर्भ. पवित्र सर्वकर्मसु ॥८६॥

लू-धू सू-खनि-चर-सहा-ऽर्त्तेः ॥५॥२॥८७॥

सदर्थल्वादिधातुभ्य, करणे इत्रप्रत्यय ॥
चरित्रं कर्मणोऽरित्रं, सवित्र धर्मशर्मणः ८७॥

नी-दाव्-शस्-यु युज-स्तु-तुद-सि-सिच-मिह-पत-पा-नहस्त्रट् ॥५॥२॥८८॥

सत्यर्थे वर्तमानेभ्य, एभ्यस्त्रट् करणे मतः॥
नेत्रं दात्रं तथा शस्त्रं, स्तोत्र सेत्रं च पत्रकम् ॥८८॥

सूत्रत्रय साष्टम् ॥८४॥८५॥८६॥ एव पवित्र, खनित्र सहित्रम् ॥८७॥ एव योत्र, योनत्र, तोत्र, सेक्त्र, मेढ्र, पात्री, नद्ध्री ॥८८॥

हलक्रोडाऽऽस्ये पुवः ॥५॥२॥८९॥

करणे त्रट् पुवो धातो-र्हलसूकरयोर्मुखे ॥
पुनाति पवतेऽनेन, पोत्रं स्यात् सूकराननम् ॥८९॥

दंशेस्त्रः ॥५॥२॥९०॥

सत्यर्थेऽवस्थिताद् दंशे, करणे त्रो भवेत् परः ॥
रदना दशना दन्ता, रदा दंष्ट्रा महारदाः ॥९०॥

धात्री ॥५॥२॥९१॥

दधातेर्धयतेर्वा त्रट्, कर्मणि प्रत्ययो भवेत् ॥
भवेदामलकी धात्री, धात्री वा स्तनदायिनी ॥९१॥

ज्ञानेच्छार्चार्थञीच्छील्यादिभ्यः क्तः ॥५॥२॥९२॥

ज्ञानेच्छार्चार्थधातुभ्यो, ञीद्भ्यः क्तो भवेत्तथा ॥
शील्यादिभ्यः सदर्थेभ्यो, राज्ञा ज्ञातश्च शीलित ॥९२॥

उणादयः ॥५॥२॥९३॥

धातोः सदर्थकात् कामं, बहुलं स्युरुणादय ॥
लोकसिद्धाः प्रसिद्धाश्च, सहस्रश उणादयः ॥९३॥

॥ इति पञ्चमाध्याये द्वितीयः पादः ॥

सूत्रत्रय स्पष्टम् ॥८९॥९०॥९१॥ एव राज्ञा पूजित, भिन्न, इष्ट, रक्षित ॥९२॥ कारु, ईडुः इत्यादय उणादय साधनीया ॥९३॥

॥ इति द्वितीयपाद ॥

अथ पञ्चमाध्याये तृतीयपादः ॥

वर्त्स्यति गम्यादिः ॥५॥३॥१॥

इन्नादिप्रत्ययान्ताः स्युः, साधवोऽर्थे भविष्यति ॥
गम्यादयो गमी मोक्षं, नागामी स कदाचन ॥१॥

वा हेतुसिद्धौ क्तः ॥५॥३॥२॥

हेतोः सिद्धौ भवेद्धातोः, क्तो नवा वर्त्स्यदर्थकात् ॥
वृष्टोऽब्दस्तर्हि सम्पन्नाः, सम्पत्स्यन्ते च शालयः ॥२॥

कपोऽनिटः ॥५॥३॥३॥

अनिटः क्रुपतेर्धातो-र्वर्त्स्यदर्थात् क्तप्रत्ययः ॥
कपिनाः शत्रवः शूरैः, कृप्ता हि तमसा दिशः ॥३॥

भविष्यन्ती ॥५॥३॥४॥

वर्त्स्यदर्थाद्भवेद् धातो – र्भविष्यन्ती परा ततः ॥
गमिष्यन्ति शिवं सर्वा, चारित्रं पालयिष्यति ॥४॥

अनद्यतने श्वस्तनी ॥५॥३॥५॥

स्यादनद्यतने धातोः, श्वस्तनी वर्त्स्यदर्थकात् ॥
परिषद् भविता तस्या-मद्य श्वो वा गमिष्यति ॥५॥

परिदेवने ॥५॥३॥६॥

वर्त्स्यति श्वस्तनीधातो र्भवेद् गम्येऽनुशोचने ॥
गन्ता कदा त्वियं येवं, निधत्ते चरणौ हतौ ॥६॥

पुरायावतोर्वर्तमाना ॥५॥३॥७॥

स्यात् पुरायावतोर्योगे, वर्तमाना नु वर्त्स्यति ॥
पुरा भुङ्क्ते तथा यावद्, भुङ्क्तेऽसौ जायते निरुक् ॥७॥

कदाकर्ह्योर्नवा ॥५॥३॥८॥

वर्त्स्यत्यर्थे कदाकर्ह्योः, स्यादुपपदयोर्नवा ॥
वर्तमाना कदा भुङ्क्ते, कदा भोक्ता च भोक्ष्यते ॥८॥

किंवृत्ते लिप्सायाम् ॥५॥३॥९॥

किंवृत्ते वर्तमाना वा लिप्साया वर्त्स्यदर्थकात् ॥
को भवता भिक्षां दाता, ददाति दास्यतीश्वरः ॥९॥

लिप्स्यसिद्धौ ॥५॥३॥१०॥

लिप्स्यसिद्धौ भवेद् वर्त-माना वा वर्त्स्यदर्थकात् ॥
भिक्षा ददाति दाता यः, स स्वर्गं याति यास्यति ॥१०॥

पञ्चम्यर्थहेतौ ॥५॥३॥११॥

वर्तमाना नवा वर्त्स्य-दर्थात् प्रैषादिकारणे ॥
आयानाऽऽयाति यद्याया-स्यति गुरुरधीष्व भो· ॥११॥

एव कर्हि भुङ्क्ते, कर्हि भोक्ष्यते कर्हि भोक्ता ॥८॥ विभक्तिडतरडतमान्तस्य किमो वृत्तं किंवृत्तम्, तस्मिन्नुपपदे प्रष्टुर्लिप्सायां गम्यमानायामिति-यावत्। एव कतर, कतम । किंवृत्त इति किम्? भिक्षा दास्यति । लिप्सायामिति किम्? क· पुरं यास्यति? ॥९॥ एव दास्यति, याता ॥१०॥ स्यम् ॥११॥

सप्तमी चोर्ध्वमौहूर्तिके ॥५॥३॥१२॥

ऊर्ध्वमौहूर्तिके पञ्च-म्यर्थहेतौ तु धातुतः ॥
सप्तमी वर्तमाना च. वत्स्यंति जायते नवा ॥१२॥

क्रियायां क्रियार्थायां तुम्णकच्भविष्यन्ती ॥५॥३॥१३

क्रियार्थाया क्रियाया स्यु-र्वत्स्यंदर्थात् तुमादय ॥
कर्तुं वा कारको वाऽपि, करिष्यामीति गच्छति ॥१३॥

कर्मणोऽण् ॥५॥३॥१४॥

क्रियार्थाया क्रियाया स्यात् , कर्मणो वत्स्यदर्थकात् ॥
धातोरण् प्रत्ययः कुम्भ-कारो याति गृहंगृहम् ॥१४॥

भाववचनाः ॥५॥३॥१५॥

घञ्-क्त्यादयः क्रियाया स्युः, क्रियार्थाया नु वत्स्यंति ॥
पाकाय पक्तये याति, पचनायाथ पाचकः ॥१५॥

पदरुजविशस्पृशो घञ् ॥५॥३॥१६॥

पदादिभ्यश्चतुर्भ्यः स्याद् , धातुभ्यो घञ् परस्ततः ॥
पादो रोग स्तथा वेशः, स्पर्शः मसाध्यते यतः ॥१६॥

सर्त्तेः स्थिरव्याधिबलमत्स्ये ॥५॥३॥१७॥

सर्त्तेर्घञ् स्यात् स्थिरे व्याधौ, बले मत्स्ये च कर्तरि ॥

ऊर्ध्वमुहूर्तादुपाध्यायश्चेदागच्छेद् आगच्छति, आगन्ता वा अथ त्व तर्कमधीष्व ॥१२॥ क्रियायामिति किम् ? भिक्षिष्य इत्यस्य जटा । क्रियार्थायामिति किम् ? धावतस्ते पतिष्यति वास ॥१३॥ सूत्रत्रय स्पष्टम् ॥१४॥१५॥१६॥ एव विसारो मत्स्य ॥१७॥

सारः स्थिरो बल सार–श्चातीसारो महामयः ॥१७॥

भावाऽकर्त्रोः ॥५॥३॥१८॥

घञ् भवेत् सर्वधातुभ्यो, भावे चाकर्तृकारके ॥
पाको रागः समाहारः, प्रासस्त्यागः कृतः पचः ॥१८॥

इङोऽपादाने तु टिद् वा ॥५॥३॥१९॥

भावाकर्त्रोरिङो घञ् स, टिद्वाऽपादानकारके ॥
उपाध्यायादुपाध्यायी, सदाऽध्यायं समाचरेत् ॥१९॥

श्रो वायुवर्णनिवृत्ते ॥५॥३॥२०॥

एष्वर्थेषु भवेद् घञ् श्रो, भावाकर्त्रोः परस्ततः ॥
प्रावरणं तु नीशारः, शारो वर्णः समीरणः ॥२०॥

निरभेः पूल्वः ॥५॥३॥२१॥

निरभिभ्या क्रमादाभ्या, घञ् भावेऽकर्तृकारके ॥
अभिलावश्च निष्पावः साध्यते न च बाध्यते ॥२१॥

रोरुपसर्गात् ॥५॥३॥२२॥

उपसर्गाद् भवेद्रौते–र्घञ् भावेऽकर्तृकारके ॥
संरवणं च संरावः, उपरावो रवोऽन्यथा ॥२२॥

भूश्र्यदोऽल् ॥५॥३॥२३॥

भू–श्रि–अदित्यतो भावा–कर्त्रोरल् मोपसर्गतः ॥
प्रभवः सश्रयो भावः, आयो विघसघासकौ ॥२३॥

सूत्रक्रमाङ्क सप्तम् ॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥

सप्तमी चोर्ध्वमौहूर्तिक ॥५॥३॥१२॥

ऊर्ध्वमौहूर्तिके पश्च–म्यर्थहेतौ तु धातुतः ॥
सप्तमो वर्तमाना च, वर्त्स्यति जायते नवा ॥१२॥

क्रियायां क्रियार्थायां तुमणकच्भविष्यन्ती ॥५॥३॥१३

क्रियार्थाया क्रियाया स्यु-र्वर्त्स्यदर्थात् तुमादय ॥
कर्तुं वा कारको वाऽपि, करिष्यामीति गच्छति ॥१३॥

कर्मणोऽण् ॥५॥३॥१४॥

क्रियार्थायां क्रियाया स्यात्, कर्मणो वर्त्स्यदर्थकात् ॥
धातोरण् प्रत्ययः कुम्भ-कारो याति गृहंगृहम् ॥१४॥

भाववचना· ॥५॥३॥१५॥

घञ्–क्त्यादयः क्रियाया स्युः, क्रियार्थाया नु वर्त्स्यति ॥
पाकाय पक्तये याति, पचनायाथ पाचकः ॥१५॥

पदरुजविशस्पृशो घञ् ॥५॥३॥१६॥

पदादिभ्यश्चतुर्भ्यः स्याद्, धातुभ्यो घञ् परस्ततः ॥
पादो रोग स्तथा वेशः, स्पर्शः मसाध्यते यतः ॥१६॥

सर्त्तेः स्थिरव्याधिबलमत्स्ये ॥५॥३॥१७॥

सर्त्तेर्घञ् स्यात् स्थिरे व्याधौ, बले मत्स्ये च कर्तरि ॥

ऊर्ध्वमुहूर्तादुपाध्यायश्चेदागच्छेद् आगच्छति, आगन्ता वा अथ त्व तर्कमधीष्व ॥१२॥ क्रियायामिति किम्? भिक्षिष्य इत्यस्य जटा। क्रियार्थायामिति किम्? धावतस्त पतिष्यति वास ॥१३॥ सूत्रत्रय स्पष्टम् ॥१४॥१५॥१ ॥ एव विसारो मत्स्य ॥१७॥

सारः स्थिरो बल सार-श्चातीसारो महामयः ॥१७॥

भावाऽकर्त्रोः ॥५॥३॥१८॥

घञ् भवेत् सर्वधातुभ्यो, भावे चाकर्तृकारके ॥
पाको रागः समाहारः, प्रासस्त्यागः कृतः पचः ॥१८॥

इङोऽपादाने तु टिद् वा ॥५॥३॥१९॥

भावाकर्त्रोरिङो घञ् स, टिद्वाऽऽपादानकारके ॥
उपाध्यायादुपाध्यायी, सदाऽध्यायं समाचरेत् ॥१९॥

श्रो वायुवर्णनिवृत्ते ॥५॥३॥२०॥

एष्वर्थेषु भवेद् घञ् श्रो, भावाकर्त्रोः परस्ततः ॥
भावरणं तु नीशारः, शारो वर्णः समीरणः ॥२०॥

निरभेः पूल्वः ॥५॥३॥२१॥

निरभिभ्या क्रमादाभ्या, घञ् भावेऽकर्तृकारके ॥
अभिलावश्च निष्पावः साध्यते न च बाध्यते ॥२१॥

रोरुपसर्गात् ॥५॥३॥२२॥

उपसर्गाद् भवेद्रौते-र्घञ् भावेऽकर्तृकारके ॥
संरवणं च संरावः, उपरावो रवोऽन्यथा ॥२२॥

भूश्रयदोऽल् ॥५॥३॥२३॥

भू-श्रि-अदित्यतो भावा-कर्त्रोरल् सोपसर्गतः ॥
प्रभवः संश्रयो भावः, श्रायो विघसघासकौ ॥२३॥

सूत्राष्टक सप्तम् ॥१८॥१९॥२०॥२१॥२२॥२३॥२४॥

न्यादो नवा ॥५॥३॥२४॥

निपूर्वकाददेर्घस्ल–भावेऽकारस्य दीर्घता ॥
अलि वा सम्भवेन्न्यादो, निघसश्चेति साध्यताम् ॥२४॥

संनिव्युपाद् यमः ॥५॥३॥२५॥

उपसर्गेभ्य एभ्योऽल् वा, भावाकर्त्रोर्यमेः परः ॥
सयामः संयमो यामो, नियामो नियमस्तथा ॥२५॥

नेर्नदगदपठस्वनक्वणः ॥५॥३॥२६॥

अल् वा नेरुपसर्गात् स्याद्, नदादिधातुपञ्चकात् ॥
निनादो ननदो नादो, निक्वाणो निक्वणः क्वण ॥२६॥

वैणे क्वण· ॥५॥३॥२७॥

वैणेऽर्थे वा क्वणर्भावा–कर्त्रोरल सोपसर्गतः ॥
वीणायाः प्रक्वणो रम्यः, प्रक्वाणः शृङ्गलस्य च ॥२७॥

युवर्णवृदृवशरणगमृद्ग्रहः ॥५॥३॥२८॥

भावाकर्त्रोरिवर्णान्तो–वर्णान्तेभ्यश्च ऽऽादितः ॥
ऋदन्तेभ्यो ग्रहेश्चाल् स्या–च्चयो रवो वरः करः ॥२८॥

वर्षादय क्लीबे ॥५॥३॥२९॥

भावाकर्त्रोर्निपात्यन्ते–ऽलन्ता एते यथाभवम् ॥
क्लीबे वनं भयं वर्षं, खलं पद युगं धनम ॥२९॥

एव वियाम, वियम उपयाम उपयम ॥२५॥ एव निगद, निगाद, निपठ निपाठ, निस्वन, निस्वान ॥२६॥ स्पष्टम् ॥२७॥ एव चय, ल्व, आदर, वश, रण, गम, ग्रह ॥२८॥ स्पष्ट ॥२९॥

समुदोऽजः पशौ ॥५॥३॥३०॥

भावाकर्त्रोर्भवेदाभ्यां, परादजोऽल् पशौ सति ॥
उदजः समजः शूनां, समाजोऽस्ति वसन्नृणाम् ॥३०॥

सृग्लहः प्रजनाक्षे ॥५॥३॥३१॥

भावाकर्त्रोः क्रमादाभ्या–मल् भवेत् प्रजनाक्षयोः ॥
गवामुपसरोऽक्षाणा, ग्लहो ग्रहणमुच्यते ॥३१॥

पणेर्माने ॥५॥३॥३२॥

भावाकर्त्रोः पणेर्माना–र्थकादल् प्रत्ययो भवेत् ॥
स्यान्मूलकपणः पाणो, मानाभावे निरूप्यताम् ॥३२॥

सम्मदप्रमदौ हर्षे ॥५॥३॥३३॥

हर्षे स्यातामिमौ भावा–कर्त्रोरल्प्रत्ययान्तकौ ॥
प्रमादो नापि सम्माद:, सम्मदप्रमदार्थिनाम् ॥३३॥

हनोऽन्तर्घनान्तर्घणौ देशे ॥५॥३॥३४॥

हन्तेरल् घनघणादेशौ, देशेऽन्तःपूर्वकाद् यदि ॥
भावाकर्त्रोर्निपात्येते, देशोऽन्तर्घन उच्यते ॥३४॥

प्रघणप्रघाणौ गृहांशे ॥५॥३॥३५॥

हन्तेरल् घणघाणौ च, गृहांशेऽर्थे प्रपूर्वकात् ॥
निपात्येते प्रघाणो वा, प्रघणो द्वारि वर्तते ॥३५॥

प्रजनाक्ष इति किम्? उपसारो मृन्ये राज्ञाम् ॥३१॥ स्पष्टे ॥३२॥ ३३॥ एवम् अतर्घणो देश । अन्तर्घातोऽन्य ॥३४॥ प्रघण, प्रघाणो वा द्वारालिन्दक । प्रघातोऽन्य ॥३५॥

निघोद्घसङ्घोद्घनापघनोपघ्नं निमितप्रशस्तगणात्याधानाङ्गासन्नम् ॥५॥३॥३६॥

हन्तेर्निघादयोऽलन्ताः, क्रमशो निमितादिषु ॥
निपात्यन्ते निघा वृक्षाः, सङ्घो जैनश्चतुर्विध ॥३६॥

मूर्तिनिचिताभ्रे घनः ॥५॥३॥३७॥

मूर्त्याद्यर्थेषु हन्तेरल्, घनादेशो निपात्यते ॥
अभ्र मेघो घनाः केशा, घनोऽस्य घन दधि ॥३७॥

व्ययोद्रोः करणे ॥५॥३॥३८॥

हन्तेरेभ्यः परादल् च, घनादेशो निपात्यते ॥
करणेऽयोघनश्चैव, विघनो द्रुघनस्तथा ॥३८॥

स्तम्बाद् घ्नश्च ॥५॥३॥३९॥

हन्तेः स्तम्बात् परादल् घ्न–घनादेशौ निपातितौ ॥
करणे भवतः स्तम्ब–घन स्तम्बघ्न उच्यते ॥ ३९ ॥

परेर्घः ॥५॥३॥४०॥

अल् करणे परेर्हन्ते–र्घादेशश्च निपात्यते ॥
पलिघः परिघो दत्तः, सज्जनैः पापकर्मणः ॥४०॥

उद्घ–प्रशस्त, अत्याधीयन्त च्छेदनार्थं कुटनार्थं वा काष्ठादीनि यत्र तदत्याधानम्, उद्घन । अपघन शरीरावयव, उपघ्न आसन्न ॥३६॥ स्पष्ट ॥३७॥३८॥ स्तम्बघ्नो दण्ड, स्तम्बघनो यष्टि ॥३९॥ परिघोऽर्गला ॥४०॥

ह्वः समाह्वयाह्वयौ द्यूतनाम्नोः ॥५॥३॥४१॥

समाङ्पूर्वात्तथाङ्पूर्वाद्, द्यूते नाम्नि यथाक्रमम् ॥
निपात्यतेऽल् ह्वयादेशो, ह्वेधातोराह्वयोऽभिधा ॥४१॥

न्यभ्युपवेर्वा श्चोत् ॥५॥३॥४२॥

भावाकर्त्रोः परादेभ्यो, ह्वयतेरल् विधीयते ॥
तद्योगे वा भवेदुश्च, निह्वोऽभिह्वो यथा ॥४२॥

आङो युद्धे ॥५॥३॥४३॥

भावाकर्त्रोर्भवेदाङो, ह्वो युद्धेऽर्थेऽल् तथा च वाः ॥
उश्च महाहवे वृत्ते, स्यादाह्वायो गृहे गृहे ॥४३॥

आहावो निपानम् ॥५॥३॥४४॥

निपाने ह्वयतेराङो, भावाकर्त्रोर्निपात्यते ॥
अल् आहावस्तथादेश, आहावो मृगपक्षिणाम् ॥४४॥

भावेऽनुपसर्गात् ॥५॥३॥४५॥

भावे ह्वोऽनुपसर्गादल्, स्याद् वा उश्च ह्वस्तथा ॥
व्याप्ये ह्वायस्तथाऽऽह्वायः, सोपसर्गाद्यथोचितः ॥४५॥

हनो वा वध् च ॥५॥३॥४६॥

भावेऽनुपसर्गतो हन्ते-र्भवेऽल् तथा च वध् हनः ॥
प्राणिवधो महापापं, घातश्चात्मविघातकः ॥४६॥

समाह्वय प्राणिद्यूतम्, ॥४१॥ एवम् उपह्व,
सूत्राण्येकादश सप्ताजि ॥४३॥४४॥४५॥४६॥

व्यधजपमद्भ्यः ॥५॥३॥४७॥

स्यादेभ्योऽनुपसर्गेभ्यो, भावाकर्त्रोरलुच्यते ॥
व्यधो व्याधकुले ज्ञेयो, जपो मदविमर्दनः ॥४७॥

नवा क्वणयमहसस्वनः ॥५॥३॥४८॥

स्यादेभ्योऽनुपसर्गेभ्यो, भावाकर्त्रोर्नवाऽल् ततः ॥
क्वणः क्वाणो यमो यामो, हासः स्वानो हसः स्वनः॥

आङो रुप्लोः ॥५॥३॥४९॥

रुप्लुभ्यामाङ्पराभ्यामल्, भावाकर्त्रोर्भवेन्नवा ॥
आराव आरवः शब्द, आप्लावश्चैवमाप्लवः ॥४९॥

वर्षविघ्नेऽवाद् ग्रहः ॥५॥३॥५०॥

वर्षविघ्ने ग्रहेर्धातो–रवादल्प्रत्ययो नवा ॥
भावाकर्त्रोरवग्राहो–ऽवग्रहस्तदवग्रहः ॥५०॥

प्राद् रश्मितुलासूत्रे ॥५॥३॥५१॥

ग्रहे रश्मौ तुलासूत्रे, चार्थे प्रादल् भवेन्नवा ॥
भावाकर्त्रोस्तुलासूत्रं, रश्मिः प्रग्राहप्रग्रहौ ॥५१॥

वृगो वस्त्रे ॥५॥३॥५२॥

भावाकर्त्रोर्वृगो वस्त्र–निशेपेऽल्वा प्रपूर्वकात् ॥
प्रवारः प्रवरो वस्त्र–मन्यत्र प्रवरो यतिः ॥ ५२ ॥

॥४७॥४८॥४९॥५०॥५१॥५२॥

उदः श्रेः ॥५॥३॥५३॥

उत्पूर्वाच्छ्र्यतेरल् वा, भावाकर्त्रोर्विधीयते ॥
नित्यं प्राप्ते विकल्पोऽयमुच्छ्राय उच्छ्रयो यथा ॥५३॥

युपूद्रोर्घञ् ॥५॥३॥५४॥

एभ्य उत्पूर्वकेभ्यो घञ्, भावाकर्त्रोर्भवेदयम् ।
अलोऽपवाद उद्याव उत्पावो जिनमन्दिरम् ॥५४॥

ग्रहः ॥५॥३॥५५॥

भावाकर्त्रोर्ग्रहेर्धातो–रुत्पूर्वाद् घञ् विधीयते ॥
अलोऽपवाद उद्ग्राहः, केवलाद् ग्रहविग्रहौ ॥५५॥

न्यवाच्छापे ॥५॥३॥५६॥

भावाकर्त्रोर्ग्रहेराभ्या–माक्रोशे घञ् विधीयते ॥
निग्राहो जाल्म ते भूया–दवग्राहोऽस्तु तेऽथवा ॥५६॥

प्राल्लिप्सायाम् ॥५॥३॥५७॥

भावाकर्त्रोर्हि लिप्साया, ग्रहेर्घञ् स्यात् प्रपूर्वकात् ॥
दक्षिणार्थी स्रुवस्य प्र–ग्राहेण चरति द्विजः ॥५७॥

समो मुष्टौ ॥५॥३॥५८॥

भावाकर्त्रोर्ग्रहेर्मुष्टौ, घञ् स्यात् संपूर्वकात्ततः ॥
सङ्ग्राहो मौष्टिकस्याहो, शिष्यस्य सङ्ग्रहोऽन्यथा ॥५८॥

॥५३॥ एवम् उद्राव ॥५४॥ सग्रहम् ॥५५॥ शाप इति किम् ? निग्रहश्चोरस्य ॥५६॥ एव पिण्डपातार्थी भिक्षु पात्रप्रग्राहेण चरति । लिप्सायामिति किम् ? स्रुवः प्रग्रहः शिष्यस्य ॥५७॥ सूत्रपटकमतिरोहितार्थम् ॥५८॥

युदुद्रोः ॥५॥३॥५९॥

घञ् संपूर्वेभ्य एभ्यः स्याद्, भावाकर्त्रोर्यथायथम् ॥
सयावश्चाथ सन्दावः, सन्द्रावश्च निरूप्यताम् ॥५९॥

नियश्चानुपसर्गाद् वा ॥५॥३॥६०॥

भावाकर्त्रोर्नियो घञ् वा, स्याद् युदुद्रोश्च केवलात् ॥
नयो नायो यवो यावो, दावो द्रावो दवो द्रवः ॥६०॥

वोदः ॥५॥३॥६१॥

उत्पूर्वान्नयतेर्भावा-कर्त्रोः स्याद् घञ् विभाषया ॥
ऊर्ध्वनयनमुन्नाय, उन्नयश्चोच्यते बुधैः ॥६१॥

अवात् ॥५॥३॥६२॥

अवपूर्वान्नियो भावा-कर्त्रोर्घञ्प्रत्ययो भवेत् ॥
जनोऽवनीयते दुष्टै-र्योऽवनायः स कथ्यते ॥६२॥

परेर्द्यूते ॥५॥३॥६३॥

भावाकर्त्रोर्भवेद् द्यूते, विषये घञ् परेर्नियः ॥
शारीन् स परिणायेन, हन्ति परिणयोऽन्यथा ॥६३॥

भुवोऽवज्ञाने वा ॥५॥३॥६४॥

भावाकर्त्रोर्भवेद् घञ् वा-ऽवज्ञानार्थात् परेर्भुवः ॥
मानिना परिभावो वा, परिभवो हि मृत्युवत् ॥

॥५९॥-०॥-१॥,२॥-३॥ अवज्ञान इति किम्? भवन्ताद् भूनि परिभव ॥२८॥

यज्ञे ग्रहः ॥५॥३॥६५॥

भावाकर्त्रोर्ग्रहेर्यज्ञ–विषये घञ् परेर्युतात् ॥
यज्ञे पूर्वपरिग्राहो–ऽन्यथाऽर्थस्य परिग्रहः ॥६५॥

संस्तोः ॥५॥३॥६६॥

स्तौतेः संपूर्वकाद् भावा–कर्त्रोर्घञ्प्रत्ययः क्रतौ ॥
समेत्य संस्तुवन्त्यत्र, संस्तावः सामवेदिनाम् ॥६६॥

प्रात् स्तुद्रुस्तोः ॥५॥३॥६७॥

स्यात् प्रात्परेभ्य एभ्यो घञ्, भावाकर्त्रोस्ततस्ततः ॥
प्रस्रावश्चाथ प्रद्रावः, प्रस्तावश्च स्रवो द्रवः ॥६७॥

अयज्ञे स्त्रः ॥५॥३॥६८॥

भावाकर्त्रोः प्रपूर्वात् स्त्रो, घञ् यज्ञे चेद् भवेन्नहि ॥
प्रस्तारो गणिते प्रोक्तः प्रस्तरो बर्हिषः क्रतौ ॥६८॥

वेरशब्दे प्रथने ॥५॥३॥६९॥

विस्तीर्णत्वे स्तृणातेर्घञ्, वेः पराच्छब्दभिन्नके ॥
घञ् स्यात् पटस्य विस्तार–स्तृणस्य विस्तरोऽन्यतः ॥६९॥

छन्दोनाम्नि ॥५॥३॥७०॥

छन्दोनाम्नि स्तृणातेर्घञ्, भावाकर्त्रोर्विपूर्वकात् ॥
विष्टारपङ्क्तिराचिद्वत्, प्रसिद्धं नाम्नि छन्दस ॥७०॥

––सूत्रचतुष्क सप्तम ॥६५॥६६॥६७॥६८॥ अशब्द इति किम्? वाग्विस्तर. ॥६९॥ सूत्रसप्तक सप्तम् ॥७०॥

क्षुश्रोः ॥५॥३॥७१॥

भावाकर्त्रोर्विपूर्वाभ्या-माभ्या घञ्प्रत्ययो भवेत् ॥
विक्षावश्चाथ विश्रावो, वेरभावे क्षवः श्रवः ॥७१॥

न्युदो ग्रः ॥५॥३॥७२॥

आभ्या पराद् भवेद् घञ् ग्रो, भावाकर्त्रोर्यथायथम् ॥
उद्गारश्च निगारश्चा-न्यथा स्यात् सगरो गरः ॥७२॥

किरो धान्ये ॥५॥३॥७३॥

न्युत्पूर्वात् किरतेर्धान्ये, भावाकर्त्रोस्तु घञ् भवेत् ॥
उत्कारोऽथ निकारः स्याद्, धान्यस्य निकरोऽन्यथा ॥७३॥

नेर्वुः ॥५॥३॥७४॥

भावाकर्त्रोर्भवेद् धान्ये, वृधातोर्घञ् निपूर्वकात् ॥
नीवारा व्रीहयः प्रोक्ता, अन्यत्र निवरा कनी ॥७४॥

इणोऽभ्रेषे ॥५॥३॥७५॥

भावाकर्त्रोरिणोऽभ्रेषे, निपूर्वाद् घञ् भवेत्ततः ॥
सन्तश्चलन्ति न न्याया-दसन्तश्च न्यय गताः ॥७५॥

परेः क्रमे ॥५॥३॥७६॥

परिपूर्वादिणो धातोः, क्रमे घञ्प्रत्ययो भवेत् ॥
पर्यायो भवतो भोक्तु, स्वाध्यायस्य तु पर्ययः ॥७६॥

॥७१॥७२॥७३॥७४॥७५॥७६॥

व्युपात् शीङः ॥५॥३॥७७॥

भावाकर्त्रोर्भवेदाभ्या, शीङ्धातोर्घञ् क्रमे ततः ॥
तव राजविशायो रा-जोपशायो ममापि च ॥७७॥

हस्तप्राप्ये चेरस्तेये ॥५॥३॥७८॥

अस्तेये हस्तप्राप्ये घञ्, भावाकर्त्रोश्चिगो भवेत् ॥
सतां पुष्पप्रचायः स्यात्, स्यात् पुष्पप्रचयोऽसताम् ॥७८॥

चितिदेहावासोपसमाधाने कश्चादेः ॥५॥३॥७९॥

चेरेष्वर्थेषु घञ् भावा-कर्त्रोरादेश्च कश्चिगः ॥
काय ऋषिनिकायश्च, स्याद् गोमयनिकायकः ॥७९॥

सङ्घेऽनूर्ध्वे ॥५॥३॥८०॥

सङ्घेऽनूर्ध्वे चिनोतेर्घञ्, कश्चादेः सन्नियोगतः ॥
सत्तार्किकनिकायोऽत्र, भाति सारसमुच्चयः ॥८०॥

माने ॥५॥३॥८१॥

भावाकर्त्रोर्भवेद् माने, गम्ये घञ् धातुतस्ततः ॥
एकस्तण्डुलनिश्चायो, निश्चयो निर्णयः समः ॥८१॥

स्थादिभ्यः कः ॥५॥३॥८२॥

भावाकर्त्रोर्भवेदभ्यः कः प्रत्ययो यथायथः ॥
आखूत्थः शलभोत्थश्च, प्रस्थः संस्था प्रपा विधः ॥८२॥

क्रम इति किम् ? विशय ॥७७॥ हस्तप्राप्ये इति किम् ? पुष्पप्रचय करोति वृक्षाग्र ॥७८॥ चितिर्यज्ञेऽग्निविशेषस्तदाधारो वा, आकायमग्निं चिन्वीत उपसमाधानमुपर्युपरि राशीकरणम् ॥७९॥ अनूर्ध्वे इति किम् ? शूकरनिचय ॥८०॥ सूत्रनवक स्पष्टम् ॥८१॥८२॥

ट्वितोऽथुः ॥५॥३॥८३॥

भावाकर्त्रोष्ट्वितो धातोः, स्यादथुः प्रत्ययः परः ॥
स्फूर्जथुर्वज्रनिर्घोषे, वेपथुः कम्पने मतः ॥८३॥

ड्वितस्त्रिमक् तत्कृतम् ॥५॥३॥८४॥

धात्वर्थकृतमित्यर्थे, भावाकर्त्रोर्ड्वितस्त्रिमक् ॥
लब्धिमं कृत्रिमश्चैव, याचित्रिम च पक्त्रिमम् ॥८४॥

यजिस्वपिरक्षियतिप्रच्छो न ॥५॥३॥८५॥

भावाकर्त्रोर्भवेदेभ्यो, धातुभ्यो नः परस्ततः ॥
यज्ञः स्वप्नस्तथा रक्ष्णो, यत्नः प्रश्नः प्रसाध्यते ॥८५॥

विच्छो नङ् ॥५॥३॥८६॥

विच्छेर्धातोर्भवेद् भावा- कर्त्रोर्नङ् प्रत्ययः परः ॥
ङित्व गुणनिषेधार्थं, कृतं विश्न उदाहृतिः ॥८६॥

उपसर्गाद् दः किः ॥५॥३॥८७॥

दासंज्ञधातुतो भावा-कर्त्रोः किरुपसर्गतः ॥
आदिराधिः समाधिश्च, निधिः सन्धिरुपाधिः ॥८७॥

व्याप्यादाधारे ॥५॥३॥८८॥

आधारे कारके किः स्याद्, व्याप्याद् दासंज्ञकात् परात् ॥
जलधिः सागरः प्रोक्त-स्तूणीरः शरधिस्तथा ॥८८॥

॥८०॥८४॥८ ॥८ ॥८७॥८८॥

अन्तर्द्धिः ॥५॥३॥८९॥

अन्तःपूर्वाद् दधातेः कि-र्भावाकर्त्रोर्निपात्यते ॥
अन्तर्धा, व्यवधा पुंसि, त्वन्तर्द्धिरपवारणम् ॥८९॥

अभिव्याप्तौ भावेऽनाञिन् ॥५॥३॥९०॥

भावे धातोरभिव्याप्ता-वनञिनूप्रत्ययौ मतौ ॥
सेनायां वर्तते सारा-विणं संरवणं तथा ॥९०॥

स्त्रियां क्तिः ॥५॥३॥९१॥

भावाकर्त्रोर्भवेद् धातोः, परः क्तिप्रत्ययः स्त्रियाम् ॥
कृतिर्नीतिर्नुतिर्भूति-र्हृतिः कारश्चिनिश्चयः ॥९१॥

श्वादिभ्यः ॥५॥३॥९२॥

भावाकर्त्रोर्भवेदेभ्यो, धातुभ्यः क्तिः स्त्रियां परः ॥
श्रुतिः स्तुतिः प्रतिस्तुद्द, संविनिर्वेदना मतिः ॥९२॥

समिणासुगः ५॥३॥९३॥

सपूर्वादिण आङ्पूर्वात्, सुनोतेश्च स्त्रिया परः ॥
भावाकर्त्रोर्भवेत् क्तिस्त-दासुतिः समितिस्तथा ॥९३॥

साति-हेति-यूति-जूति-ज्ञप्ति-कीर्तिः ॥५॥३॥९४॥

भावाकर्त्रोर्निरुप्यन्ने, क्त्यन्ता एते निपातिताः ॥
सातिर्हेतिस्तथा यूति-र्जूतिश्च ज्ञप्तिकीर्तयः ॥९४॥

॥८९॥ अभिव्याप्ताविति किम् ? सराव ॥९०॥ सूत्रपञ्चक स्पष्टम् ॥९१॥९२॥९३॥९४॥

गापापचो भावे ॥५॥३॥९५॥

भावे गापापचिभ्यः क्तिः, प्रत्ययः स्यात् स्त्रिया ततः ॥
सङ्गीतिश्च प्रपीतिश्च, पक्तिरिति निरूप्यताम् ॥९५॥

स्थो वा ॥५॥३॥९६॥

भावेऽर्थे तिष्ठतेर्धातोः, स्त्रिया क्तिः प्रत्ययो नवा ॥
उपस्थितिरयोग्यस्य, प्रायो नो संसदीक्ष्यते ॥९६॥

आस्यटि–व्रज्यजः क्यप् ॥५॥३॥९७॥

स्त्रियामेभ्यश्चतुर्भ्यः स्याद्, भावे क्यप् प्रत्ययः परः ॥
वृथाटया खलु सा तस्या, आस्याऽपि च निरर्थिका ॥९७॥

भृगो नाम्नि ॥५॥३॥९८॥

भावेऽर्थे क्यप् भृगो धातोः, संज्ञाया जायते स्त्रियाम् ॥
भृत्या भरणमुन्नेयं, भार्या वधूर्भृतिस्ततः ॥९८॥

समज-निपत्-निषद्-शीङ्-सुग्-विदि-चरि-मनीणः ॥५॥३॥९९॥

भावाकर्त्रोर्भवेदेभ्यः, सञ्ज्ञाया क्यप् स्त्रिया परः ॥
विद्या शय्या समःयेत्या, चर्या मन्वीतिरन्यथा ॥९९॥

कृगः श च वा ॥५॥३॥१००॥

भावाकर्त्रोः कृगः शो वा, क्यप् च स्त्रिया भवेत्परः ॥
क्रिया कृत्या कृतिश्चैते, साधनीया यथारुचि ॥१००॥

मृगयेच्छायाच्ञातृष्णाकृपाभाश्रद्धाऽन्तर्द्धा ॥५॥३॥१०१॥

मृगयेच्छा तथा याच्ञा, तृष्णाऽन्तर्द्धा च भा कृपा ॥
श्रद्धा चेत्यष्टशब्दाः स्युः, स्त्रियामेते निपातिताः ॥१०१॥

परेः सृचरेर्यः ॥५॥३॥१०२॥

आभ्यां यः परिपूर्वाभ्यां, भावाकर्त्रोः स्त्रिया भवेत् ॥
परिचर्याऽथवा चूर्तिं, परिसर्या च संसृतिः ॥१०२॥

वाऽटाट्यात् ॥५॥३॥१०३॥

भावाकर्त्रोर्भवेद्वा यः यङन्तादटतेः स्त्रियाम् ॥
अटाट्या स्यादटाटा वा-ऽटनं पापाद् भवे भवे ॥१०३॥

जागुरश्च ॥५॥३॥१०४॥

भावाकर्त्रोर्भवेदश्च, यश्च जागुः स्त्रियां परः ॥
जागर्या जागरा कार्या, शुभस्वप्नार्थसाधिका ॥१०४॥

शंसिप्रत्ययात् ॥५॥३॥१०५॥

अः शंसेः प्रत्ययान्ताच्च, भावाकर्त्रोर्भवेत् स्त्रियाम् ॥
प्रशंसा विदुषा काचिद्, गोपाया गुणिनां यथा ॥१०५॥

क्तेटो गुरोर्व्यञ्जनात् ॥५॥३॥१०६॥

स्यात् क्तेटो व्यञ्जनान्तादो, भावाकर्त्रोर्गुरोः स्त्रियाम् ॥
ईहेहक्षा यथा स्रस्तिः, स्फूर्तिः सशीतिरन्यथा ॥१०६॥

॥१०१॥१०२॥१०३॥ १०४॥१०५॥१०६॥

षितोऽङ् ॥५॥३॥१०७॥

भावाकर्त्रो पितो धातोः, स्त्रियामङ् प्रत्ययो भवेत् ॥
पचा क्षमा घटा चैव, प्रथा त्वरा व्यथा जरा ॥१०७॥

भिदादयः ॥५॥३॥१०८॥

भावाकर्त्रोर्यथालक्ष्यं, निपात्यन्ते भिदादयः ॥
स्त्रियामङ्प्रत्ययान्तास्तद्, भिदा विदा दया क्षपा॥१०८॥

भीषिभूषिचिन्तिपूजिकथिकुम्बिचर्चिस्पृहितोलिदोलिभ्यः ॥५॥३॥१०९॥

अङ् एभ्यो ण्यन्तधातुभ्यो, भावाकर्त्रोः स्त्रिया भवेत् ॥
भीषा भूषा कथा चिन्ता, पूजा चर्चा स्पृहा यथा ॥१०९॥

उपसर्गादातः ॥५॥३॥११०॥

भावाकर्त्रो स्त्रियामङ् स्या-दादन्तादुपसर्गकात् ॥
प्रदा प्रधा विधा सन्धाऽऽधोपदा चोपधा प्रमा ॥११०॥

णिवेत्त्यासश्रन्थघट्टवन्देरनः ॥५॥३॥१११॥

ण्यन्ताद् वेत्त्यादिकेभ्यश्च, भावाकर्त्रोः स्त्रियामनः ॥
कारणा वेदना चैव, वन्दनोपासनाऽऽसना ॥१११॥

इषोऽनिच्छायाम् ॥५॥३॥११२॥

॥१०७॥१०८॥ एव कुम्बा, तोला, दोला ॥१०९॥ उपसर्गादि[illegible] किम् ? दत्ति ॥११०॥ एव श्रन्थना, घट्टना ॥१११॥ [illegible] ॥११२॥

अनिच्छायामिषेर्भावा–कर्त्रोः स्त्रियामनो भवेत् ॥
अन्वेषणैव गवेषणैवे–षणा स्यादिष्टिरन्यथा ॥११२॥

पर्यधेर्वा ॥५॥३॥११३॥

भावाकर्त्रोः स्त्रियामाभ्यां, वाऽनोऽनिच्छार्थकादिषेः ॥
पर्येषणा परीष्टिश्चा–ध्येषणाऽधीष्टिरामना ॥११३॥

क्रुधूसम्पदादिभ्यः क्विप् ॥५॥३॥११४॥

समादिभ्यः पदादिभ्यः, क्रुधादितश्च केवलात् ॥
भावकर्त्रोः स्त्रियां क्विप् स्यात्, क्रुत् युत् सम्पद् विपत् समित्

भ्यादिभ्यो वा ॥५॥३॥११५॥

भावाकर्त्रोः स्त्रियां क्विप् वा, भ्यादिकेभ्यो विधीयते ॥
भीर्भीतिर्युक् तथा युक्ति–र्भूर्भूतिः कृत् कृतिस्तथा॥११५॥

व्यतिहारेऽनीहादिभ्यो ञः ॥५॥३॥११६॥

स्त्रियामीहादिवर्जेभ्यो, धातुभ्यः स्याद् ञप्रत्ययः ॥
व्यतिहारे जडाना स्याद्, व्याचक्रोशी परस्परम् ॥११६॥

नञोऽनिः शापे ॥५॥३॥११७॥

भावाकर्त्रोर्नञो धातोः, शापे गम्ये स्त्रियामनिः ॥
पाप ? तेऽजननिर्भूयाद्, स्त्रनिर्वा यत्त्वाऽकृतिः ॥११७॥

ग्लाहाज्यः ॥५॥३॥११८॥

॥११-॥११४॥११५॥ बाहुल्काद् भावे । अनीहादिभ्य इति किम् ?
व्यतीहा, व्यतीक्षा ॥११६॥ स्पष्टे ॥११७॥११८॥

भावाकर्त्रोर्भवेदेभ्य-स्त्रिधातुभ्यः स्त्रियामनिः ॥
ग्लानिर्हानिस्तथा ज्यानिः, शर्मणे जायते क्वचित् ॥११८॥

प्रश्नाख्याने वञ् ॥५॥३॥११९॥

धातोः प्रश्ने तथाऽऽख्याने, भावाकर्त्रोः स्त्रिया नवेञ् ॥
कां कारि कारिकां कृत्या-मकार्षी का कृतिं क्रियाम् ॥

पर्यायार्हणोत्पत्तौ च णकः ॥५॥३॥१२०॥

एष्वर्थेषु तथा प्रश्ना-ख्यानयोश्च भवेण्णकः ॥
भावाकर्त्रोः स्त्रिया धातो-र्भवन शायिकाऽऽसिका ॥१२०॥

नाम्नि पुंसि च ॥५॥३॥१२१॥

भावाकर्त्रोः स्त्रिया नाम्नि, धातुतो णकप्रत्ययः ॥
पुंसि चापि यथालक्ष्य-मरोचको विपादिका ॥१२१॥

भावे ॥५॥३॥१२२॥

धातोर्धात्वर्थनिर्देशे, भवेद् भावे स्त्रिया णकः ॥
शायिका जीविकेक्षोद्रा स्मरणेहा च कारिका ॥१२२॥

क्लीबे क्तः ॥५॥३॥१२३॥

भावार्थे सम्भवेद् धातोः, क्तप्रत्ययो नपुंसके ॥
छात्रस्य हसितं नृत्तं, शिखिनः करिणो गतम् ॥१२३॥

अनट् ॥५॥३॥१२४॥

लिङ्गे नपुंसके धातो-र्भावेऽर्थे सम्भवेदनट् ॥
मधुरं भोजनं यद्वद्, गमनं वचनं शिशोः ॥१२४॥

यत्कर्मस्पर्शात् कर्त्रङ्गसुखं ततः ॥५॥३॥१२५॥

यत्कर्मस्पर्शतः कर्त्र-ङ्गसुख कर्मणस्ततः ॥
भावे धातोरनट् क्लीवे, स्यात् सुख मिष्टभोजनम् ॥१२५॥

रम्यादिभ्यः कर्तरि ॥५॥३॥१२६॥

अनट् कर्तरि धातुभ्यो, रम्यादिभ्यो विधीयते ॥
रमणी कमनी कान्ता, नन्दनी ह्लादनी रमा ॥१२६॥

कारणम् ॥५॥३॥१२७॥

अनट् कर्तरि कृग्धातोः, स्याद् वृद्धिश्च निपातनात् ॥
यदि नैवेप्सितं कार्य्यं, कारणमपसार्यताम् ॥१२७॥

भुजिपत्यादिभ्यः कर्मापादाने ॥५॥३॥१२८॥

अनट् कर्मणि भुज्यादे-रपादाने च धातुतः ॥
पत्यादेर्भोजन प्रस्यो-तन मपतनस्तथा ॥१२८॥

सष्टम् ॥१२४॥ अस्य सूत्रस्याय स्पष्टोऽर्थ —येन कर्मणा सस्पृष्टस्य-कर्तुरङ्गस्य सुख स्यात् तत पराद् धातो क्लीवे भावेऽनट स्यात् । पय पान सुखम् । कर्मेति किम् ? तूलिकाया उत्थान सुखम् । कर्त्रिति किम् ? गुरा स्नापन सुखम् । अङ्गेति किम् ? पुत्रस्य परिष्वञ्जन सुखम् । सुखमिति किम् ? कण्टकाना मर्दनम । नित्यसमासार्थमिदम् ॥१२५॥ स्पष्ट सूत्रचतुष्कम् ॥१२६॥१२७॥१२८॥

करणाधारे ॥५॥३॥१२९॥

करणाधारयोर्धातोः, स्यादनट्प्रत्ययस्ततः ॥
घर्षणी लेखनी गोदो-हनी शयनमासनम् ॥१२९॥

पुन्नाम्नि घः ॥५॥३॥१३०॥

करणाधारयोः पुंसः, संज्ञायां घश्च धातुतः ॥
प्रच्छदः प्रणवो दन्त-च्छदः परिसरो भवः ॥१३०॥

गोचरसंचरवहव्रजव्यजखलापणनिगमबक-भगकषाऽऽकषनिकषम् ॥५॥३॥१३१॥

करणाधारयोरन्ते, घान्ताः पुन्नाम्नि साधवः ॥
गोचरः सञ्चरश्चैव, भगो भग व्यजो व्रजः ॥१३१॥

व्यञ्जनाद् घञ् ॥५॥३॥१३२

करणाधारयोर्घञ् स्यात्, पुन्नाम्नि व्यञ्जनात्ततः ॥
वेदो बन्धः समार्गो, [illegible] रङ्गः [illegible] ॥१३२॥

न्यायाऽवायाऽध्यायोद्यावसंहारावहाराऽऽधारदारजारम् ॥५॥३॥१३४॥

करणाधारयोरेते, घञन्ताः स्युर्निपातिताः
पुन्नाम्नि न्याय आधारो, दारा जारोऽवहारकः ॥१३४॥

उदङ्कोऽतोये ॥५॥३॥१३५॥

करणाधारयोरञ्च–रुत्पूर्वाद् घञ् निपात्यते ॥
पुन्नाम्नि स्यान्न तोये स्या–त्तैलोदङ्कः पयोघृतः ॥१३५॥

आनायो जालम् ॥५॥३॥१३६॥

पुन्नाम्नि करणे जाले, घञ् स्यादाङो नियः परः ॥
आनायो मृगमत्स्याना, सद्यः प्राणापहारकः ॥१३६॥

खनो डडरेकेकवकघं च ॥५॥३॥१३७॥

करणाधारयोरेते, घञ् च पुन्नाम्नि वै खनेः ॥
आखनिकवकश्चाख, आखान आखनाखरौ ॥१३७॥

इकिश्तिव् स्वरूपार्थे ॥५॥३॥१३८॥

धातोरर्थे स्वरूपे च, प्रत्ययाः स्युरिकिश्तिवः ॥
वेत्तिर्भञ्जिः क्रुधिर्युहिः पचतिर्वर्तते सुजिः ॥१३८॥

दुःस्वीषतः कृच्छ्राकृच्छ्रार्थात् खल् ॥५॥३॥१३९॥

एवम् अवाय, अध्याय उद्याव ,सहार , ॥१३४॥ अतोय इति किम् ? उदकोदञ्चन ॥१३५॥ स्पष्टम् ॥१३६॥ एवम् आखनिक ॥१३७॥ स्पष्टम् ॥१३८॥ एवम् ईषच्छयम्, ईषत्कर । कृच्छ्रार्थ इति किम् ? ईषल्भ्य धनम् ॥१३९॥

कृच्छ्रवृत्तेर्दुरोऽकृच्छ्रा-र्थस्वीषद्भ्यां च खल् भवेत् ॥
दुःशयं दुष्करो दु ख, सुशयं सुकरः सुखम् ॥१२९॥

च्व्यर्थे कर्त्राप्याद् भूकृगः ॥५॥३॥१४०॥

खल् कर्तृकर्मवाचिभ्या, भूकृग्भ्या च्व्यर्थके क्रमात् ॥
अन्यच्च पूर्ववज्ज्ञेयं, स्याद् दुराढ्यभव त्वया ॥१४०॥

शासूयुधिदृशिधृषिमृषाऽऽतोऽनः ॥५॥३॥१४१॥

कृच्छ्राकृच्छ्रार्थदुःस्वीषत्-पूर्वेभ्य एभ्य आमतः ॥
अनश्चादन्तधातुभ्यो, दुर्योधनः सुयोधनः ॥१४१॥

॥ इति पञ्चमाध्याये तृतीयः पादः ॥

कृच्छ्राकृच्छ्रार्थेभ्यो दु स्वीपद्भ्य पराभ्या च्व्यथवृत्तिकर्तृकर्मवाचिभ्या यथासङ्ख्य भूकृग्भ्या पर खल् स्यादिति सूत्रार्थ । दुराढ्यभवम् , स्वाढ्यभवम् , ईषदाढ्यभव भवता । दुराढ्यकर , स्वाढ्यकर , ईषदाढ्यकरश्चैत्रस्त्वया । च्व्यर्थ इति किम् ? दुराढ्येन भूयत ॥१४०॥ एन दुःशासन , सुशासन , ईषच्छासन , ईषद्योधन दुर्दर्शन , ईषद्दर्शन , दुर्धर्षण , सुधर्षण , ईषद्धर्षण , दुर्मर्षण सुमर्षण ईषन्मर्षण , दुरुत्थानम् , सूत्थानम् , ईषदुत्थानम् ॥१४१॥

॥ इति तृतीय पाद ॥

अथ चतुर्थः पादः ॥

सत्सामीप्ये सद्वद्वा ॥५॥४॥१॥

वर्तमानस्य सामीप्ये, प्रत्यया वर्तमानवत् ॥
धातोर्नवाऽयमायामि, विद्ध्यागच्छन्तमेव माम् ॥१॥

भूतवच्चाऽऽशंस्ये वा ॥५॥४॥२॥

आशस्ये भूतवद् धातोः, सद्वच्च प्रत्यया नवा ॥
चेदागमदुपाध्याय–स्तर्कमेतेऽध्यगीष्महे ॥२।

क्षिप्राऽऽशंसार्थयोर्भविष्यन्तीसप्तम्यौ ॥५॥४॥३॥

क्षिप्राशंसार्थयोर्धातोराशंस्यार्थाद् यथाक्रमम् ॥
सप्तमी च भविष्यन्ती, गुरुश्चेदागमिष्यति ॥३॥

समीप एव सामीप्यम्, वर्तमानस्य सामीप्ये भूते भविष्यति चार्थे वर्तमानाद् धातोर्वर्तमाना इव प्रत्यया वा स्युः, इति सूत्रार्थः । आगतोऽसि ? कदा चैत्र!, अयमागच्छामि, आगच्छन्तमेव मां विद्धि, पक्षे-अयमागमम्, एषोऽस्म्यागतः । कदा चैत्र ! गमिष्यसि ? एष गच्छामि, गच्छन्तमेव मां विद्धि, पक्षे एष गमिष्यन्तमेव मां विद्धि ॥१॥ अनागतस्यार्थस्य प्राप्तुमिच्छा–आशंसा, तद्विषय आशंस्य, तदर्थाद् धातोर्भूतवत् सद्वच्च प्रत्यया वा स्युरितिसूत्रार्थः । एवमुपाध्यायश्चेदागच्छति, एते तर्कमधीमहे, पक्षे उपाध्यायश्चेदागमिष्यति वा एते तर्कमध्येष्यामहे, अध्येतास्महे वा । आशंस्य इति किम् आगमिष्यति तर्कमध्येष्यते मैत्रः ।२॥ एतत्सूत्रस्योदाहरणम्–आगच्छति आगमत्, आगन्ता, क्षिप्रमाशु एते [
गुरुश्चेदागच्छति, आगमत्, आगमिष्यति, आगन्ता वा, कुफाऽशीयीय ॥३।

सम्भावने सिद्धवत् ॥५॥४॥४॥

ज्ञेयाः सम्भावने धातो, सिद्धवत् प्रत्यया ननु ॥
समये चेत् प्रयत्नोऽभू-दुदभूवन् विभूतय ॥४॥

नाऽनद्यतनः प्रबन्धाऽऽसत्त्योः ॥५॥४॥५॥

समासत्तौ प्रबन्धे च, नानद्यतनप्रत्ययः ॥
आजन्म भृशमन्नं ते, दास्यन्ति नृपसत्तमाः ॥५॥

एष्यत्यवधौ देशस्यार्वाग्भागे ॥५॥४॥६॥

स्यादेष्यत्यवधौ देशस्यार्वाग्भागे यथोचित ॥
नह्यनद्यतनो धातो-र्यथास्थलमुदाहरेत् ॥६॥

कालस्यानहोरात्राणाम् ॥५॥४॥७॥

हेतौ शक्तिश्रद्धानम्-सम्भावनम्, तस्मिन् विषयेऽसिद्धेऽपि वस्तुनि सिद्धवत्प्रत्ययाः स्युरितिसूत्रविशदार्थं ॥४॥ एवम् अद्य, येयं पौर्णमास्यतिक्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट, येयं पौर्णमास्यागामिन्येतस्यां जिनमहः प्रवर्तिष्यते ॥५॥ देशस्य योऽवधिस्तद्वाचिन्युपपदे देशस्यैवार्वाग्भागे य एष्यन्नर्थस्तद्वृत्तेर्धातोरनद्यतनविहितः प्रत्ययो न स्यादितिसूत्रस्य व्यक्तोऽर्थः । योऽयमध्वा गन्तव्य आशत्रुञ्जयात्, तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्ष्यामहे । एष्यतीति किम्? योऽयमध्वा अतिक्रान्त आशत्रुञ्जयात् तस्य यदवरं वलभ्यास्तत्र युक्ताः द्विरध्यैमहि । अवधाविति किम्? योऽयमध्वा निरवधिको गन्तव्यः, तस्य यदवरं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे । अर्वाग्भाग इति किम्? योऽयमध्वा गन्तव्य आशत्रुञ्जयात्, तस्य यत् परं वलभ्यास्तत्र द्विरोदनं भोक्तास्महे ॥६॥ कालस्य योऽवधिस्तद्वाचिन्युपपदे कालस्यैवार्वाग्भागे य एष्यन्नर्थस्तद्वृत्तेर्धातोरनद्यतनविहितः प्रत्ययो न स्यात्, न चेत् सोऽर्वाग्भागोऽहोरात्राणाम् इतिसूत्रार्थः । योऽयमागामी संवत्सरस्तस्य यदवरमाग्रहायण्यास्तत्र जिनपूजां करिष्यामः । अनहोरात्राणामिति किम्? योऽयं मास आगामी, तस्य योऽवरं पञ्चदशरात्रस्तत्र युक्ताः द्विरध्येतास्महे ॥७॥

स्यादेष्यत्यवधौ काल-स्यार्वाग्भागे सलक्षणः ॥
अनहोरात्रसम्बन्धे, नचानद्यतनो मतः ॥७॥

परे वा ॥५॥४॥८॥

स्यादेष्यत्यवधौ भागे, परे कालस्य धातुतः ॥
अनहोरात्रसम्बन्धे, नवाऽनद्यतन स्मृतः ॥८॥

सप्तम्यर्थे क्रियातिपत्तौ क्रियातिपत्तिः ॥५॥४॥९॥

क्रियाऽनभिनिर्वृत्तौ हि, सप्तम्यर्थे विचार्यताम् ॥
एष्यदर्थकृतो धातोः, क्रियातिपत्तिरुच्यते ॥९॥

भूते ॥५॥४॥१०॥

सत्यां क्रियातिपत्तौ हि, धातोर्भूतार्थकात् पराः ॥
सप्तम्यर्थे विधातव्या, क्रियातिपत्तिप्रत्ययाः ॥१०॥

वोतात् प्राक् ॥५॥४॥११॥

कालस्य य ऽवधिस्तद्वाचिन्युपपदे, कालस्यैव परे भागेऽनहोरात्रसम्बन्धिनि च एष्यदर्थस्तद्वृत्ते र्धातोरनद्यतनविहित प्रत्यया वा न स्यात् इति सूत्रार्थः । आगामिनो वत्सरस्याऽऽग्रहायण्या परस्ताद् द्वि सूत्रमध्येष्यामहे, अध्येतास्महे वा ॥८॥ सप्तम्या अर्थो निमित्त हेतुफलकथनादिसामग्री कुतश्चिद् वैगुण्यात् क्रियाया अनभिनिर्वृत्तौ क्रियातिपत्तौ सत्यामेष्यदर्थाद् धातो सप्तम्यर्थे क्रियातिपत्ति स्यात् इतिसूत्रार्थ । दक्षिणेन चेद् अयास्यत् नशकट पर्याभविष्यत् ॥९॥ यथा—दृष्टो मया तव पुत्रोऽनार्थी चङ्क्रम्यमाण, अपरश्चातिथ्यर्थी, यदि स तेन दृष्टाऽभविष्यदुताभोक्ष्यत अप्यभोक्ष्यत ॥१०॥ उतात् प्रागिति 'सप्तम्युताऽप्योर्बाढे ५।४।२१। इत्यत्र यदुतशब्दसङ्कीर्तन तत प्रागित्यर्थ । यथा—कथ नाम संयत धननागादे तत्रभवान् आधायकर्मसेविष्यत, धिग् गर्हामहे पक्षे—कथ सेवेत धिग् गर्हामहे । उतात् प्रागितिकिम् 'काला यदभोक्ष्यत भवान् ॥११॥

उतात् प्राक् सप्तमीहेतौ, भूतेऽर्थे वर्तमानतः ॥
धातोर्वाच्या विकल्पेन, क्रियातिपत्तिप्रत्ययाः ॥११॥

क्षेपेऽपिजात्वोर्वर्तमाना ॥५॥४॥१२॥

गर्हायामपिजातुभ्या, योगे कालत्रये भवेत् ॥
वर्तमानाऽपि शास्त्रज्ञो, हिनस्ति प्राणिनो भवान् ? ॥१२॥

कथमि सप्तमी च वा ॥५॥४॥१३॥

गर्हाया वा कथंयोगे, वर्तमाना च सप्तमी ॥
कथं नाम भवान् मांसं, भक्षयति च भक्षयेत् ? ॥१३॥

किंवृत्ते सप्तमीभविष्यन्त्यौ ॥५॥४॥१४॥

क्षेपे गम्ये हि किंवृत्ते, भविष्यन्ती च सप्तमी ॥
किं भवाननृतं ब्रूयाद, वक्ष्यति वा विचार्यताम् ॥१४॥

अश्रद्धाऽमर्षेऽन्यत्रापि ॥५॥४॥१५॥

एव जातु तत्रभवान् भूतानि हिनस्ति ? धिग् गर्हामहे ॥१२॥ उदाहरणेऽनुसन्धेयमेवम्-धिग् गर्हामहे अन्याय्यमतत् । पक्षे-अभक्षत्, अभक्षयत्, भक्षयाञ्चकार, भक्षयिता, भक्षियिष्यति । अत्र सप्तमी निमित्तमस्तीति भूते क्रियातिपत्तने वा क्रियातिपत्ति, कथ नाम तत्रभवान् मांसमभक्षयिष्यत् ? । पक्षे यथाप्राप्तम् । भविष्यति तु क्रियातिपत्तौ नित्यमेव सा । कथ नाम तत्रभवान् मांसमभक्षयिष्यत् ? ॥१३॥ एवं को नाम, कतरो नाम, कतमो नाम यस्मै तत्रभवान् अनृत ब्रूयात् वक्ष्यति वा ॥१४॥ यथा न श्रद्दधे, न सम्भावयामि तत्रभवान नामाऽदत्त गृह्णीयात्, ग्रहीष्यति वा ?, न श्रद्दधे कि तत्रभवान् अदत्तमाददीत, आदास्यत वा ?, न मर्षयामि न क्षमे तत्रभवान् नामादत्त गृह्णीयात्, ग्रहीष्यति वा ? ॥१५॥

अकिंवृत्ते च किंवृत्ते, स्तोऽश्रद्धाऽमर्षयोः परा ॥
सप्तमी च भविष्यन्ती, विचारयेदुदाहृतिम् ॥१५॥

किङ्किलाऽस्त्यर्थयोर्भविष्यन्ती ॥५॥४॥१६॥

किंकिलास्त्यर्थयोर्धातो-रश्रद्धामर्षयोर्भवेत् ॥
भविष्यन्ती न नामास्ति, किङ्किल पलमत्स्यति ॥१६॥

जातु-यद् यदा-यदौ सप्तमी ॥५॥४॥१७॥

अश्रद्धाऽमर्षयोरेषू-पपदकेषु सप्तमी ॥
न क्षमे श्रद्दधे नैव, जातु भवान् सुरा पिबेत् ॥१७॥

क्षेपे च यच्चयत्रे ॥५॥४॥१८॥

अश्रद्धामर्षयोः क्षेपे, सप्तमी यच्चयत्रयोः ॥
यच्च कुर्याद् भवानेवं, न क्षमे श्रद्दधे न तत् ॥१८॥

चित्रे ॥५॥४॥१९॥

सप्तमी जायते धातो-राश्चर्ये यच्चयत्रयोः ॥
आश्चर्यं यच्च सेवेत, विपर्यास्तत्रभवानपि ॥१९॥

शेषे भविष्यन्त्ययदौ ॥५॥४॥२०॥

न श्रद्दधे, न मर्षयामि किङ्किल नाम तत्रभवान् परदारानुपकरिष्यते ?, न श्रद्दधे, न मर्षयामि अस्ति नाम, भवति नाम तत्रभवान् परदारानुपकरिष्यत ॥१६॥ एवं यत्, यदा, यदि सुरा पिबेत् ॥१७॥ धिग् गर्हामहे यच्च यत्र वा तत्रभवानस्मान् आक्रोशेत्, न श्रद्दधे, न क्षमे यच्च यत्र वा तत्रभवान् परिवादं कथयेत् ॥१८॥ एवं यत्रयोगेऽपि विज्ञेयम् ॥१९॥ शेष इति किम् ? यच्चयत्रयोः पूर्वेण सप्तम्येव । अयदाविति किम् ? चित्रं यदि स भुञ्जीत ॥२०॥

अन्यत्र यच्चयत्राभ्या, भविष्यन्त्ययदौ भवेत् ॥
चित्रे यच्चित्रमाश्चर्यं, बधिरः श्रोष्यति श्रुतम् ॥२०॥

सप्तम्युताप्योर्बाढे ॥५।४।२१॥

बाढार्थयोरुताप्योः स्यात्, सप्तमी पूर्वशब्दयोः ॥
उत कुर्याज्जनो धर्म–मपि कुर्याद्यशस्करम् ॥२१॥

सम्भावनेऽलमर्थे तदर्थानुक्तौ ॥५।४।२२॥

सम्भावनेऽलमर्थे चे–न्नालमर्थः प्रयुज्यते ॥
सप्तमी धातुतो ज्ञेया–ऽपि दोर्भ्यां सागरस्तरेत् ॥२२॥

अयदि श्रद्धाधातौ नवा ॥५।४।२३॥

भवेच्छ्रद्धार्थके धाता–वलमर्थे नवाऽयदि ॥
सप्तमी श्रद्दधेऽभुङ्क्त, भुञ्जीत भोक्ष्यते भवान् ॥२३॥

सतीच्छार्थात् ॥५।४।२४॥

सत्यर्थे वर्तमानात् स्या–दिच्छार्थात् सप्तमी नवा ॥
पक्षे तु वर्तमानैव, वाञ्छेद् वाञ्छति चेच्छति ॥२४॥

बाढ इति किम्? उत दण्डः पतिष्यति, अपि धास्यति, द्वारम् ॥२१॥ अलमर्थ इति किम्? निदेशस्थायी मे चैत्रः प्रायेण यास्यति। तदर्थानुक्ताविति किम्? शक्तश्चैत्रो धर्मं करिष्यति ॥२२॥ अलम् अनुक्त इत्यपि। अयदीति किम्? सम्भावयामि यद् भुञ्जीत भवान्। श्रद्धाधाताविति किम्? अपि शिरसा पर्वतं भिन्द्यात् ॥२३॥ एवम् इच्छेत् ॥२४॥

वत्स्यति हेतुफले ॥५॥४॥२५॥

वत्स्यत्यर्थे नवा हेतु-भूते च फलभूतके ॥
सप्तमी यद्युपासीत, गुरून् जायेत पण्डितः ॥२५॥

कामोक्तावकच्चिति ॥५॥४॥२६॥

कामप्रवेदने धातोः, सप्तमी स्यादकच्चिति ॥
कामो मेऽश्नीत सोऽत्रैव, कच्चिज्जीवति मे प्रभुः ॥२६॥

इच्छार्थे सप्तमीपञ्चम्यौ ॥५॥४॥२७॥

धाताविच्छार्थके कामो-क्तौ सप्तमी च पञ्चमी ॥
इच्छाम्यहं भवानत्र, भुङ्क्तां भुञ्जीत वा मुदा ॥२७॥

विधि-निमन्त्रणाऽऽमन्त्रणाऽधीष्ट सम्प्रश्नप्रार्थने ॥ ॥५॥४॥२८॥

सप्तमी पञ्चमी स्यातां, विध्याद्यर्थेषु धातुतः ॥
इहासीत भवानास्तां, व्रतं रक्षेच्च रक्षतु ॥२८॥

एवम् पक्षे यदि गुरून् उपासिष्यत शास्त्रान्त सङ्गमिष्यत । वत्स्यतीति किम् ? दक्षिणेन चेद् याति न शकट पर्याभवति ॥२५॥ स्पष्टे ॥२६॥२७॥ विधि-क्रियाया प्रेरणा, यथा कट कुर्यात्, करोतु भवान् । प्रेरणायामेव यस्य प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणम्, यथा द्विसन्ध्यमावश्यक कुर्यात्, करोतु । यत्र प्रेरणायामेव प्रत्याख्याने कामचारस्तदामन्त्रणम्, यथा इहासीत, आस्ताम्, प्रेरणैव सत्कारपूर्विका अधीष्टम्, यथा व्रत रक्षेत्, रक्षतु । सम्प्रश्न-सम्प्रधारणा, यथा किं नु खलु भो ? व्याकरणमधीयीय, अध्ययै उत सिद्धान्तमधीयीय, अध्ययै ?। प्रार्थनम्-याच्ञा, यथा प्रार्थना मे तर्कमधीयीय, अध्ययै ॥२८॥

प्रैषा-ऽनुज्ञा-ऽवसरे कृत्यपञ्चम्यौ ॥५॥४॥२९॥

प्रैषादिकविशिष्टेऽर्थे, धातोः कृत्याश्च पञ्चमी ॥
कार्यस्त्वया कटः सद्य, कटं कुरु न चेद् व्रज ॥२९॥

सप्तमी चोर्ध्वमौहूर्तिके ॥५॥४॥३०॥

ऊर्ध्वमौहूर्तिकेऽर्थे स्युः, प्रैषादिषु च सप्तमी ॥
कृत्याश्च पञ्चमी कुर्याः, कटमूर्ध्वमुहूर्ततः ॥३०॥

स्मे पञ्चमी ॥५॥४॥३१॥

ऊर्ध्वमौहूर्तिकार्थात् स्मे, स्यात् प्रैषादिषु पञ्चमी ॥
कटमूर्ध्वमुहूर्तार्ध्वं, कुरु स्म प्रेषितो यतः ॥३१॥

अधीष्टौ ॥५॥४॥३२॥

भवेदध्येषणायां स्मे, धातुतः पञ्चमी परा ॥
अङ्ग ? स्म सर्वथा विद्वन् ? अणुव्रतानि पालय ॥३२॥

काल-वेलासमये तुम् वाऽवसरे ॥५॥४॥३३॥

धातोरवसरे गम्ये, तुमेषूपपदेषु वा ॥
भोक्तुं ध्यातु तथाऽध्येतुं, कालो वेला पृथक् पृथक् ॥३३॥

सत्कारपूर्विका प्रेरणा प्रैष । एवं भवता खलु कटः कार्यः, भवान् कटं करोतु, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे ॥२९॥ एवम् ऊर्ध्वमुहूर्तात् कटं कुर्यात् भवान्, भवता कटः कार्यः, कटं करोतु भवान्, भवान् हि प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे ॥३०॥ अत्रापि भवान् हि प्रेषित इत्यादि ज्ञेयम् ॥३१॥ स्पष्टम् ॥३२॥ एवं समया भोक्तुम् एवं-कालो भोक्तुम्। अवसर इति किम् ? कालः पचति भूतानि ॥३३॥

सप्तमी यदि ॥५॥४॥३४॥

यत्प्रयोगे नु कालादि-षूपपदेषु सप्तमी ॥
कालोऽधीयीत यद् वेला, यद् भुञ्जीत शयीत यत् ॥३४॥

शक्तार्हे कृत्याश्च ॥५॥४॥३५॥

गम्ये कर्तरि शक्तेऽर्हे, कृत्याश्च सप्तमी परा ॥
खलु भारस्त्वयोह्येत, वाह्यो भारं वहेद भवान् ॥३५॥

णिन् चावश्यकाऽधमर्ण्ये ॥५॥४॥३६॥

अनयोर्गम्ययोर्वाच्ये, कर्मरि णिन् च कृत्यकाः ॥
शतं दायी तथाऽवश्यं, गेयो गीतस्य गीयते ॥३६॥

अर्हे तृच् ॥५॥४॥३७॥

अर्हे कर्तरि वाच्ये तृच्-प्रत्ययो धातुतो भवेत् ॥
कन्यकाया भवान् वोढा, जामातेति विभावितः ॥३७॥

आशिष्याशीःपञ्चम्यौ ॥५॥४॥३८॥

धातोराशीर्विशिष्टार्थात्, स्याताम्राशीश्च पञ्चमी ॥
अर्हन् ? वीर ? महामोहं, जीयाच्च जयताद् रणे ॥३८॥

माङ्यद्यतनी ॥५॥४॥३९॥

एव समयो यन्ऽधीत ॥३०॥ एव भवान् हि शक्त, भवता खलु कन्या वोढव्या, उह्येत, भवान् खलु कन्या वहेत, भवानेतदर्हति ॥३५॥ एवम् अवश्यकारी, अवश्यहारी, गेयो गाथानाम् ॥३६॥ स्पष्टम् ॥३७॥ आशिषीति किम् ? चिर जीवति मैत्र ॥३८॥ स्पष्टे ॥३९॥

अद्यतनी भवेद् माङयु–पपदे धातुतः परा ॥
मा कार्षीन्न कोऽपि पापानि, मा च भूत् कोऽपि दुःखितः॥३९॥

सस्मे ह्यस्तनी च ॥५॥४॥४०॥

ह्यस्तन्यद्यतनी च स्यात्, स्मेयुक्ते माङि धातुतः ॥
मा स्म करोदकर्तव्यं, मा स्म कार्षीत् तथैव तत् ॥४०॥

धातोः सम्बन्धे प्रत्ययाः ॥५॥४॥४१॥

धात्वर्थाना नु सम्बन्धे–ऽयथाकालेऽपि प्रत्ययाः ॥
साधवो विश्वदृश्वाऽस्य, तनयो भविताऽऽत्मवित् ॥४१॥

भृशाऽऽभीक्ष्ण्ये हि–स्वौ यथाविधि त–ध्वमौ च तद्युष्मदि ॥५॥४॥४२॥

पौनःपुन्ये भृशार्थे च, द्योत्ये हिस्वौ यथाविधि ॥
स्याता धातोस्तु सम्बन्धे, तद्युष्मदि च तध्वमौ ॥४२॥

॥४०॥ सम्बन्धे विशेषणविशेष्यभावरूपे सति । एवं भाविकृत्यमासीत्, गोमानासीत् ॥४१॥ अस्य विशदोऽर्थस्त्वेवम्–भृशाऽऽभीक्ष्ण्ये सर्वकालेऽर्थे वर्तमानात् धातोः सर्वविभक्तिवचनविषये हिस्वौ स्याताम्, यथाविधि धातोः सम्बन्धे–यत एव धातोर्यस्मिन्नेव कारके हिस्वौ तस्यैव धातोस्तत्कारकविशिष्टस्यैव सम्बन्धे अनुप्रयोगे सति, तथा पञ्चम्या एव तध्वमौ, तयोः सम्बन्धिनि बहुत्वविशिष्टे युष्मद्यर्थे हिस्वौ च स्यातां यथाविधि धातोः सम्बन्धे । लुनीहि लुनीहीत्येवायं लुनातीत्यादि, अधीष्वाधीष्वेत्येवायमधीते इत्यादि, लुनीत लुनीतेत्येव यूयं लुनीथ, लुनीहि लुनीहीत्येव यूयं लुनीथ अधीध्वमधीध्वमित्येव यूयमधीध्वे, अधीष्वाधीष्वेत्येव यूयमधीध्वे । यथाविधीति किम्? लुनीहि लुनीहीत्येवायं लुनाति छिनत्ति, इत्यत्र तेन धातोः सम्बन्धे मा भूत् ॥४२॥

प्रचये नवा सामान्यार्थस्य ॥५॥४॥४३॥

सामान्यार्थस्य सम्बन्धे, धात्वर्थाना समुच्चये ॥
हिस्वौ च तध्वमौ स्याता, तद्युष्मदि विभाषया ॥४३॥

निषेधेऽलंखल्वोः क्त्वा ॥५॥४॥४४॥

निषेधे स्यादलंखल्वो–र्धातोः क्त्वा प्रत्ययो नवा ॥
अलं कृत्वा खलु कृत्वा–ऽलं कृदितेन सर्वदा ॥४४॥

परावरे ॥५॥४॥४५॥

धातोः क्त्वाप्रत्ययो वा स्याद्, गम्यमाने परेऽवरे ॥
गिरिर्नदीमतिक्रम्य, तथाऽप्राप्य नदीं गिरिः ॥४५॥

धात्वर्थाना समुच्चय गम्ये सामान्यार्थस्य धातो सम्बन्धे सति धातोः परौ हि–स्वौ तध्वमौ च तद्युष्मदि वा स्याताम् । इतिसूत्रार्थं । व्रीहीन् वप, लुनीहि पुनीहि, इत्येव यतते, यत्यते वा, पक्षे–व्रीहीन् वपति, लुनाति, पुनाति, इत्येव यतते यत्यते वा । सूत्रमधीष्व, निर्युक्तिमधीष्व, भाष्यमधी ष्वेत्येवमधीत पठ्यत वा, पक्षे–सूत्रमधीते, निर्युक्तिमधीते, भाष्यमधीत, इत्येवमधीते पठ्यते वा । व्रीहीन वपत, लुनीत, पुनीतेत्येव यतध्वे, व्रीहीन् वप, लुनीहि, पुनीहीत्येव चेष्टध्वे, पक्षे–व्रीहीन् वपथ, लुनीथ, पुनीथेत्येव यतध्वे । सूत्रमधीध्व, निर्युक्तिमधीध्व, भाष्यमधीध्वमित्येवमधीध्वे, सूत्रमधीष्व निर्युक्तिमधीष्व, भाष्यमधीष्वेत्येवमधीध्वे, पक्षे सूत्रमधीध्वे, निर्युक्तिमधीध्वे, भाष्यमधीध्वे इत्येवमधीध्व । सामान्यार्थस्येति किम् ? व्रीहीन् वप, लुनीहि, पुनीहि इत्येव वपति लुनाति पुनातीति मा भूत् ॥४३॥ स्पष्टम् ॥४४॥ पक्षे नद्यतिक्रमणं गिरि, नद्यप्राप्त्या गिरि ॥४५॥

निमील्यादिमेङस्तुल्यकर्तृके ॥५॥४॥४६॥

निमील्यादेस्तथा मेङो, धातोः स्यात्तुल्यकर्तृके ॥
क्त्वा वा निमील्य नेत्रं स, हसति याचतेऽथवा ॥४६॥

प्राक्काले ॥५॥४॥४७॥

प्राक्कालेऽवस्थिताद्धातोः, परेण तुल्यकर्तृके ॥
सम्बन्धे क्त्वा न वाऽऽसित्वा भुङ्क्ते श्रुत्वाऽवधार्यते ॥४७॥

ख्णं चाऽऽभीक्ष्ण्ये ॥५॥४॥४८॥

आभीक्ष्ण्ये परकालेन, प्राक्काले तुल्यकर्तृके ॥
धातोः ख्णं क्त्वा च सम्बन्धे, भोजं भोजं स गच्छति ॥४८॥

पूर्वाऽग्रेप्रथमे ॥५॥४॥४९॥

पूर्वाग्रेप्रथमेषु स्यात्, परेण तुल्यकर्तृके ॥
प्राक्काले धातुतः ख्णं वा, पूर्वं भोजं स गच्छति ॥४९॥

अन्यथैवंकथमित्थमः कृगोऽनर्थकात् ॥५॥४॥५०॥

एवं मुखं व्यादाय स्वपिति, अक्षि निमील्य याचते, पक्षे-अक्षमानु याचते । तुल्यकर्तृक इति किम् ? चैत्रस्याक्षिनिमीलने मैत्रो हसति ॥४६॥ पक्षे आस्यते भोक्तुम् । प्राक्काले इति किम् ? भुज्यते पीयते वा ॥४७॥ पक्षे भुक्त्वा याति ॥४७॥ पक्षे भुक्त्वा भुक्त्वा याति ॥४८॥ पक्षे पूर्वं भुक्त्वा गच्छति, एवम् अग्रे भोजम्, अग्रे भुक्त्वा, प्रथमं भोजं, प्रथमं भुक्त्वा, पूर्वं भुङ्क्ते ततो याति ॥४९॥ एवम् अन्यथाकारम्, एवङ्कारम्, कथङ्कारम्, पक्षे अन्यथा कृत्वा । अनर्थकादिति किम् ? अन्यथा कृत्वा शिरो भुङ्क्ते ॥५०॥

एभ्यः परात् कृगो धातोः, स्यातुल्यकर्तृकार्थतः ॥
सम्बन्धेऽनर्थकात् खण वा, कथङ्कारं करोति सः ॥५०॥

यथातथादीर्ष्योत्तरे ॥५॥४॥५१॥

ाभ्यामनर्थकात्तुल्य–कर्तृकार्थात् कृगो नवा ॥
ेदुत्तरयतीर्ष्यः खण, यथाकारं करोम्यहम् ॥५१॥

शापे व्याप्यात् ॥५॥४॥५२॥

आक्रोशे कर्मणस्तुल्य–कर्तृकार्थात् कृगो नवा ॥
धातोः खणं सम्भवेचौर–ङ्कारमाक्रोशति क्रुधा ॥५२॥

स्वाद्वर्थाद् अदीर्घात् ५॥४॥५३॥

स्वाद्वर्थात् स्याददीर्घान्ताद्, व्याप्यात् परात् कृगो नवा ।
खणं तुल्यकर्तृकार्थात् सन्, स्वादुङ्कारं पिबेत् कटु ॥५३

विदुदृग्भ्यः कात्स्न्यें णम् ॥५॥४॥५४॥

व्याप्यात् कात्स्न्र्यवतो ण वा, विदुदृग्भ्यस्तुल्यकर्तृके ॥
ाकाले जायते कन्या–दर्शं वरयति प्रजा ॥५४॥

यावतो विन्दजीवः ॥५॥४॥५५॥

एव–कथं त्वं भोक्ष्यसे ? इति पृष्टोऽसूयया त प्रत्याह–यथाक भोक्ष्ये, तथाकारमहं भोक्ष्ये किं तवानेन ? । ईर्ष्योत्तर इति किम् ? यथा कृत्वा ऽहं भोक्ष्ये तथा द्रक्ष्यसि ॥५१॥ शाप इति किम् ? चौरं कृत्वा हेतुभि कथयति ॥ ?॥ एवं मिष्टङ्कारं भुङ्क्ते, पक्षे स्वादुं कृत्वा । अदीर्घादिति किम् । स्वाद्वीं कृत्वा यवागूं भुङ्क्ते ॥५३॥ एवम्–अतिथिवेदं भोजयति । कात्स्न्र्ये इति किम् ? अतिथिं विदित्वा भोजयति ॥५४॥ एवं यावद्वेदं भुङ्क्ते ॥५५॥,

व्याप्यात् कात्स्न्यवतो णं वा, यावतस्तुल्यकर्तृके ॥
भवेद्विन्दतिजीविभ्या, यावज्जीवं तपस्तपेत् ॥५५॥

चर्मोदरात् पूरेः ॥५।४।५६॥

व्याप्यचर्मोदराभ्यां णं, धातोः पूरयतेर्नवा ॥
स्यात्तुल्यकर्तृकार्थात्तृ-दरपूरं रमेज्जनः ॥५६॥

वृष्टिमाने ऊलुक् चास्य वा ॥५।४।५७॥

व्याप्यात् पूरयतेर्णं वा, वृष्टिमानेऽस्य लुग् नवा ॥
ऊतो गोष्पदप्रं गोष्प-दपूरं वारिदोऽपतत् ॥५७॥

चेलार्थात् क्नोपेः ॥५।४।५८॥

चेलार्थाद् व्याप्यतः क्नोपे-र्वृष्टिमाने विभाषया ॥
णं तुल्यकर्तृकार्थात् स्या-च्चेलक्नोपं घनोऽपतत् ॥५८॥

गात्रपुरुषात् स्नः ॥५।४।५९॥

णं वा स्नातेः पराद्भ्यां, स्यात्तुल्यकर्तृकार्थतः ॥
वृष्टिमाने घनो वृष्टो, गात्रस्नायं यथातथम् ॥५९॥

शुष्क-चूर्ण-रूक्षात् पिषस्तस्यैव ॥५।४।६०॥

एभ्यः परात् पिषेर्णं वा, सम्बन्धेऽस्यैव जायते ॥
शुष्कपेषं पिनष्टीदं, रूक्षपेषं तथैव हि ॥६०॥

एर चर्मपूरमास्ते ॥०१॥ स्थल ॥२७॥१८॥ एर पुरुषस्नायं स्ना मघ ॥१९॥ ए। चूर्णपवम् ॥२०॥

कृग्-ग्रहोऽकृतजीवात् ॥५॥४॥६१॥

आभ्यां पराद् यथासङ्ख्यं, कृगो ग्रहेश्च ण भवेत् ॥
सम्बन्धेऽस्यैव वा जीव-ग्राहं गृह्णाति कर्म सन् ॥६१॥

निमूलात् कषः ॥५॥४॥६२॥

निमूलाद् व्याप्यतो वा स्यात्, सम्बन्धेऽस्यैव ण कषेः ॥
जनो निमूलकाषं यत्, कषति स्वर्णग्राहकः ॥६२॥

हनश्च समूलात् ॥५॥४॥६३॥

णं समूलात् कषेर्हन्ते, सम्बन्धेऽस्यैव वा भवेत् ॥
हन्ति समूलघातं स-मूलकाषं कषत्यपि ॥६३॥

करणेभ्यः ॥५॥४॥६४॥

करणार्थात् पराद् हन्तेः, सम्बन्धेऽस्यैव ण नवा ॥
पाणिघातं समाहन्ति. पादघातञ्च कुड्यकम् ॥६४॥

स्व-स्नेहनार्थात् पुष-पिषः ॥५॥४॥६५

करणार्थात् स्वशब्दार्थात्, स्नेहार्थाच्च यथाक्रमम् ॥
पुषः पिषश्च सम्बन्धे-ऽस्यैव ण वा विधीयते ॥६५॥

हस्तार्थाद् ग्रहवर्तिवृतः ॥५॥४॥६६॥

एवम् अकृतकारं करोति ॥६१॥ एवं निमूलस्य काषं कषति ॥६२॥ स्पष्टे ॥६३॥६४॥ यथा स्वपोषं पुष्णाति, एवम् आत्मपोषम्, उदपेषं पिनष्टि, एवं-क्षीरपेषम् ॥६५॥ एवं हस्तवर्तं वर्तयति ॥६६॥

हस्तार्थात् करणादेभ्यः, सम्बन्धेऽस्यैव ण नवा ॥
हस्तग्राहं स गृह्णाति, पाणिवर्त्तं च वर्तते ॥६६॥

बन्धे नाम्नि ॥५॥४॥६७॥

बन्धेर्नाम्न्यस्य सम्बन्धे, करणार्थात् परान्नवा ॥
णं प्रत्ययो भवेच्चौरं, क्रौञ्चबन्धं बबान सः ॥६७॥

आधारात् ॥५॥४॥६८॥

आधारार्थात् पराद् बन्धेः, सम्बन्धेऽस्यैव णं नवा ॥
मुखाब्जाच्छादकान् केशान्, चक्रबन्धं बबान सा ॥६८॥

कर्तुर्जीव-पुरुषान्नश्वहः ॥५॥४॥६९॥

भ्यात् कर्तृभ्या परादाभ्या, नशेर्वहेश्च णं नवा ॥
क्रमादस्यैव सम्बन्धे, जीवनाशं स नश्यति ॥६९॥

ऊर्ध्वात् पूःशुषः ॥५॥४॥७०॥

कर्तुरूर्ध्वात् शुषः पूरः, सम्बन्धेऽस्यैव णं नवा ॥
य शुष्यत्यूर्ध्वशोषं स, ऊर्ध्वपूरं च पूर्यते ॥७०॥

व्याप्याच्चेवात् ॥५॥४॥७१॥

व्याप्यात् कर्तुस्तथेवार्थाद्, धातोर्णं वा भवेत् परः ॥
सम्बन्धेऽस्यैव नष्टः स, काकनाशं भयद्रुत ॥७१॥

स्पष्टे ॥६७॥६८॥ एव पुरुषाद्वह इति । कर्तुरिति किम् ? ग्रीन नश्यति ॥६९॥ स्पष्टम् ॥७०॥ एव मुखानिधाय निहित ॥ ७१ ॥

उपात् किरो लवने ॥५॥४॥७२॥

किरतेर्लवनार्थस्य, सम्बन्धे णं नवा भवेत् ॥
उपपूर्वाद्रुपस्कार, लुनन्ति मद्रकाः कुतः ॥७२॥

दंशेस्तृतीयया ॥५॥४॥७३॥

तृतीयान्तेन योगे णं, वा तुल्यकर्तृकार्थतः ॥
उपाद् दंशेर्हि सम्बन्धे-ऽस्ति मूलकोपदशामा ॥७३॥

हिंसार्थादेकाऽऽप्यात् ॥५॥४॥७४॥

धातोर्हिंसार्थकाद् धात्व-न्तरेण चैककर्मकात् ॥
तृतीयान्तेन योगे णं, वा तुल्यकर्तृकार्थतः ॥७४॥

उपपीडरुधकर्षस्तत्सप्तम्या ॥५॥४॥७५॥

तृतीया सप्तमी चापि, तदन्तेनोपपूर्वकात् ॥
णं तुल्यकर्तृकार्थात् स्यात्, पीडादित्रितयान्नवा ॥७५॥

लवन इति किम्? उपकीर्य याति ॥७२॥ एव मूलकेनोपदशम्, मूलकेनोपदश्य, श्लोकान्ते 'आ' इति उद्गारसूचकम् ॥७३॥ यथा दण्डेनोपघात, दण्डेनोपहत्य च गा सादयति। एकाप्यादिति किम्? दण्डेनोपहत्य चौर गोपालको गा खेटयति ॥७४॥ यथा पार्श्वाभ्यामुपपीड, पार्श्वोपपीड शेते, पार्श्वयोरुपपीड, पार्श्वोपपीड शेते। व्रजेनोपरोध, व्रजोपरोधम्, व्रजोपरोध गा स्थापयति। पाणिनोपकर्ष, पाणावुपकर्ष पाण्युपकर्षं गृह्णाति ॥७५॥

प्रमाणसमासत्त्योः ॥५॥४॥७६॥

स्यात् प्रमाणसमासत्त्यो-स्तृतीया चापि सप्तमी ॥
तदन्तेन च धातोर्णं, वा तुल्यकर्तृकार्थतः ॥७६॥

पञ्चम्या त्वरायाम् ॥५॥४॥७७॥

पञ्चम्यन्तेन योगे वा, णं तुल्यकर्तृकार्थतः ॥
भवेद् धातोस्त्वराया य-च्छय्योत्थायं स धावति ॥७७॥

द्वितीयया ॥५॥४॥७८॥

द्वितीयान्तेन योगे णं, वा तुल्यकर्तृकार्थतः ॥
धातोर्भवेत्त्वराया य-ल्लोष्टग्राहं स युध्यति ॥७८॥

स्वाङ्गेनाऽध्रुवेण ॥५॥४॥७९॥

णं स्वाङ्गनाध्रुवेण स्याद्, द्वितीयान्तेन धातुतः ॥
वा तुल्यकर्तृकार्थाद् यद्, भ्रूविक्षेपं प्रजल्पति ॥७९॥

अस्य विशदोऽर्थः,-आयाममान-प्रमाणम्, समासत्ति-सम्भ्रमपूर्वकं सन्निकर्षः, तयोर्गम्ययोस्तृतीयान्तेन सप्तम्यन्तेन च योगे तुल्यकर्तृकार्थाद् धातोः सम्बन्धे णं वा स्यात्। द्व्यङ्गुलेनोत्कर्षं द्व्यङ्गुलोत्कर्षं द्व्यङ्गुले उत्कर्षं द्व्यङ्गुलोत्कर्षं गण्डिकां छिनत्ति, केशग्राहं, केशग्राहम्, केशेषु ग्राहं केशग्राहं युध्यन्ते, पक्षे द्व्यङ्गुलेनोत्कृष्य गण्डिकां छिनत्ति ॥७६॥ एवं शय्याया उत्थायं धावति। पक्षे शय्याया उत्थाय धावति। त्वरायामिति किम्? आसनादुत्थाय याति ॥७७॥ एवं लोष्टान् ग्राहं, लोष्टान् गृहीत्वा युध्यन्ते ॥७८॥ यस्मिन्नङ्गे छिन्ने जीवति वा प्राणी न म्रियते तदध्रुवम्। एवं भ्रुवौ विक्षेपं, भ्रुवौ विक्षिप्य वा जल्पति। स्वाङ्गेनेति किम्? कफमुन्मूल्य जल्पति। अध्रुवेणेति किम्? शिर उत्क्षिप्य कथयति ॥ ७९ ॥

परिक्लेश्येन ॥५॥४॥८०॥

परिक्लेश्येन स्वाङ्गेन, द्वितीयान्तेन धातुतः ॥
णं तुल्यकर्तृकार्थाद्वा, शिरश्छेदं प्रयुध्यते ॥८०॥

विशपतपदस्कन्दो वीप्साऽऽभीक्ष्ण्ये ॥५॥४॥८१॥

द्वितीयान्तेन योगे णं, वा वीप्साऽऽभीक्ष्ण्ययोर्भवेत् ॥
विशादिधातुतस्तुल्य–कर्तृकार्थाद् यथोचितम् ॥८१॥

कालेन तृष्यस्वः क्रियान्तरे ॥५॥४॥८२॥

द्वितीयान्तेन कालार्थ–केन योगे क्रियान्तरे ॥
तृष्यस्भ्यां भवेद् णं वा, द्व्यहतर्षं पिबन्ति ते ॥८२॥

नाम्ना ग्रहाऽऽदिशः ॥५॥४॥८३॥

द्वितीयान्तेन योगे स्या–न्नामशब्देन णं नवा ॥
गृह्णातेरादिशेश्चापि, नामग्राहं ददाति स ॥८३॥

एवं शिरांसि छेदं, शिरांसि छित्त्वा युध्यन्ते ॥८०॥ यथा गेहं गेहमनुप्रवेशं, गेहानुप्रवेशमास्ते, गेहमनुप्रवेशमनुप्रवेशं, गेहानुप्रवेशमास्ते, गेहं गेहमनुप्रपातं, गेहानुप्रपातमास्ते, गेहमनुप्रपातमनुप्रपातं, गेहानुप्रपातमास्ते, गेहंगेहमनुप्रपादं, गेहानुप्रपादमास्ते, गेहमनुप्रपादमनुप्रपादं, गेहानुप्रपादमास्ते । गेहं गेहमवस्कन्दं, गेहावस्कन्दमास्ते, गेहमवस्कन्दमवस्कन्दं गेहावस्कन्दमास्ते, पक्षे गेहंगेहमनुप्रविश्यास्ते, गेहमनुप्रविश्यानुप्रविश्यास्ते इत्यादि ॥८१॥ एवं द्व्यहं तर्षं, द्व्यहमत्यासं गावः पिबन्ति । क्रियान्तर इति किम्? अहरत्यस्येषून् गतः ॥८२॥ एवं नामानि ग्राहं, नामान्यादेशं, नामादेशं दत्ते, पक्षे–नाम गृहीत्वा दत्ते ॥८३॥

कृगोऽव्ययेनानिष्टोक्तौ क्त्वाणमौ ॥५॥४॥८४॥

योगेऽव्ययेन कृग्धातोः, स्तस्तुल्यकर्तृकार्थतः ॥
क्त्वाणमौ यदनिष्टोक्तौ, किं नीचैःकृत्य कथ्यते ॥८४॥

तिर्यचाऽपवर्गे ॥५॥४॥८५॥

कृगः क्रियासमाप्तौ हि, स्तस्तुल्यकर्तृकार्थतः ॥
क्त्वाणमौ तिर्यचा योगे, ते तिर्यक्कारमागते ॥८५॥

स्वाङ्गतश्च्व्यर्थे नानाविनाधार्थेन भुवश्च ॥५॥४॥८६॥

च्व्यर्थे नानाविनाभ्यां च, धार्थयोगे कृगो भुवः ॥
क्त्वाणमौ स्वाङ्गतस्तुल्य-कर्तृकार्थाद् यथोचितम् ॥८६॥

तूष्णीमा ॥५॥४॥८७॥

तूष्णीयोगे भुवो धातोः सम्बन्धे क्त्वाणमौ परौ ॥
स्तस्तुल्यकर्तृकात् किं, तूष्णीभाव समागते ॥८७॥

आनुलोम्येऽन्वचा ॥५॥४॥८८॥

आनुलोम्येऽन्वचा योगे, भूधातोः क्त्वाणमौ परौ ॥
स्तस्तुल्यकर्तृकार्थाद् यत् , तेऽन्वग्भावं समासते ॥८८॥

इच्छार्थे कर्मणः सप्तमी ॥५॥४॥८९॥

इच्छार्थे कर्मभूतात् स्यात् , सप्तमी धातुतः परा ॥
सा तुल्यकर्तृकार्थाद् यद्, भुञ्जीयेति स इच्छति ॥८९॥

शक-धृष-ज्ञा-रभ-लभ-सहा-र्ह-ग्ला-घटा-ऽस्ति-समर्था-ऽर्थे च तुम् ॥५॥४॥९०॥

शक्याद्यर्थेषु चेच्छार्थ–केषु धातुषु नामसु ॥
समर्थार्थेषु धातोस्तुं, कर्मभूताद्विधीयते ॥९०॥

॥ इति चतुर्थः पादः ॥

॥ पञ्चमोऽध्यायः परिपूर्णतामगात् ॥

एवम् अन्वग् भूत्वा, अन्वग् भूय- । आनुलोम्य इति किम् ? अन्वग् भूत्वा विजयते, पश्चाद् भूत्वेत्यर्थ ॥८८॥ इच्छार्थ इति किम् ? भोक्तो याति । कर्मण इति किम् ? इच्छन् करोति ॥८९॥ यथा–शक्नोति पारयति वा भोक्तुम्, एव–धृष्णोति, जानाति, आरभते, लभते, सहते, अर्हति, ग्लायति, घटते, अस्ति, समर्थ इच्छति वा भोक्तुम् ॥९०॥

॥ चतुर्थ पाद समाप्त ॥

॥ अध्याय पञ्चम पूर्ण ॥

पञ्चाध्यायात्मक :
प्रथम खण्ड
पूर्णतामगात् ॥

॥ विशुद्धीकरणम् ॥

अविशुद्धम्	विशुद्धम्	पत्राङ्क	पङ्क्ति
वग।	वर्गा	३	१४
उरोद्भव,	उराभव	४	१२-२०
[ये ये सान्तास्त तऽदन्ता इतिमतमाश्रित्य 'उरोद्भव' इत्यशुद्धन, पर प्रसिद्धिमनुरुध्यात्र सेत्यम्]			
शास्त्र	शास्त्रे	८	१४
ऋति	ऋति	९	६
ऋकारश्च	ऋकारश्च	१०	१८
जायऽसा	जायाऽस्मा-	१३	१२
स्वरे	स्वैर	१२	१४
ऽनुसासिको	ऽनुनासिको	१८	२
कुड्वास्त	कुड्ड्वास्त	१८	२
कुड्	कुड्डु	१८	
इन्द्रादय	[illegible]	१८	१८
[illegible]ठति	लब्धुमिच्छति	२४	१७
स्यादा	स्यादो	२२	६
ऽभिम	भिम	३२	१३
धनाल्याम्	धनाल्यानाम	३४	१४
मुनें	मुन	[illegible]	१०
पुमि	पुमि	४१	१४
भिद्द	भिद्रे	४४	१२
[illegible]	[illegible]ना	४८	१
[illegible]मन्तया	[illegible]मन्तस्य च	४४	४

अविशुद्धम्	विशुद्धम	पत्राङ्क	पङ्क्ति
वजितस्य	वर्जितत्रो	४४	१७
मभुत्रा	मुभ्रत्रा		४
२।१।०१।	२।१।२१।	२	२०
यस्म	यस्मै	६४	४
न	न	६०	२
अहरात्रा-	अहोरात्रा-	[illegible]	१५
-स्योत	-स्यति	६८	१५
हुना	[illegible]	७३	४
दुभगा	दुर्भगा	७६	१
-पद	-पद	७	७
प्रकृत	प्रकृत	८०	३
माधक	माधक	८०	३
पूर्ववत्	पूर्ववत्	८०	१४
भूत	भूत	८१	२
दव	दव	८२	१४
पीतात्र	पीता	८२	१४
चत्रा	चैत्रा	८४	१०
[illegible]ग्यात्रिशाव्रत	ऽत्येन क्रमात	८४	५
नथा	मतो	८५	३
क्षिपति	क्षिपन्ति	९३	२१
[illegible]	[illegible]	९४	६
[illegible]	[illegible]	९७	१२
गतिना	गतिना	९८	१
[illegible]	[illegible]	९९	२

अस्मदा	अस्मदो	९९	१५	तथव	तथैव	१३९	४
थानो	थान्नो	१०३	९	शुभ्र	शुभ्रु	१३९	२१
सपि	सर्पि	१०३	९	कूस	कुस	१४०	८
स्यात्	प स्यात्	१०४	१८	नकुसश्च	भ्रुकुसश्च	१४०	१०
भूमिष्ठे	भूमिष्ठो	१०७	९	भवेत्	भवेन्	१४५	५
नव	नैव	१११	१२	व्रत	व्रत	१४५	१२
सिञ्चेत	सिञ्चते	११२	८	नित्य	नित्य	१५२	१२
प्रा दुष्या-	प्रादु ष्याः	११२	३	थाऽर्य	र्थाऽय	१५५	१०
सोष्यसि	सोष्यसि	११२	१९	षष्ठयन्त	षष्ठयन्त	१५७	११
पत्व	णत्वं	११४	३	समस्यतेन	समस्यते	१५९	४
नादि	नादि	११४	१९	कालिका	कालका	१५९	१२
देनु	देनु	११९	११	उपमान	उपमान	१६१	१५
रुचि	रुचि	१२३	१७	कुञ्जेर.	कुञ्जरै	१६३	५
द्विगो	द्विगो	१२५	७	सहक्तौ	सहोक्तौ	१६५	१६
द्विपुरुषा	द्विपुरुषी	१२९	११	जाता	जातौ	१६८	८
कौर्नक्षत्रे	कौर्नक्षत्रे	१२५	१३	स्वैद्वन्द्व	स्वैद्वन्द्वे	१६९	६
ऽर्थे	ऽर्थे	१२९	१७	क्षान्त	क्षान्त	१७१	६
पूर्वकात्	पूर्वकात्	१३१	१७	”	”	”	१२
गृहीते	गृहीते	१३१	१८	बलाच्युतो	बलाच्युतौ	१७३	३
मूलात्	मूलात्	१३२	५	प्राश्रृषिज	प्रावृषिज	१७८	१९
स्यान्मनावीच	स्यान्मनावीच	१३२	१६	कद्रु	कद्रु	१७८	१९
देर	देर्नु	१३३	३	पुवत् कम,	पुवत् कर्म	१८३	१४
नवम्	नुवम्	१३४	०	कम	कर्म	१८३	१५
कर्पति	कर्पंति	१३५	८	पुव-	पुंव-	१८४	१५
लुकभवत	लुग्भवेत्	१३८	२	”	”	”	१८
लो-लुक	लुग्-लुक्	११८	५	कलास	कैलास	१८७	३

आजरा	अजिरा	१८७	११
दीघत्व	दीर्घत्व	१८७	१२
सभत्र	सभत्रे	१८७	१५
दीघता	दीर्घता	१८९	५
प्राक	प्राक्	१९०	३
,,	,,	,,	१७
नून	नूनम्	१९९	२
शीघ	शीघ	१९२	१२
ईरन	ईरन्	२०३	६
पेर	परे	२०५	१८
परा	परो	२१२	५
तिष्ठत	तिष्ठत	२१४	१८
द्विप्र	द्विप्र	२१७	२२
पुत्रा	पुत्रो	२१८	३
अहि	अहि	२१९	१९
गलुप	गुलुप	२२५	५
आदना	आदना	२३४	१२
परम्म	परस्म	२३४	१२
आम्यत	आस्यत्	२३४	१.
आत्यान्	आत्यन्	[illegible]	१७
म्लुचूम्लुच्	म्लुचूम्लुचूम्लुच्	२३५	१
दश	दश	२३.	१.
धमन	धर्मन	२३६	६
रगधि	रगधि	२३९	१०
प्रवम्	प्रवम्	२४२	६
ज	जु	२४.	११
सम्न।	सम्ना	२४४	१
—शान	न शान	२५३	१७
।	अया	२.५	१.
वत्म	वत्स	२	६
द्रेपरेत्	द्रेपयत्	.	.
ज्ञा—लु	ज्ञा, लु	२७१	२
खनादाना	खनादीना	२७३	११
हृदादेशा	हृदादशा	२७.	१७
ता	तो	७९	७
स्वयते	स्वयन	२८	१२
न्नरा	न्नरा	२८८	१९
शाट	शीट	२८	७
अदेयात्	अन्यात्	[illegible]	२१
वाता	धाता	७	५
वशाता	हुशाता	३०५	२२
ङा	छा	३	१
गीत	वीत	३०.	१८
भशम्	नृशम्	१.	२१
कत	कृत	३१.	.
विक्रेय	विक्रेय	३११	१२
मुज	मुज	३२.	१९
भुगा	भुगा	२३६	२
गाधना	गानना	.	१८
॥८७॥	॥८७॥८८॥	३८.	२
दभूता	दूसृतो	.	.
शोका	शाका	३.१	१०
निश्चन्य	नि.यन्य	१०	२
मुनान्या	मुपान्या	३८	.
परिब्राट्	परिब्राड्	३३८	१
च्वन्	च्वन्	३३८	१
मौहूतिक	मौहूर्तिक	३८	१